ISSN 0976-8645

# JAHNAVI SANSKRIT E-JOURNAL

*A portal of Sarasvatniketanam*




www.sarasvatniketanam.org www.jahnavisanskritejournal.in

**षड्त्रिंश-सप्तत्रिंशसंयुक्ताङ्के भवतां समेषां मङ्गलाभिनन्दनम्।**


| | |
|---|---|
| **मुख्यसम्पादकः** | विद्यावाचस्पति-डा.सदानन्दझाः । |
| **सम्पादकाः** | डा. सुमनदीक्षितः, डा. मीनाक्षीजोशी, विद्वान् सुमन् आचार्यः, डा. श्लेषा सचिन्द्र, डा. बिपिनकुमारझा । |
| **विशिष्टपुनर्वीक्षकाः** | Dr. PK Wendabona, Department of Basic Principles, Institute of Indigenous Medicine University of Colombo, Rajagiriya Sri Lanka |
| **प्रकाशकः** | डा. बिपिनकुमारझा । |
| **प्रतिनिधयः (लोकार्पणसन्दर्भे)** | विद्वान् सुमन् आचार्यः |
| **तकनीकिप्रवन्धनसहायकः** | रित्ज़ वेब होस्टिंग, बंगलोर |


सारस्वत-निकेतनाख्या संस्कृतसेवासरणिः पूज्यगुरुपादैः कीर्तिशेषैः राष्ट्राधीशपुरस्कृतैः **देवानन्दझावर्य्यैः** प्रातस्मरणीयैः स्वनामधन्यैः राष्ट्राधीशपुरस्कृतैः **तुलानन्दाऽपरनामनारायणझावर्य्यैश्च** उद्घाटिता विद्यावाचस्पत्युपाधिभाक्-सदानन्दझाऽनुगता एषा सरणिः बिपिनझाद्वारा संस्कृतानुरागिसहयोगैः विविधेषु रूपेषु संस्कृतप्रचार-प्रसाराय सन्नद्धा वर्तते तेषु रूपेषु एवायं प्रबन्धः जाह्नवी संस्कृत ई जर्नलनाम्ना विश्वेऽस्मिन् प्रथितः।



## विषयानुक्रमणिका


| Sl. | शीर्षकम् | लेखकः |
|---|---|---|
| | मुख्यसम्पादकीयम् | डा. सदानन्द झा |
| | प्रकाशकीयम् | डा. बिपिन कुमार झा |
| 1 | विदुरोपदेशस्य सार्वकालिकत्वम् | डा. एस्. आनन्दतीर्थः<br>डा. श्रीनिवास कुमारः एन्. आचार्यः |
| 2 | वचनान्तस्तत्त्वं तदाधृतस्साहित्यशास्त्रीयसन्दर्भश्च | श्री नारायणदत्तमिश्रः |
| 3 | कोष सञ्चयन : भारतीय लोकहितकारी दृष्टिकोण में | श्री नीटूदत्त नौटियाल |
| 4 | अर्थशास्त्र में वर्णित कृषिव्यवस्था की वर्तमान में प्रासंगिकता | डा.देवी सिंह |
| 5 | न्यायनये पदवृत्तिविचारः | श्रीमती वाणी मञ्जुनाथ हेगडे |
| 6 | छान्दोग्योपनिषदि यज्ञप्रकरणान्तर्गते आत्मतत्त्वविद्यानुकूल्ये धनविज्ञानसमीक्षणम् | रीतापाल |
| 7 | दक्षिणामूर्ति शिव अष्टमूर्तिस्वरूप शिव एवं शंकराचार्यस्वरूप: एक विमर्श | डा. मीनाक्षी जोशी |
| 8 | Development of Economic Botany through Ages in Indian Perspective | Dhananjay Vasudeo Dwivedi |
| 9 | ओङ्कार का तात्विक विमर्श | डा. बिपिन कुमार झा |
| 10 | Women and Civil Administration in Mahabharata | Shri Mahesh |
| 11 | काव्यप्रकाश के अनुरूप ध्वनिविमर्श | स्वटीरानी |
| 12 | ज्योतिषशास्त्रे वनस्पतेः वपनकलनिर्धारणम् | श्रीकृष्णकुमारमिश्रः |
| 13 | वैदिककृषिविज्ञानस्वरुपविमर्शः | श्री अखिलेशः |
| 14 | महर्षिपतञ्जलिः तन्महाभाष्यञ्च | श्री गिरीशकुमारमिश्रः |
| 15 | आधुनिकपरिप्रेक्ष्ये शास्त्रस्य अध्ययनम् अध्यापनञ्च | डा. भगवानसामन्तरायः |
| 16 | कतिपयशब्दानां साधुत्वासाधुत्वभ्रमनिवारणम् | डा.जयकृष्णः |
| 17 | ज्यौतिषशास्त्रे विवाहकालविमर्शः | श्री संतोष कुमार पाठक |
| 18 | वैयाकरणसिद्धान्तकौमुद्याः कारकप्रकरणे कर्मप्रवचनीयसंज्ञाविमर्शः | श्री अभिषेकमुखोपाध्यायः |
| 19 | संस्कृतनाटकेषु भाषावैचित्रम् | श्री दीपङ्कर मण्डल |
| 20 | जनतन्त्रं शिक्षा च | डा. निवेदिताकर |
| 21 | पर्यावरणसंरक्षणे संस्कृतस्योपयोगिता | डा. रश्मिकुमारी |
| 22 | मनुस्मृति के आलोक में दण्डविधान | डा. गीता शुक्ला |
| 23 | व्यक्तित्व विकास में योग की भूमिका | प्रेमसिंह सिकरवार |

Jahnavi Sanskrit E-Journal (The First Unpaid Sanskrit E-Journal by सारस्वत-निकेतनम्) published by Dr. Bipin Kumar Jha
Avilable at jahnavisanskritejournal.in Issue 36-37 Vol- I Year 10. Date 09 March, 2019 JSEJ/36-37/I/10/2019
Since 2009
ISSN- 0976-8645
UGC RN-41039

## सम्पादकीयम्

शिवशिरसि वसन्ती संविदानन्दनीरा
हृदयकलुषपुञ्जं प्रक्षिपन्ती विदूरे।
सघनतमसि दिव्यं ज्योतिरालोकयन्ती
प्रसरतु भुवि भव्या भारती काऽपि दिव्या॥

अये श्रीमन्तस्तत्र भवन्तः सुरसरस्वती सम्भृतस्वान्ता विविधविद्याविद्योतितान्तःकरणा नानाछात्रसमुपास्यमानचरणा ज्ञानप्रभाध्व-स्ताऽज्ञानावरणा भारतीयसंस्कृतिसेवासमाराधनतत्पराः विद्वन्मणयः सुरभारतीपदकमलानुरागिणश्च!

संसारस्य प्रथमान्तर्जालीयसंस्कृतत्रैमासिकजाह्नवी-पत्रिकायाः षड्त्रिंशसप्तत्रिंशसंयुक्ताङ्कमिमं सहृदय-विदुषां नयैकबद्धपक्षपातानां पाठकानां पुरतः प्रस्तुवन् महान्तमानन्दमनुभवामि।

जाह्नव्याः प्रारम्भकालादेव संस्कृतप्रचारप्रसाराय देशे-विदेशे च पत्रिका लोकार्पणकार्यक्रमसमारोहः आयोज्यते अस्माभिः। एतत् परम्परायाम् अमेरिका-अटलाण्टादि स्थानेष्वपि तत्रस्थितैः प्रख्यातविद्वद्भिः कृतः। एतदर्थं प्रस्तुताङ्कस्य लोकार्पणकार्यक्रमः उडुपिनगरे स्वनामधन्यैः विविधबुधवन्दितचरणैः पेजावरमठपीठाधिपतिपरमपूज्यैः यतिकुलचक्र-वर्तिचूडामणिभिः श्रीश्री विश्वेशतीर्थमहास्वामि-महोदयैः अपि च उडुपिस्थश्रीकृष्णमठपीठाधिपति-परमपूज्यश्रीश्री विद्याधीशतीर्थमहास्वामिमहोदयैः विविधप्राशासनिककार्यव्यस्तैरपि अस्माकं सौभाग्यवशात् समवेतरूपेण पत्रिकालोकार्पणकृते स्वीया कृपानुमतिः प्रदत्ताऽस्ति एतदर्थं श्रीचरणान् श्रद्धयास्तवीमि।

वस्तुतः समेषां राष्ट्रियान्ताराष्ट्रियतत्वचिन्तकानां सुरसरस्वतीमन्तेवासिनां वाग्देवतावरदतनयानां शेमुषीजुषां विदुषां च सत्प्रयासेनेयं पत्रिका शुक्लपक्षीयचन्द्रवद्वर्द्धन्ते वर्द्धिष्यन्ते च। प्रस्तुताङ्के यद्यपि नानाराज्येभ्यः बद्धपरिकराणामाचार्याणामालेखाः पाण्डित्यपूर्णाः विविधशास्त्रीयशोधनिबन्धाः सम्प्राप्ताश्चयनसमि-त्यनुशंसया समावेशिताश्च तथापि वचनान्तस्तत्वं तदाधृतसाहित्यसन्दर्भसविमर्शश्च, वैदिकविज्ञान-स्वरूपविमर्शः, ज्यौतिषशास्त्रे विवाहकालविमर्शः, शब्दसाधुत्वपरिशीलनमित्यादयः पण्डितानां विशेषतः प्रीतिकराः विद्यन्ते।

विविधप्रान्तस्थाः विविधशास्त्रविचारदक्षाः विविध-शास्त्रनिष्णाताः गरिष्ठाः वरिष्ठाः विद्वांसः स्वकीयालेखप्रेषणकृपाभिरतितरां समुत्साहितवन्त इति तेषामनारतं प्रणामाञ्जलिं प्रस्तूयते।

यथैव परमेश्वरस्य भवानीनाथस्य जटातः प्रवहन्ती भागीरथी जाह्नवी त्रैलोक्यं पुनाति मज्जतां मनोनिर्मलं प्रसादयति मुक्तिपथं तथैवेयं मदीयेयं जाह्नवीपत्रिका विविधबुधानां शारदासेवन-तत्पराणां हृदि दिव्यसौरभं प्रसादं विधत्तामिति वयं कामयामहे।

सुरसरस्वत्या सेवाविविधेलिमेतिमत्यैव पत्रिका सम्पादने प्रवृत्तोस्मि। पत्रिकेयं सर्वथा राजनीति-विमुखा शास्त्ररसिका संस्कृतप्रचारप्रसारे बद्धपरिकरा च सर्वदैव वर्त्तते।

अन्ते सानुनयं निवेदनं च सम्पादनादक्षतया मदीयबुद्धिदोषेण येऽशुद्धयस्त्रुटयस्तान् स्वयं संशोध्य व्यवहरन्तु सूचयन्तु चेति सकृपमिति भूयोभूयः सम्प्रार्थ्यमानो भावत्कः श्रैमत्कः।

**झोपाख्यः सदानन्दः**

अन्ताराष्ट्रयमहिलादिवसः



Jahnavi Sanskrit E-Journal (The First Unpaid Sanskrit E-Journal by सारस्वत-निकेतनम्) published by Dr. Bipin Kumar Jha
Avilable at jahnavisanskritejournal.in Issue 36-37 Vol- I Year 10. Date 09 March, 2019 JSEJ/36-37/I/10/2019
Since 2009
ISSN- 0976-8645
UGC RN-41039

## प्रकाशकीयम्

साम्प्रतं विश्वस्मिन् विश्वे सर्वत्र भारतस्य अभिनन्दनं दरीदृश्यते। कर्त्तव्यपथि ये भवन्ति ते एव देशसमुन्नतये मार्गं निर्मान्ति। प्राचीनकाले भारते ऋषयः राष्ट्रसमुन्नत्यर्थं धर्माचरणं विधाय मार्गं प्रादर्शयत् तत्रैव दुर्जनाः आततायिनः आतंकमुत्पादयन्ति स्म। साम्प्रतिके युगेऽपि भारते गंगायमुनयोः संगमे सरस्वस्वत्यवगाहनं विधाय सर्वे नागरिकाः ऋषयश्च देशस्य सर्वविधसमुन्नत्यर्थं धर्माचरणं कुर्वन्तः आसन् तदानीन्तने काले एव आततायिनः आतङ्किनः दुराचारिणः जघन्यापराधं कृतवन्तः। कीर्तिजीविनः नैके वीरसेनानयः प्राणार्पणद्वारा भारतमातुः रक्षणं कृतवन्तः। कर्णभारे आचार्यभासः कथयति हुतं च दत्तं च तथैव तिष्ठति ।

अस्माकं शास्त्रे उक्तम् अस्ति 'आततायिनः वधार्हाः'। कदाचित् इति एव विज्ञाय अस्माकं यशस्विनः प्रधानमन्त्रिणः वायुसैनिकमाध्यमेन आतंकवादीन् यमलोकं प्रति सम्प्रेषितवन्तः। अस्माकं राष्ट्ररक्षकाः एते वीरसैनिकाः सर्वदा सर्वथा अभिनन्दनीयाः। एते अस्मान् शिक्षयन्ति यत् सहजं कर्म प्राणार्पणेन विधेयम्। आचार्यः कालिदासः शाकुन्तलस्य षष्ठे अङ्के आदौ एव सहजं कर्म समाचरणीम् इति निर्दिशति। भगवान् नारायणः अपि सहजं कर्म कौन्तेय इति वचनद्वारा अस्मान् अग्रेसारयति। पत्रिकेयमपि सहजकर्मणि अनारतं व्यापृता वर्तते। राष्ट्रस्य समुन्नत्यर्थं सारस्वतसाधनारता ये तपस्विनः तेषां मनोभावान् शोधपत्रमाध्यमेन अभिव्यनक्ती निजकर्त्तव्यपथि सर्वान् प्रेरयन्ती अनारतं प्रवहन्ती कलकलनिनादकुर्वन्ती हसन्ती लसन्ती इयं जाह्नवी विश्वशान्तिनिमित्तं महाशिवरात्र्युत्सवे कालकूटविषपानं विधाय विश्वरक्षकान् पार्वतीजानीन् प्रार्थयते। अस्माकं ऋषयः एतत् सर्वं मनसिनिधाय विश्वशान्तये राष्ट्रमंगलाय च उक्तवान् अस्ति।

ओ३म् आ ब्रह्मन् ब्राह्मणों ब्रह्मवर्चसी जायतामाराष्ट्रे राजन्यः शूरऽइषव्योऽतिव्याधी महारथो जायतां दोग्ध्री धेनुर्वोढ़ाऽनड्वानाशुः सप्तिः पुरन्धिर्योषा जिष्णू रथेष्ठाः सभेयो युवाऽस्य यजमानस्य वीरो जायतां निकामे-निकामे नः पर्जन्यो वर्षतु फलवत्यो नऽओषधयः पच्यन्तां योगक्षेमो नः कल्पताम्॥

- यजुर्वेद २२, मन्त्र २२

अन्ते सम्पादन-पुनर्वीक्षणकर्मसु ये प्रत्यक्षाप्रत्यक्ष-सहायकाः तेषां हार्दं धन्यवादान् ज्ञापयामि।

विद्वच्चरणचञ्चरीकः
झोपाख्यः बिपिनकुमारः।

महाशिवरात्रिः

Since 2009
ISSN- 0976-8645
UGC RN-41039

Subscription ID 221719273, 221497874 Received on- 06/12/2018

# विदुरोपदेशस्य सार्वकालिकत्वम्

एस्. आनन्दतीर्थः
Research Coordinator, Dvaita Philosophy Resource Centre, Department of European Studies, Manipal Academy of Higher Education (MAHE), Manipal 576104

श्रीनिवास कुमारः एन्. आचार्यः
Assistant Professor (Senior Scale) and Centre Coordinator, Dvaita Philosophy Resource Centre, Department of European Studies, Manipal Academy of Higher Education (MAHE), Manipal 576104

-----------------------------------------------------

**प्रमुखशब्दाः** – महाभारतम्, धर्मः, संसारः, सदाचारः

***शोधसारः*** *- महाभारतं सर्वशास्त्राणां सारः । आसारः पुमर्थानाम्। उक्तं च बादरायणेनैव -* ***'धर्मे च अर्थे च कामे च मोक्षे च भरतर्षभ यदिहास्ति तदन्यत्र यन्नेहास्ति न तत् क्वचिदि***[1]*'ति । नात्र संशीतिलेशोऽपि । सहस्राधिकतत्त्वरत्नानि उपदेशरूपेण, क्वचित् संवादव्याजेन च अत्र निरूप्यन्ते । किन्तु तादृशानां तत्त्वानां, उपदेशानां वा सार्वकालिकत्वं वर्तते वा इत्येव विमर्शः । राजनीतिः, समाजविज्ञानम्, जीवनमौल्यादयश्च इदानीन्तनकाले परिवर्तिताः इति तु सुविदित एव विषयः । तथा च तदाधारेणैव प्रवृत्तानां उपदेशानां कथं प्रसक्तत्वं प्रसज्येत? इति हि अर्वाचीनानां अमन्दमतीनां प्रवादः । आम्! समीचीनमिदं चिन्तनम् । परिवर्तितः जनानां जीवनक्रमः । किन्तु जीवनमौल्यमपि परिवर्तितमिति विभ्रम एव । किमिदं जीवनस्य सार्थक्यं, कोऽयमस्य जीवनस्योद्देश इति अर्वाचिनैः विस्मृतं स्यात् । परन्तु महाभारतं भारतीयपरम्परायाः सार्वकालिकं जीवनमौल्यादिकं प्रतिपादयति । न तस्य कालिकपरिमितिः, नापि दैशिका इत्यत एव महाभारतस्य सार्वकालिकत्वम् उद्घोष्यते विद्वत्तल्लजैः । तदत्र महाभारतजलधिगतरत्नराशिषु अन्यतरमिदं 'विदुरनीति' रिति प्रसिद्धोऽयं प्रसङ्गः । कथमिदं 'विदुरनीति'रित्येव प्रथितं विदुरेणोपदिष्टं तत्वजालमस्मिन् काले प्रसक्तं स्यात्? इति निदर्शनमेव अस्य प्रबन्धस्य उद्देशः ।*

***लेखनस्य अपूर्वता- आवश्यकता च ।***

पूर्वोक्तदिशा भारतीयपरम्परा आधुनिकैः बहुधा प्रत्याख्यायते । विशेषतया प्राचीनानां सामाजिकपरिकल्पना अतीवकुत्सिता इति निरूप्यते । अत एव प्राचीनानां सर्वाण्यपि चिन्तनानि अकालकुष्माण्डमिति अपहसन्ति । तन्निराकरणमेवास्य लेखनस्य प्रमुखः लक्ष्यः ।
विदुरनीतिविषये पूर्वमेव बहुधा लिखितं चर्चितञ्च विद्वत्तल्लजैः । शताधिकलेखनानि उपलभ्यन्ते अस्मिन् विषये ।कैश्चन लेखनैः समग्रं महाभारतं विश्लेष्यते । 'विदुरनीतेः' विवरणादिकमपि बहुधा समुपलभ्यन्ते ।Vidura niti wich are the maxims of vidura By Dr sir C P Raamaswamy Aiyar एवं डा. प्रभञ्जनाचार्यैः सम्पादितं 'विदुरनीतिः' इत्यादीनि बहूनि पुस्तकानि, लेखनानि च विदुरोपदेशस्य सारं, विवरणं वा बहुस्वरसतया निरूपयन्ति । Building ethical oragnisation cultures guidline from indian ethos by N.Shivakumar, U.S.Rao. , Ethical and spiritual values books in inadian scriptures By Ved Prakash Bhatia इत्यादिषु च समग्रस्य महाभारतस्य विषये किञ्चिद्विवृतमपि 'विदुरोपदेशस्य सार्वत्रिकत्वम्' इति समुद्दिष्टविषये विभिन्नेन प्रकल्पेन लेखनमत्र प्रारभ्यते । तेन च ऐकाग्र्येण विदुरोपदेशस्य अध्ययनम्, सद्यःकाले तस्य उपायनादीनाञ्च अनुसन्धानं सुकराय भवतीति मे मतिः ।
अत्र ये च आधुनिकप्रकल्पनात् विभिन्नतया प्रकल्प्यन्ते तथाऽपि सद्यःकालीनानां समग्राः समस्याः परिहरन्ति तादृशाः विशिष्टविषयप्रतिपादकाः केचनश्लोकाः एव उदाहृताः।

1म.भा. आदि.- अ-६२, शलो-२६(K.K)



Jahnavi Sanskrit E-Journal (The First Unpaid Sanskrit E-Journal by सारस्वत-निकेतनम्) published by Dr. Bipin Kumar Jha
Avilable at jahnavisanskritejournal.in Issue 36-37 Vol- I Year 10. Date 09 March, 2019 JSEJ/36-37/I/10/2019
Since 2009
ISSN- 0976-8645
UGC RN-41039

**पूर्ववृत्तान्तः-**

उद्योगपर्वणि, प्रजागरपर्व इत्याख्ये उपपर्वणि, ३३ अध्यायतः ४० अध्यायपर्यन्तं (कुम्भकोणीयप्रकाशने) आहत्य अष्टभिरध्यायैरियं आख्यायिका प्रस्तूयते । समयभ्रष्टः दुर्योधनः कृत-अज्ञातवासेभ्यः पाण्डवेभ्यः राज्यं प्रतिदातुं निराकरोत् । युद्धाय कृतनिश्चयानां पाण्डवानां सामर्थ्यं जानात्येव धृतराष्ट्रः । स्वपुत्राणां विनाशं विचिन्त्यैव भीतः धृतराष्ट्रः पाण्डवानां मनोपरिवर्तनाय सञ्जयं प्राहिणोत् । पाण्डवानभ्येत्य तदिङ्गितमनुज्ञातः सञ्जयः रात्रौ प्रतिनिवृत्तवान् । धृतराष्ट्रम् अभिवन्द्य युधिष्ठिरकृतकुशलप्रश्नादिकं सर्वं न्यवेदयत् ।ततश्च "**अनुज्ञातो रथवेगावधूतः श्रान्तोऽभिपद्ये शयनं नृसिंह । प्रातः श्रोतारः कुरवः सभायामजातशत्रोर्वचनं समेताः ॥**[2]" इति युद्धविषये युधिष्ठिरादीनामभिप्रायं परेऽहनि सभायामेव वक्ष्यामि इति निवेद्य निरगच्छत् ।
किन्तु चिन्ताक्रान्तः धृतराष्ट्रः प्रजागरमाप्नोत् । स च द्वाःस्थेन दीर्घदर्शिनम्,प्राज्ञं विदुरमानयत् । आगतश्च विदुरः चिन्तयानं धृतराष्ट्रं प्रति बहुधा उपादिशत् । स एवात्र 'विदुरनीतिः' 'विदुरोपदेशः' इति वा प्रथितः ।

**वक्तृ-श्रोतृपरिचयः-**

उपदेष्टा विदुरस्तु यमस्य अवतारभूतः[3] । अणिमाण्डव्यमहर्षेः शापात् दासीपुत्रत्वमवाप[4] । भगवता बादरायणेन दास्या जातोऽयं धृतराष्ट्रस्य अनुजः । व्यासमहर्षिणा नियोगक्रमेण प्राप्तजन्मः धृतराष्ट्रः कश्चित् 'धृतराष्ट्रनामकः गन्धर्वः[5], विशेषतया मुख्यप्राणेन आविष्टः । अत एव नायं संवादः केवलं व्यावहारिकालापः, अपि तु संवादव्याजेन प्रस्तुतः प्राज्ञानां देवानां उपदेशः । अस्त्येवास्य सार्वत्रिकं मान्यत्वम् ।

**विदुरोपदेशः-**

अष्टस्वध्यायेषु आहत्य ५७७ श्लोकेषु विदुर-धृतराष्ट्रयोस्संवादः निरूप्यते ।"**श्रोतुमिच्छामि ते धर्म्यं परं नैश्रेयसं वचः...** [6]" इति धृतराष्ट्रेण पृष्टः विदुरः बहून् राजधर्मान्, जीवनौपायिकानि तत्त्वान्यपि उपदिदेश । अत्रस्थं प्रतिश्लोकमपि बह्वर्थगर्भितं, बहुनीतियुक्तम् ।तत्र कानिचन वाक्यान्येव विमर्शयामः ।
अत्र च विभागद्वयेन निरूपयिष्यते ।

1. **राजनीतिः** (Politics)
2. **व्यक्तित्वविकसनम्** (Personality Devolepment) इति.

व्यक्तित्वविकसनञ्चापि-

अ) **लोकोपकारकव्यक्तित्वम्** ।

आ) **आत्मौन्नत्यकारकव्यक्तित्वम्** ।

इति द्विधा वक्तुं शक्यते । एतेषु विषयेषु अत्युपयुक्तानि हितवचनानि 'विदुरोपदेशे' न्यरूपिषत । तत्किञ्चिदत्र विचारयामः ।

**राजनितिः-**

वस्तुतः प्राचीनभारतस्य, अर्वाचीनस्य च राजनितिः अत्यन्तभिन्ना एव । राज्ञा शास्यमानस्य प्राचीनभारतस्य , प्रजाप्रभुत्वयुक्तस्य अर्वाचीनभारतस्य च परिकल्पनमेव विभिन्नम् । अत एव नात्रोक्तं सर्वमपि वचनं इदानीन्तनायां राजनीत्यां अन्वेति । तथाऽपि उभयत्राऽपि सामान्याः सर्वदा अन्वेतुं योग्याः केचन विषयाः निरूप्यन्ते । तादृशेषु सार्वत्रिकमौल्ययुक्तेषु वचनेषु काञ्चन विषयान् अत्र पश्यामः ।

**१. राज्ञः कीदृशः सहायकः स्यात् ?**

**यो हि धर्मं समाश्रित्य हित्वा भर्तुः प्रियाप्रिये ।**
**अप्रियाण्याह पथ्यानि तेन राजा सहायवान्**[7] ॥

बह्वत्र पार्षदाः अपथ्यानपि प्रियकरानेव विषयान् प्रब्रुवन्ति । यश्च धर्मपरः, क्षेमकरः अप्रियवादी स कदापि भर्तुः आत्मीयत्वेन परिगण्यते । प्रायः सर्वत्र मन्त्रिणां, अधिकारिणां वा ईदृशः स्वभावः तेषां अधःपतनाय निमित्तं स्यात् । एषः स्वभावः सर्वाथा

2 म.भा. उद्योग. अ-३२, श्लो-३९(K.K)
3 **तस्यां स देवोऽजनि धर्मराजो माण्डव्यशापात् स उवाह शूद्रताम्**। -म.भा.ता.नि. अ-११ , श्लो-१३८
4 म.भा.ता.नि. अ-११, श्लो-१३९-१४१
5 **अभूच्च तस्यां धृतराष्ट्रनामको गन्धर्वराट् पवनावेशयुक्तः...**। -म.भा.ता.नि. अ-११ , श्लो-१३२
6 म.भा. उद्योग. अ-३३, श्लो-१६(K.K)
7 म.भा. उद्योग. अ-३७, श्लो-१६(K.K)

Jahnavi Sanskrit E-Journal (The First Unpaid Sanskrit E-Journal by सारस्वत-निकेतनम्) published by Dr. Bipin Kumar Jha
Avilable at jahnavisanskritejournal.in Issue 36-37 Vol- I Year 10. Date 09 March, 2019 JSEJ/36-37/I/10/2019
Since 2009
ISSN- 0976-8645
UGC RN-41039

त्याज्यः इति विदुरः उपदिशत्यत्र।

'स एव सहायवान् भवितुं योग्यः, यश्च धर्ममेव वदति। स एव सहायवान् यश्च भ्रर्तुः अप्रियमपि पथ्यमेव वदति। तादृशमेव सहायकं, परिचारकं वा पार्षदत्वेन स्वीकर्तव्यम् ।' इत्येवास्य शलोकस्य तात्पर्यार्थः।

इदं च सार्वकालिकं नीतिवचनम् । प्रायः बहूनां अधिकारिणां सामान्यः दोषोऽयम् । न केवलमिदं राजसम्बन्धिहितवचनम् । मन्त्रिभ्यः अधिकारिभ्यः अथवा प्रजेभ्यः सर्वेभ्यश्च अनुसरणीयः क्रमः अत्र विदुरेण निरूपितः।

**२. राष्ट्ररक्षणस्यैव आद्यता -**

**त्यजेत् कुलार्थे पुरुषं ग्रामस्यार्थे कुलं त्यजेत्।**
**ग्रामं जनपदस्यार्थे आत्मार्थे पृथिवीं त्यजेत्**[8] **॥**

'यदि नरेणैकेन कुलमेव नश्यति तर्हि कुलस्य रक्षणार्थं तादृशं मनुष्यमेव त्यजेत्। यदि च एकेन कुलेन ग्राम एव नश्यति चेत् तादृशं कुलमेव त्यजेत् । एवमेव देशस्य रक्षणार्थं ग्राममपि त्यजेत् । एवं आत्मनः कल्याणार्थं सर्वां पृथिवीमेव त्यजेत् ।' - इति अस्याभिप्रायः।

प्रायः बहु जटिलोयं विषयः। एतादृशी जटिलावस्था बहुधा अनुभूयते सर्वैरपि । किन्तु एषा अस्माकं भारतीयानां प्राचीना संस्कृतिः । न सर्वथा हिंसात्यागः विधीयतेऽत्र । तीव्रतरहिंसानिवारणार्थं अल्पहिंसा युक्ता एव। दृढतरस्य रुग्णस्य परिहारार्थं किञ्चित् कष्टजनकं अङ्गच्छेदनादिकं विहितं खलु । तथा च अनेनैव न्यायेन राष्ट्रस्य संरक्षणार्थं केषाञ्चन जनानां निर्बन्धनं करणीयमेव।

प्रकृते तु मावोवादिनां देशद्रोहिनां च बन्धनादिकं मानवतावादस्य विरोधीति निमित्तीकृत्य सर्वत्र विरुध्यते । अथवा केषाञ्चन परदेशीयानां अक्रमेण आगमनेन देशस्य स्वास्थ्यरक्षणं दुष्करं भवतीति तादृशानां निर्बन्धनं क्रियते चेदपि कतिपयैः विरोधः भवति। किन्तु राष्ट्ररक्षणस्यैव आद्यता स्यात्। तदर्थं देशद्रोहीनां केषाञ्चन जनानां, कतिपयकुलानां वा निग्रहः न दोषाय कल्पते।

**'आत्मार्थे पृथिवीं त्यजेत्'** इत्यस्य आन्तर्यं न स्फुटति। आत्मार्थं सर्वं नाम कुल-ग्राम-देशादिकं सर्वमपि त्यजेदित्युक्त्वा, 'त्यजेदेकं कुलस्यार्थे..' इत्यादिषु च चिन्तनोदारतां प्रदर्श्य अत्र च स्वार्थभावः प्रदर्शित इति भाति । किन्तु नेदमस्यान्तर्यम् । अत्र आत्मा नाम न जीवः, अपि तु परमात्मा । परमात्मा च सर्वस्य कर्ता । " **तेन त्यक्तेन भुञ्जीथाः**[9]**..**" इति ईशावास्योपनिषदुक्तरीत्या परमात्मना दातमेव सर्वं अस्माभिः भुज्यते। अतः जगत्यस्मिन् परमात्मन एव आद्यता । तथा च कुलादिकं महत्तरमिति चेत्, परमात्मा महत्तमः । अतः परमात्मार्थे सर्वमपि त्यजेदित्युक्तम्।

इत्येवं समाजेऽस्मिन् कस्य प्रामुख्यं स्यात् इति सुस्पष्टं निरूपितमत्र।

**३. धर्ममार्गेणैव स्थानं धनञ्च आर्जयेत् -**

**धर्मेण राज्यं विन्देत धर्मेण परिपालयेत्।**
**धर्ममूलां श्रियं प्राप्य न जहाति न हीयते** [10] **॥**

अत्यावश्यकमिदं हितवचनम् आधुनिकराजकीयजनेभ्यः । राज्यप्राप्त्यर्थं, स्थानप्राप्त्यर्थं वा कीदृशमपि अधर्माचरणं कर्तुमुत्सहन्ते सद्यःकालीनाः। प्राप्तस्यापि राज्यस्य, स्थानस्य वा परिपालनेऽपि धर्मं नानुसरन्ति । अधर्मेण हि धनं सम्पाद्यते। अल्पकाले एव सर्वमपि विनश्य भृष्यति एव । किन्तु यदस्माभिः सम्पाद्यते स्थानं वा धनं वा तत्सर्वं शाश्वतं स्यादिति चेत् धर्ममार्गेणैव सम्पादितव्यम् । तादृशं च स्थानं, धनं कदापि न हीयते इति सार्वत्रिकं नीतिवचनमिदम्।

**४. करसङ्ग्रहस्य नियमः-**

केन प्रकारेण करः सङ्ग्रहणीय इत्यपि सुष्टु निरूप्यतेऽत्र।

**यथा मधु समाधत्ते रक्षन्पुष्पाणि षट्पदः।**
**तद्वदर्थान् मनुष्येभ्य आदद्यादविहिंसया**[11] **॥**

सद्यःकाले कालधनस्य विषयः बहुचर्चितो वर्तते । अत्यधिककरसङ्ग्रह एवास्य मुख्योपपत्तिरिति बहूनामाशयः । सत्यमेव! सम्पादिते धने ३० प्रतिशतादधिकं करत्वेन दातव्यमिति चेत् दुष्कर एव विषयः। अत एव बहवः करान् अदत्वैव अक्रमेण धनं

8 म.भा. उद्योग. अ-३७, श्लो-१७(K.K)

9 ई. उ. १

10 म.भा. उद्योग. अ-३४, श्लो-३२(K.K)

11 म.भा. उद्योग. अ-३४, श्लो-१७(K.K)



Jahnavi Sanskrit E-Journal (The First Unpaid Sanskrit E-Journal by सारस्वत-निकेतनम्) published by Dr. Bipin Kumar Jha
Avilable at jahnavisanskritejournal.in Issue 36-37 Vol- I Year 10. Date 09 March, 2019 JSEJ/36-37/I/10/2019
Since 2009
ISSN- 0976-8645
UGC RN-41039

सङ्ग्रहन्ति । तन्निवारणार्थं प्रजानां दुर्धरः यथा न स्यात् तथैव करः सङ्ग्रहणीयः । यथा च षट्पदः पुष्पाणि रक्षन्नेव मधु ग्रसति तथा प्रजाभ्यः अविहिंसया एव अर्थान् (करान्) स्वीकरणीयमिति बहुस्वरसं निदर्शितमत्र । तेन च अक्रमेण धनसङ्ग्रहादिकं निवारयितुं शक्यते।

एतादृशाः बहूक्तयः आधुनिकानां अधिकारिणां, राजकीयजनानां वा मार्गप्रदर्शकाः सन्ति । अत्रोक्तानां सर्वेषामपि अनुसन्धानेन नूनमस्माकं भरतभूमिः रामराज्यं भवतीत्यत्र न संशयलेशोऽपि।

**व्यक्तित्वविकसनम् -**

व्यक्तित्वं नाम न केवलाः स्वविकसनकारकप्रवृत्तयः। द्विविधा च प्रवृत्तिः आवश्यकी। आत्मौन्नत्यकारकाः प्रवृत्तयः । लोकहितकराश्चेति । समाजस्वास्थ्यरक्षणार्थं द्विविधाऽपि प्रवृत्तिरावश्यकी । तद्विषयेऽत्र किमुक्तमिति केनचिद्वचनेन विचारयामः।

**अ) सामाजिकसास्वस्थ्यकारकाः प्रवृत्तयः -**

**१. सत्य-धर्मादीनां स्वरूपम् -**

**न सा सभा यत्र न सन्ति वृद्धा**
**न ते वृद्धा ये न वदन्ति धर्मम्।**
**नासौ धर्मो यत्र न सत्यमस्ति**
**न तत् सत्यं यच्छलेनाभ्युपेतम्**[12] **॥**

सभापर्वणि वस्त्रापहरणप्रसङ्गे द्रौपद्याः वचनत्वेनापि अयमेव शलोकः पठ्यते । अतिगहनोऽयं विचारः ।अद्यतनदिनेषु वृद्धाः नाद्रियन्ते । तेषां वचनं न हितकराय भवतीति बह्वत्र युवजनैः वद्धाः उपेक्ष्यन्ते एव। किन्तु विदुरो वदति 'न सा सभा यत्र वृद्धाः न सन्ति' इति । न केवलं वयोवृद्धा अपि तु ज्ञानवृद्धाः । वृद्धाः सन्तीत्येव न तस्याः सभायाः मान्यता। अपि तु ते वृद्धाः धर्मवादिनः भवेयुः । धर्मः नाम न कवलं शास्त्रवचनादिकं । सत्ययुक्तः धर्मः एव धर्म इति कथ्यते । सत्यं नाम न केवलं यथार्थकथनम् । छलेनयुक्तं यथार्थकथनमपि सत्यत्वेन न परिगण्यते। अतः छलादिरहितसत्ययुक्तं धर्मं ये वदन्ति, पालयन्ति च तादृशाः वृद्धाः यत्र वर्तन्ते सा एव सभा इति परिगण्यते।

सद्यःकाले तु सत्यस्य व्याजेन, धर्मव्याजेन वा अधर्माचरणं दरीदृश्यते। न तत् साधु इति ज्ञातेऽपि न्याययुक्तं वा न वा इति बहुभिः सज्जनैः सन्दिह्यते। किन्तु अत्र विदुरः स्पष्टयति - कापट्यरहित एव यथार्थः सत्यमित्युच्यते । तद्युक्तो हि धर्मः । धर्मवाचकवृद्धैः परिभूषिता एव सभा इति मान्यते। इति न्यायव्याजेन, सत्यव्याजेन च अधर्माचरणं सर्वदा न युक्तमिति अत्र स्फुटीभवति।

**२. सुखस्य सोपानं किम्?**

**एकया द्वे विनिश्चित्य त्रींश्चतुर्भिर्वशे कुरु।**
**पञ्च जित्वा विदित्वा षट् सप्त हित्वा सुखी भव**[13] **॥**

प्रहेलिकशैल्या श्लोकेऽस्मिन् बह्वर्थगर्भितं विषयं ज्ञापयति -

"एकया (बुद्ध्या) द्वे (कर्तव्यं वा अकर्तव्यमिति) विनिश्चित्य चतुर्भिः (साम-दान-भेद-दण्डैः) त्रीन् (शत्रुं, मित्रं उदासीनञ्च) वशे कुरु । पञ्च (पञ्चेन्द्रियान्) जित्वा षट् (सन्धि-विग्रह-यान-आसन-द्वैधीभावरूपान् गुणान् ) विदित्वा सप्त (स्त्री-द्यूत-मृग-मद्य-कठोरवचन-दण्डनकठोरताः एवं अन्यायेन धनसम्पादनम् इति एतान्) हित्वा सुखी भव" इति अस्य फलितार्थः।

वस्तुतः इदं राज्ञां कृते उपदिष्टं नीतिवचनम्। किन्तु जनसामान्यं प्रत्यपि हितवचनमिति ज्ञातुं शक्यते । 'सुखं मे स्यात् , दुःखं मनागपि मा भूदि'ति समेषां आशयः। किन्तु तस्याऽऽर्जनं कथमिति न जानन्ति। केवलेन धनाऽऽर्जनेन, भोगेनैव सुखं प्राप्नुयादिति भ्रमन्ति । किन्तु अत्रोक्तदिशा इन्द्रियनिग्रहादिना, दुर्गुणत्वेन परिगणितानां परस्त्रीगमनादीनां त्यगेन च सुखं प्राप्तुं शक्यते इति अर्वाचीनयुवजनेभ्य अत्युपयुक्तं नीतिवचनमिदम्।

**३. द्यूतस्य हानिकारकत्वम् -**

**द्यूतमेतत् पुरा कल्पे दृष्टं वैरकरं नृणाम्।**
**तस्माद्द्यूतं न सेवेत हास्यार्थमपि बुद्धिमान्**[14] **॥**

अद्यतनदिनेषु नैकविधाः द्यूताः प्रवर्तितास्सन्ति । द्यूतेनैव बहूनां संसारः विनष्टः इति प्रत्यहं श्रूयते । मुख्यतया द्यूतेन नृणां वैरः जायते । तेन वैरेण च

12 म.भा. उद्योग. अ-३५, श्लो-७०(K.K)

13 म.भा. उद्योग. अ-३३, श्लो-५१(K.K)

14 म.भा. उद्योग. अ-३७, श्लो-१९(K.K)

Jahnavi Sanskrit E-Journal (The First Unpaid Sanskrit E-Journal by सारस्वत-निकेतनम्) published by Dr. Bipin Kumar Jha
Avilable at jahnavisanskritejournal.in Issue 36-37 Vol- I Year 10. Date 09 March, 2019 JSEJ/36-37/I/10/2019
Since 2009
ISSN- 0976-8645
UGC RN-41039

अन्याः सर्वाः समस्याः प्रजायन्ते । अतः 'न केवलं फणार्थं, अपि तु हास्यार्थमपि प्राज्ञः द्यूतं न सेवेत' इति प्रत्यादिशत्यत्र ।
प्रायः पुर्वोदाहृताः सर्वे श्लोकाः सामाजिकस्वास्थ्यजनकनीतिपराः एव । अतः इमान् सर्वान् **'समाजविज्ञानम्'** इत्यपि वक्तुं शक्यन्ते ।
पूर्वोक्तैः प्रवृत्तिभिः आत्मौन्नत्यमपि स्यात् । परन्तु प्रधानतया सांसर्गिकस्वास्थ्यरक्षण एव प्रमुखः उद्देशः । अत एव इदं 'समाजविज्ञानम्' इति प्रथितम् ।
काश्चनप्रवृत्तयस्तु आत्मौन्नत्यजनकाः एव । तद्विषयेऽपि किमुक्तमत्रेति पश्यामः -

**आ) आत्मौन्नत्यकारकाः प्रवृत्तयः-**

१. विदुरस्य प्रथमं वचनमिदम् बह्वर्थगर्भितं, अत्युपयुक्तञ्च ।
**अभियुक्तं बलवता दुर्बलं हीनसाधनम् ।**
**हृतस्वं कामिनं चोरमाविशन्ति प्रजागराः[15] ॥**
धृतराष्ट्रस्य जागरितत्वस्य निमित्तं विमृश्य विदुरेणोक्तमिदं वचनम् । इदानीन्तनकाले सामान्यतः सर्वे रुधिरपीडा(blood pressure)-निद्राहीनतादिरोगैः पीडिताः एव भवन्ति । किमत्र प्रधानं निदानमिति न केनाऽपि विमर्श्यते । न केवलमत्र भौतिकं कारणं वर्तते किन्तु मानसिककारणमेव प्रधानं भवति । कानि च तानि इति प्रवदति विदुरः ।

- केनाऽपि बलवता विरोधः जातश्चेत् तच्चिन्तायां निद्राभावः भवति ।
- अथवा दुर्व्यसनवान् चेत् तस्य निद्रा न जायते ।
- दुर्बलस्यापि निद्राभावः स्यात् ।
- यश्च साधनहीनः सोऽपि निद्राहीनो भवितुमर्हति ।
- कस्य च सर्वमपि हृतं सः न सुखेन शेते ।
- कश्च प्रबलतया कामेन तप्तः तस्याऽपि निद्राभावः बाधते ।
- धनापहारी (चोरः) अपि प्रजागरः एव ।

इत्येतादृशाः विषयाः निद्राहीनतायाः प्रमुखकारणानि भवन्ति । एते एव मनःशान्तिविघटकाः इति विदुरः उपदिशति ।

२. **आत्मनः नाशकारणानि-**

**त्रिविधं नरकस्येह द्वारं नाशनमात्मनः ।**
**कामः क्रोधः तथा लोभः तस्मात् एतत्त्रयं त्यजेत्[16] ॥**
जीवनेऽस्मिन् दुःखस्य कारणीभूताः स्वभावाः के इति अत्र निर्वक्ति । कामः,क्रोधः लोभश्च आत्मनः नरकस्य द्वारं इति प्रतिपादयति विदुरः । एतत्त्रयमेव सर्वेषां अनर्थानां मूलकारणम् । कामेन हि क्रोध-लोभादीनां उद्भवः । तेनैव च सर्वानर्थाः इति न केवलं कौरवाणां कथा, सर्वेषां च अनुभववेद्यः । अतः प्राथम्येन एतत् त्रयं त्यजेदिति विदुरस्य हितवचनम् ।

३. **जीवनेऽस्मिन् अनुसरणीयाः गुणाः -**
उद्योगपर्वणि त्रयस्त्रिंशाध्याये २१ श्लोकतः ३७ श्लोकपर्यन्तं 'स पण्डित उच्यते' इति प्राज्ञानां स्वभावः निरूप्यते । तद्व्याजेन च सज्जनैः कीदृशाः गुणाः संयोज्याः इति उपदिशति । तत्रस्थाः केचन श्लोकाः अत्र पठ्यन्ते ।
**क्रोधो हर्षश्च दर्पश्च ह्रीः स्तम्भो मान्यमानिता ।**
**यमर्थान्नापकर्षन्ति स वै पण्डित उच्यते[17] ॥**
जीवमात्रस्य क्रोधादिदोषाः वर्तन्ते एव । ऋते नारायणं, न कोऽपि निर्दुष्टः जगत्यस्मिन् वर्तते । किञ्चित् क्रोधादयोऽपि आवश्यकाः त्रैगुण्येऽस्मिन् प्रपञ्चे । किन्तु क्रोधादयोऽपि नियन्त्रितव्या एव । कियदिति चेदुच्यतेऽत्र । 'क्रोधः, हर्षः, दर्पः, ह्रीः(लज्जा), स्तम्भः (उद्दण्डता), मान्यमानित्वम् (आत्मानं पूज्यमिति मानित्वम्) एतैश्च गुणैः यः पुरुषार्थेन न भ्रश्यते चेदयमेव पण्डितः इति उच्यते' इति । तथा च पूर्वोक्तदिशा क्रोधादयः सर्वथा त्याज्या एव । किन्तु न शक्यते सर्वथा त्यक्तुम् । अतः परिमितक्रोधादयः सह्याः भवन्ति । यस्य च क्रोधादयः तं पुरुषार्थेन नापकर्षन्ति तादृशपरिमिताः क्रोधादयः सह्याः इति फलितोऽर्थः ।
अत्र च ह्रीहर्षौ उल्लिख्यितौ । न तौ दोषत्वेन परिगणितौ । परन्तु कदाचित् अपरिमितेन हर्षेण, लज्जया वा जीवनस्य मूललक्ष्य एव भ्रष्टः स्यात् । तादृशहर्षादयोऽपि नियन्त्रितव्याः एवेत्यस्याभिप्रायः।

15 म.भा. उद्योग. अ-३३, श्लो-१४(K.K)

16 म.भा. उद्योग. अ-३३, श्लो-७३(K.K)
17 म.भा. उद्योग. अ-३३, श्लो-२४(K.K)



Jahnavi Sanskrit E-Journal (The First Unpaid Sanskrit E-Journal by सारस्वत-निकेतनम्) published by Dr. Bipin Kumar Jha
Avilable at jahnavisanskritejournal.in Issue 36-37 Vol- I Year 10. Date 09 March, 2019 JSEJ/36-37/I/10/2019
Since 2009
ISSN- 0976-8645
UGC RN-41039

४. **स्थितप्रज्ञा च प्राज्ञानां लक्षणम् -**
**नाप्राप्यमभिवाञ्छन्ति नष्टं नेच्छन्ति शोचितुम् ।**
**आपत्सु च न मुह्यन्ति नराः पण्डितबुद्धयः[18] ॥**
संसारेऽस्मिन् प्रायः सर्वेऽपि यदा कदाऽपि आभीष्टमप्राप्य हताशाः स्युः । अथवा प्राप्तानां नाशेन च दुःखिताः भवन्ति । नैततसर्वं पण्डितानां लक्षणं । ये तु प्राप्तुमयोग्यान्, दुर्लभान् न कामयन्ति, नष्टानां भोग्यानां विषये न शोचन्ति । ये आपत्काले न बिभ्यति च । ते एव पण्डितबुद्धयः इति स्थितप्रज्ञायाः आवश्यकत्वं एवं रीत्या निरूप्यते ।

५. **क्षमायाः महत्त्वम्-**
**एकः क्षमवतां दोषो द्वितीयो नोपपद्यते ।**
**यदेनं क्षमया युक्तं अशक्तं मन्यते जनः ॥**
**सोऽस्य दोषो न मन्तव्यः क्षमा हि परमं बलम् ।**
**क्षमा गुणो ह्यशक्तानां शक्तानां भूषणं क्षमा[19] ॥**
क्षमागुणस्य महत्वमत्र प्रतिपाद्यते । क्षमा न दोषः किन्तु परमं बलमिति विदुरस्याशयः । कुत इति चेत्, बह्वत्र क्षमया कलहः निरुद्ध्यते । अत अशक्तस्य च क्षमा गुणो भवति । यदि शक्तोऽपि क्षमावान् तस्यापि भूषणा भवति क्षमा । अतः सर्वथा अनुकरणीयः गुणः क्षमा ।
किन्तु क्षमायाः एक एव दोष इव प्रतिभातीति विदुरो भणति । क्षमया युक्तं पुरुषं जनाः अशक्तमिति मन्यन्ते । अतः क्षमा न न्यूनता किन्तु गुणः इति यथा स्यात् तथा अनुसन्धेया इत्यस्य श्लोकद्वयस्य आन्तर्यम् ।

६. **पुरुषस्य दीप्यमानाः गुणाः-**
**अष्टौ गुणाः पुरुषं दीपयन्ति प्रज्ञा च कौल्यं च दमः श्रुतं च ।**
**पराक्रमश्चाबहुभाषिता च दानं यथाशक्ति कृतज्ञता च[20] ॥**

18 म.भा. उद्योग. अ-३३, श्लो-३०(K.K)
19 म.भा. उद्योग. अ-३३, श्लो-५५-५६(K.K)
20 म.भा. उद्योग. अ-३३, श्लो-१०६(K.K)

**सङ्क्षेपाक्षरसूची**

म.भा. - महाभारतम्
म.भा.ता.नि. - महाभारततात्पर्यनिर्णयः
म.भा. आदि - महाभारते आदिपर्व
म.भा.उद्योग. - महाभारते उद्योगपर्व
ई.उ. - ईशावास्योपनिषत्

अनुसन्धीयमानाः गुणाः के इति अत्र सुविवियन्ते । 'प्रज्ञा, कुलीनत्वम्, इन्द्रियनिग्रहः, शास्त्रज्ञानम्, पराक्रमः, अल्पभाषित्वम्, शक्त्यनुसारं दानम्, कृतज्ञता च एते च गुणाः पुरुषं भूषयन्ति । अतः एते च अवश्यं अनुसरणीयाः गुणाः इति विदुरः उपदिशति ।
एवमेव सज्जनैः अनुसन्धीयमानाः गुणाः के ? शील-वृत्तादीनां महत्त्वं किम् ? इत्यादीन् बहून् अत्युपयुक्तान् आत्मौन्नत्यकरान् विषयान् विदुरः उपादिशत् । ते सर्वेऽपि सार्वकालिकमौल्ययुक्ताः इदनीन्तनानामपि युवजनानां अनुसरणीयाः सद्गुणाः इति तु निश्चप्रचम् ।

**सुकृतार्थाः -**

प्रबन्धस्यास्य सुकृतार्थाः -

१. भरतखण्डस्य प्रथमः अद्वितीयोऽप्रमितासग्रन्थः सर्वतोऽपि महत्तरः, महार्थभरश्च महाभारतमिति अन्वर्थं नाम धत्ते । अस्य च तथ्यता प्रदर्शनम् ।
२. पञ्चसहस्राधिकवर्षप्राचीनतमस्यास्य ग्रन्थस्य प्रकृते उपयोगिता नास्तीति अर्वाचीनानां बहूनां पण्डितं मन्यमानानां बक्कनम् । निदर्शनपुर्वकमेव तेषां भ्रमनिरसनम् ।
३. अत्र विदुरेणोऽक्तं सर्वमपि शुभाषितप्रायं, सार्वत्रिकं, सर्वोपकारकं नीतिवचनम् । सद्यःकालीनानां बहूनां सामाजिकसमस्यानां परिहारः अत्र वर्तते । तत्कथमिति प्रदर्शनम् ।
४. सामाजिकस्वास्थ्यरक्षणे प्राचीनानां भारतीयानां परिकल्पनैव नास्तीति बहवः भ्रमन्ति । न केवलं तन्निराकरणपूर्वकं प्राचीनभारतीयानां दूरदर्शित्वस्य प्रदर्शनम् अस्य उद्देशः । अपि तु प्राचीनानां प्रकल्पनेनैव आधुनिकसमस्यानां परिहारः स्यादिति, तस्य आवश्यकत्वप्रतिपादनम् ।
इत्येवं धृतराष्ट्रं निमित्तीकृत्य विदुरेणोपदिष्टं सर्वमपि वचनं बह्वर्थगर्भितं, सकलसज्जनानां कृते अनुकरणीयं नीतिवचनम् । परिमितावकाशे , परिमितवचनैः तत्सर्वं निरूपयितुं न शक्यते इति सुविदितमेव । कथञ्च इमानि वचनानि मननीयानि इति निदेशनार्थं कानिचन वचनान्येव अत्र

उदाहृतानि । एतत्क्रमेण विदुरोपदेशस्य अध्ययने कृते सद्यःकालीनोपयुक्तानि सर्वाण्यपि शास्त्राणि अनुसन्धातुं शक्यन्ते । विशेषतया राजकीयजनैः, युवजनैश्च अनुसन्धीयमानगुणाः बहुधा सुविवृतमत्र इति अस्य "विदुरोपदेशस्य" सार्वकालिकं औन्नत्यं स्फुटति ।

एवं च सार्थकोक्तिरियं या व्यासमहर्षिणोऽक्ता **"यदिहास्ति तदन्यत्र यन्नेहास्ति न तत् क्वचित्"** ।

## सन्दर्भग्रन्थसूची

**1.श्रीमन्महाभारतम्** , टि.आर्.कृष्णाचार्यः,टि.आर्.व्यासाचार्यः - निर्णयसागरप्रेस् - मुम्बई -१९०९

**2.श्रीमद्भागवतम् ,** विद्वान् पि.एस्.शेषगिरि आचार्यः - श्रीपेजावर अधोक्षजमठः - उडुपि - २००२

**3.श्रीमन्महाभारततात्पर्यनिर्णयः** - डा.बन्नञ्जे गोविन्द आचार्यः - तत्त्वसंशोधनसंसत् - उडुपि - २००९

**4.श्रीमद्भागवततात्पर्यनिर्णयः** डा.व्यासनकेरे प्रभञ्जनाचार्यः श्रीव्यासमध्वप्रतिष्ठानम् - बेङ्गळूरु - १९९९

**5. विदुरनीतिः** डा.व्यासनकेरे प्रभञ्जनाचार्यः - श्रीव्यासमध्वप्रतिष्ठानम् - बेङ्गळूरु - १९९९

**6. Viduraniiti** Dr Sir C P Raamaswamy Aiyar Book Source: Digital Library of India Item 2015.368603, Publication date 1955

**7. Ethical and Spiritual Values in Indian Scriptures,** Ved Prakash Bhatia, Publication: Notion Press-2016

**8.Management Insights from Motivational Slokas,** Karanam Nagaraja Rao, Bharathi Devarakonda

**9. Good Governance and Ancient Sanskrit Literature,** Aruna Goel

**10. Social & Political Implications of Concepts of Justice & Dharm,** Ashok S. Chousalkar

**12. "Vidura" The ancient management guru,** Bhandarge Santosh kumar and six scholars

**13. Neeti shashtra of sage Vidura**, Dr. Narinder Sharma

**Journals-**

**1. Mahābhārata Verses in Cāṇakya's Compendia** Ludwik Sternbach, *Journal of the American Oriental Society*, Vol. 83, No. 1 (Jan. - Mar., 1963), pp. 30-67

**2.***Sadācāra-śāstra,* Devadatta Śāstrī , *Journal of the American Oriental Society*, Vol. 88, No. 2 (Apr. - Jun., 1968), p. 377

**3. Building ethical organisation cultures – Guidelines from Indian ethos,** .N. Sivakumar, U.S. Rao, Int. J. Indian Culture and Business Management, Vol. 2, No. 4, 2009



Jahnavi Sanskrit E-Journal (The First Unpaid Sanskrit E-Journal by सारस्वत-निकेतनम्) published by Dr. Bipin Kumar Jha
Avilable at jahnavisanskritejournal.in Issue 36-37 Vol- I Year 10. Date 09 March, 2019 JSEJ/36-37/I/10/2019
Since 2009
ISSN- 0976-8645
UGC RN-41039

**Subscription ID 235108668 Received on- 19/01/2019**

## वचनान्तस्तत्त्वं तदाधृतस्साहित्यशास्त्रीयसन्दर्भश्च

**नारायणदत्तमिश्रः ,**
अतिथिप्राध्यापकश्शोधार्थी च
संस्कृतप्राच्यविद्याऽध्ययनसंस्थानम्, जे.एन्.यू.,नवदेहली

-----------------------------------------------------------

**प्रमुखशब्दाः** – वचनम्, परिभाषा, व्याकरणम्।

**शोधसारः** –*शब्दशास्त्रे विविधपदविमर्शक्रमे वचनसङ्ख्यादीनां विमर्शः स्वाभाविक इति। अत्र शोधपत्रे विवधसहित्योपस्थापनपुरस्सरं वचनसन्दर्भितः विमर्शः उपस्थापितः वर्त्तते।*

वच परिभाषणे[21] इत्यर्थकाद् धातोर्ल्युटि सति वचनशब्दसिद्धिः। एवं वचनस्यार्थः उच्चारणम्, कथनमात्रं सङ्ख्या च। यद्यपि साङ्ख्यम्, परिसङ्ख्या चेति पदद्वयं साङ्ख्यमीमांसाशास्त्रानुसारेण कथञ्चिद् निवृत्त्यर्थवत्त्वाद् बुद्धिरूपमर्थमेव प्रकटयति तथाऽपि न्यायादिग्रन्थानुसारेण गुणाख्यपदार्थान्तःपरिगणिता सङ्ख्यैकत्वादिव्यवहारहेतुरूपैवोक्ता।[22] व्याकरणानुसारेण तु **प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा**[23] इत्यादिसूत्रवपुषा वचनं सङ्ख्या च समानार्थत्वमेव धत्तः। तस्मादेव **बहुत्वसङ्ख्या वाच्यत्वेन विधीयते,**[24] **प्रोच्यते वचनं सङ्ख्या तथैकवचनादिकम्,**[25] इत्यादिकं बहुधा व्याख्यायितञ्जातम्। **चक्षिङ् व्यक्तायां वाचि**[26] इत्यर्थकाद् धातोः **चक्षिङः ख्याञ्**[27] सूत्रेणैतेन ख्याञित्यादेशे सति समुपसर्गपूर्वकस्य सङ्ख्याशब्दस्यार्थोऽपि वचनमात्रत्वेनैव साधितो दृश्यते। तत एवैकत्वद्वित्वबहुत्वबोधकत्वेन स्वौजसादीनामेकवचनद्विवचनबहुवचनरूपाः सञ्ज्ञाः। एतादृशवचनभेदस्थितौ नमः, भूयः इत्याद्यव्ययपदानाम् अव्ययत्वात् सर्वदा समत्वकारणात् स्वादीनां च लुक्त्वादपि बहुवचने भूयांसि, नमांसि इत्येतादृशाः प्रयोगाः कथम्? किमेते साधवोऽसाधवो वा ? अथ **पृषोदरादीनि यथोपदिष्टम्,**[28] वेदाः प्रमाणम्, भूयः प्रयोजनानि, भवन्तः पुरस्कारभाजनानि, भवान्नेतस्य पात्रम्, अन्यत्र त्वादरार्थेऽपि मम गुरुचरणाः, अभिनवगुप्तपादाः इत्येवं विधाः नैके प्रयोगास्तावद् व्याकरणशास्त्रीयविचारपुरस्सरं समीक्षणमपेक्षन्ते। एवमेव सङ्ख्या प्रातिपदिकेनैव वाच्या विभक्तयश्च वचनरूपसङ्ख्याया द्योतिका वा? सङ्ख्याया विभक्तिवाच्यत्वे हि प्रत्ययार्थप्राधान्यात् प्रातिपदिकार्थव्यक्तौ गुणीभावो न भवेत्। किञ्च मधु, वचः, वारि, इत्यादौ विभक्तेरभावेऽप्येकत्वादिसङ्ख्यायाः प्रत्ययेन व्यभिचारात् सङ्ख्यायाः न विभक्तिवाच्यता। विभक्त्या सङ्ख्या वाच्येति पक्षान्तरम्। तथैवोक्तम् - **द्योतिका वाचिका वा स्युर्द्वित्वादीनां विभक्तयः**[29] इत्यादिवचनपुरस्सरं समुल्लसन्ति शाब्दिकानां विमतयः। केचिद्धि साम्प्रतिकाः भाषासारल्यमुद्दिश्य द्विवचनं निषेधन्त इव दृश्यन्ते। ते हि बालकौ, इत्यादिद्विवचनस्य स्थाने बालकद्वयमिति प्रयुज्य द्विवचनस्यानुपादेयत्वं प्रतिपादयन्ति किन्त्वर्थभेदादिदं न समीचीनम्। बालकावित्युक्ते द्वित्वविशिष्टौ बालकाविति बोधः। बालकद्वयमित्यत्र तु द्वयवयवकः समुदाय इति बोधः। ततश्च द्विवचनाभावे बालकयोर्द्वित्वस्य प्रकारतया भानं क्वचिदपि न भवेत्। द्वयवयवारब्धसमुदायस्यैव शाब्दबोधे विशेष्यता स्यात्। किञ्च द्विवचनाभावेऽश्वि-विशाखा-पुनर्वसुप्रभृतीनां शब्दानाम् अश्विनावित्यादिप्रयोगो लुप्येत। अतो व्याकरणसम्मतं द्वित्वस्य बोधकं द्विवचनं स्वीकार्यमिति विषयोऽयमपि विमर्शणीयः सन्तिष्ठते।

अत्र तावदिदमवगन्तव्यं यद् यथा हि लिङ्गस्वरूपं साहित्यशास्त्रीयं न तावत् पृथग्भूतं प्रसिद्धव्याकरणशास्त्रीयस्वरूपतस्तथैव वचनस्वरूपमपि तत्प्रसिद्धस्वरूपमेव भजते परं

[21] धातुसङ्ख्या – 1139, 1987 - सिद्धान्तकौमुदी, पृष्ठसङ्ख्या - 395, 423

[22] तर्कसङ्ग्रहः, पृष्ठसङ्ख्या - 15

[23] अष्टाध्यायीसूत्रसङ्ख्या – 2/3/46

[24] काशिकावृत्तिः, 1/4/21

[25] लिङ्गवचनविचारः, पृष्ठसङ्ख्या - 78

[26] धातुसङ्ख्या – 1087 - सिद्धान्तकौमुदी, पृष्ठसङ्ख्या - 391

[27] अष्टाध्यायीसूत्रसङ्ख्या – 2/4/54

[28] तदेव – 6/3/109

[29] लिङ्गवचनविचार इत उद्धृतम्, पृष्ठसङ्ख्या - 78

साहित्यशास्त्रे वचनगतकाव्यतत्त्वाधृतं विशिष्टं स्वरूपमवश्यं पृथक्त्तैतस्य विवेचनावसरमुपकल्पयति। तथा हि साहित्ये सङ्ख्यातत्त्वमाहात्म्यं भूयो दरीदृश्यते। नैकाः कृतयः विशिष्टसङ्ख्यया भवन्ति युताः। तद्यथा स्तोत्रसाहित्यगतसङ्ख्यावैविध्याधारस्य सुदीर्घा परम्परा।[30] अपरत्र शतककाव्यानामपि महती शृङ्खला। यत्र नीतिवैराग्यशृङ्गारदेवीचण्डीशिवादीन्यन्यानि[31] च बहुधा प्रथितानि। अथ को न जानीयाद् यत् संस्कृते शतकसाहित्यस्य वर्तते सुदीर्घा परम्परेति। शतकमस्य पदस्य बीजम्महत्त्वञ्च वैदिकसाहित्येऽपि लभ्यते। यत्र मानवस्य पूर्णमायुश्शतम् इति स्वीकृतम् - *जीवेम शरदश्शतम्*,[32] *जिजीविषेच्छतं समाः*,[33] इत्यादयो वेदमन्त्राः "शतायुर्वै पुरुषः" इति सिद्धान्तं समर्थयन्ते। वस्तुतस्तु जीवनस्य सर्वकर्मस्वेव शतसङ्ख्याया योगाकाङ्क्षा वेदेऽवाप्यते।[34] भगवता पतञ्जलिनाऽपि महाभाष्ये श्रुतिसिद्धान्त एवानूदितः।[35] किमधिकम्, लोके तु खिन्नतायामपि शत्रुजनेभ्यश्शतायुरभिलाषस्य वर्णनमवाप्यते।[36] पुराणादिषु देवानां शतन्नामानि प्रथितानि। आगमादिषु च प्रायशोऽनायाससमवाप्तानि दुर्गाकालीशिवविष्णुप्रभृतीनां शतं सहस्रं वा नामान्यपि प्रसिद्धान्येव। शतसाहस्रीसंहितेत्यभिधया च वेदव्यासप्रणीतस्य महाभारतस्यापि नितराम्प्रथितिः।

किङ्कर्तव्यविमूढार्जुनकृतदिव्यस्वरूपदर्शनानुरोधानुसारेण भगवता श्रीकृष्णेन हि स्वदिव्यस्वरूपप्रदर्शनमपि शतशः सहस्रशश्च[37] सङ्ख्यान्वितत्तयैवासीत् कारितम्। पूजनादिकर्मेष्वपि शतम् अष्टोत्तरशतमित्यस्य सम्पृक्तत्वमीदृश्यः परिमाणात्मिकायाः सङ्ख्याया एव महत्त्वं विशदयति। शतकशब्दस्य व्युत्पत्तिदृष्ट्या हि शतम्परिमाणमस्य शतसङ्ख्याविशिष्टो वेत्यर्थलाभः *सङ्ख्याया अतिशदन्तायाः कन्*,[38] इति सूत्रसाधनेन जायते। एवं विद्यते संस्कृतसाहित्ये भारतीयसंस्कृतौ च शतकस्य शतसङ्ख्याया वा महत्त्वन्नाविदितम्।

यद्यपि शतककाव्ये शतादप्यधिकाः कतिचन श्लोका भवन्ति तथाऽपि प्राधान्येन शतकमिति व्यपदेशः प्रसिद्धः। शतककाव्ये श्लोकानां सङ्ख्या शतादधिकाऽपि दृश्यते परङ्कदाचिदपि ततो न्यूना नह्येवावाप्यते। सम्भवतश्शताधिकश्लोकप्रणयने

30 *शिवपञ्चाक्षरस्तोत्रम्, षट्पदीस्तोत्रम्, त्रिपुरसुन्दर्यष्टकम्, कृष्णाष्टकम्, शिवाष्टकम्, गौरीदशकम्, द्वादशलिङ्गस्तोत्रम्, वीरविंशतिकाख्यं श्रीहनुमत्स्तोत्रम्, दुर्गाद्वात्रिंशन्नाममाला, श्रीहनुमच्चत्वारिंशिका, विष्णुसहस्रनामस्तोत्रम्, लक्ष्मीसहस्रम्, शिवसहस्रनामस्तोत्रम्, अष्टोत्तरसहस्रनामस्तोत्रादिकञ्च।* - गोकुलनाथकृतशिवशतकस्यशास्त्रतत्त्वमीमांसा (लघुशोधप्रबन्धः), पृष्ठसङ्ख्या - 06

31 द्रष्टव्या गोकुलनाथकृतशिवशतकस्यशास्त्रतत्त्वमीमांसा (शोधप्रबन्धः), पृष्ठसङ्ख्या – 09-13

32 *तच्चक्षुर्देवहितं पुरस्ताच्छुक्रमुच्चरत् । पश्येम शरदः शतं जीवेम शरदः शतं शृणुयाम शरदः शतम्॥* शुक्लयजुर्वेदकाण्वसंहिता , 36/24, पृष्ठसङ्ख्या - 335

33 *ईशावास्योपनिषद् 2,* ईशादिविंशोत्तरशतोपनिषदः, पृष्ठसङ्ख्या – 01

34 *पश्येम शरदः शतम् जीवेम शरदः शतम्। बुध्येम शरदः शतम्, रोहेम शरदः शतम्। पूषेम शरदः शतम्, भवेम शरदः शतम्। भूयेम शरदः शतम्, भूयसीः शरदः शतात्॥ (अथर्ववेदः 19/67)* संस्कृत वाङ्मय का बृहद् इतिहास (प्रथमखण्ड, वेद),भूमिकात उद्धृतम्,पृष्ठसङ्ख्या-06

35 *बृहस्पतिश्च प्रवक्ता, इन्द्रश्चाध्येता, दिव्यं वर्षसहस्रमध्ययनकालो न चान्तं जगाम, किम्पुनरद्यत्वे ? यः सर्वथा चिरञ्जीवति वर्षशतञ्जीवति ।* - पाणिनीयव्याकरणमहाभाष्यम् (प्रथमं खण्डम्), पस्पशाह्निकम्, पृष्ठसङ्ख्या – 54

36 *उपकृतं बहु तत्र किमुच्यते सुजनता प्रथिता भवता परम्। विदधदीदृशमेव सदा सखे! सुखितमास्व शरदां शतम्॥* साहित्यदर्पणः, द्वितीयः परिच्छेदः, पृष्ठसङ्ख्या- 55

37 *पश्य मे पार्थ! रूपाणि शतशोऽथ सहस्रशः । नानाविधानि दिव्यानि नानावर्णाकृतीनि च ॥* श्रीमद्भगवद्गीता (द्वितीयखण्डः), 11/5, पृष्ठसङ्ख्या- 253

38 *अष्टाध्यायीसूत्रसङ्ख्या - 5/1/22,* - सिद्धान्तकौमुदी, पृष्ठसङ्ख्या - 281



Jahnavi Sanskrit E-Journal (The First Unpaid Sanskrit E-Journal by सारस्वत-निकेतनम्) published by Dr. Bipin Kumar Jha
Avilable at jahnavisanskritejournal.in Issue 36-37 Vol- I Year 10. Date 09 March, 2019 JSEJ/36-37/I/10/2019
Since 2009
ISSN- 0976-8645
UGC RN-41039

*भूयसीः शरदः शतात्*,[39] इति श्रुतिर्मूलत्वेन स्वीक्रियते। मानवस्य सहजस्वभावानुगुणश्शताधिकायुरभिलाषश्शताधिकपद्यगुम्फने मूलमिति मन्तुं शक्यते। सर्वेष्वेषु शतककाव्येषु तावल्लौकिकमलौकिकम्माङ्गल्यप्राप्तिरूपञ्च लक्ष्यमन्वेष्टुं शक्यते। तद्यथा नीतिशृङ्गारादीनि लौकिकमाङ्गल्ययुतानि सूर्यदेव्यादीन्यलौकिकमाङ्गल्ययुतानि च तावन्त्यस्य प्रमाणानि। वस्तुतः शतककाव्यानां विकासक्रममभिलक्ष्य तादृशानामपि रचनानामुल्लेखनं भवितुमर्हम्, येषामाख्याः सन्ति शतकोल्लेखवियुक्ताः, परं तेषां वपुः शतकसङ्ख्ययैव भवति युतम्। पञ्चशतसङ्ख्यासंयुतममेरिकावर्णनन्नाम संस्मरणात्मकं मिथिलाप्रसादत्रिपाठिनः काव्यमथ सप्तशतसङ्ख्यासंयुतं गिरिधरशर्मनवरत्नकृता गिरिधरसप्तशत्याख्यं काव्यम्, शिवदत्तशर्मचतुर्वेदिकृतं स्फूर्त्तिसप्तशतीकाव्यम्, राजेन्द्रमिश्रकृतमभिराजसप्तशतीकाव्यञ्च[40] तावच्छतककाव्यानां विकासक्रमत्वविवेचनायां तादृशानां शतककाव्यानाम्प्रातिनिध्यमावहतीति तथ्यं वर्त्तते सुस्पष्टम्। तस्मात्तादृशेष्वपि काव्येषु रचनानामुल्लेखश्शतककाव्येष्वेव विधातुं शक्यते, यत्र न भवति प्राथम्येन शतकनामावाप्तिः परं तत्र शतसङ्ख्याया भवत्येव योगः।

प्रसिद्धेषु शतकेषु तादृशानि शतककाव्यानि बहूनि सन्ति यत्रैकेनैव नाम्ना कविभिः स्वस्वशतककाव्यानि विरचितानि। तद्यथा - शृङ्गारशतकनाम्नैव भर्तृहरि-व्रजलाल-जनार्दन-व्रजराज-नरहरि-इत्याख्यानाम्पञ्चकवीनाम्,[41] वैराग्यशतकनाम्नैव च भर्तृहरि-जनार्दन-नीलकण्ठ-अप्पयदीक्षित-शङ्कराचार्य्याणाम्पञ्चानाम्,[42] नीतिशतकनाम्ना वेङ्कटाचार्य-श्रीनिवासाचार्य-सुन्दराचार्य्याज्ञाताभिधानयुतानां चतुर्णाम्,[43] अन्योक्तिशतकनाम्ना च सोमनाथ-भट्टवीर-दर्शनविजयगणि-इत्याख्यानां त्रयाणाम्, सूर्यशतकनाम्ना तु मयूर-गोपालशर्म्म-श्रीश्वरविद्यालङ्कार-राघवेन्द्रसरस्वती-रखिलदास-लिङ्गकवि-कोदण्डरामाख्यानां[44] सप्त यावत् सङ्ख्याकानां कवीनां शतकाकाव्यान्यवाप्यन्ते। एवं शतसङ्ख्याऽवलोके एतादृश्याश्शतकरचनाया रहस्यं तु वस्तुतः सम्पूर्णजीवनसमयलाभः कविकर्मणि पूर्णतायाः प्राप्तिश्चेति स्वीकर्तुं शक्यते।

यद्यपि नहि केवलं शतसङ्ख्याऽन्वितमेव काव्यादिविरचनम्प्रसिद्धिमतिशेतेऽपितत्वष्ट-दश-द्वादश-पञ्चदश-द्वात्रिंशद्-अष्टोत्तरशत-सहस्र-अष्टोत्तरसहस्रादिसङ्ख्या अपि तथैव काव्यनाम तद्वपुश्च सीमाङ्कयन्ति। पञ्चापगेशाशास्त्रि(पैङ्गनाडु)-प्रणीतानीमानि काव्यनामानि तावदिह प्रमाणत्वेनोद्धर्तुं शक्यानि। तद्यथा - त्रिपुरसुन्दर्यष्टक-उमामहेश्वराष्टक-प्रसन्नवेङ्कटेशाष्टक-सारस्वताष्टक-श्रीसुब्रह्मण्याष्टक-दक्षिणगोकर्णेश्वराष्टक-मरतकातलेश्वराष्टक-लोकमातृद्वादशश्लोकी -सरस्वतीद्वादशश्लोकी-परमशिवपञ्चदशी-गौरीचरणसप्तति-जगद्गुर्वष्टोत्तरशतकादीनीति।[45] ततः सहस्रसङ्ख्यायुतत्वमपि स्तोत्राणानैकशो द्रष्टुं शक्यते, वस्तुतस्सहस्रशब्दोऽयमनन्तवाची,[46] तस्मादेव स्तोत्रादिषु भगवन्नामानि सहस्रसङ्ख्यया भवन्ति युतानि, विष्णुसहस्रनाम-शिवसहस्रनामश्रीगोसहस्रनामस्तोत्रादीन्यत्र प्रमाणभूतानि। तत्रापि शतमित्यस्य प्रभावोऽवगन्तुं शक्यत एव। नैकस्तोत्राणामेव प्रणयनं वस्तुतः शतकान्वितानां स्तोत्राणामन्येषाञ्च काव्यानाम्मूलत्वेनानुसन्धातुं शक्यते। वस्तुतः स्तोत्रादिग्रन्थप्रणयनस्य विशिष्टसङ्ख्यासमाश्रयणमप्येतदेव वचनस्य गूढं वैलक्षण्यपरत्वं विशेषतः प्रतिपादयति। एवं सूक्ष्मेक्षिकया शतककाव्यानां तदीयविकासरणेश्च

39 *(अथर्ववेदः 19/67),* संस्कृत वाङ्मय का बृहद् इतिहास (प्रथमखण्ड, वेद), भूमिकात उद्धृतम्, पृष्ठसङ्ख्या-06

40 संस्कृत वाङ्मय का बृहद् इतिहास (सप्तम-खण्ड), पृष्ठसङ्ख्या - 130

41 History of Classical Sanskrit Literature, पृष्ठसङ्ख्या – 1089-90

42 अत्रैव, पृष्ठसङ्ख्या – 1081

43 अत्रैव, पृष्ठसङ्ख्या – 319

44 अत्रैव, पृष्ठसङ्ख्या – 1107

45 अत्रैव, पृष्ठसङ्ख्या- 1009 -10

46 श्रीमद्भगवद्गीता (द्वितीयखण्डः), 7/3 इत्यस्य संस्कृतव्याख्यायाञ्चर्चितः, पृष्ठसङ्ख्या - 06

Since 2009
ISSN- 0976-8645
UGC RN-41039

प्रणयनाधारमपि वचनस्य सङ्ख्यायाः वा माहात्म्यमाधृत्यैव समालोचयितुं शक्यते।

अथ साहित्यशास्त्रानुगुणसिद्धान्तसमन्वितेषु श्लेषवक्रोक्त्युपमा-रसाद्यभिव्यक्त्यादिषु च शक्यते वचनस्य सङ्ख्याया वा स्वरूपवैशिष्ट्यं विशेषेणान्वेष्टुम्। तद्यथा - अष्टविधश्लेषेषु वचनश्लेषस्वरूपं तावल्लिङ्गश्लेषोदाहरणभूतश्लोक एव शक्यते द्रष्टुमयं काव्यप्रकाशादुद्धृतः –

**भक्तिप्रह्वविलोकनप्रणयिनी नीलोत्पलस्पर्धिनी,**
**ध्यानालम्बनतां समाधिनिरतैर्नीते हितप्राप्तये।**
**लावण्यस्य महानिधी रसिकतां लक्ष्मीदृशोस्तन्वती,**
**युष्माकं कुरुतां भवार्तिशमनं नेत्रे तनुर्वा हरेः॥**[47]

अत्र स्त्रीप्रत्ययान्तत्वमथ च तदभावे नपुंस्त्वमालक्ष्य विहितप्रयोगद्वयमेकवचनद्विवचनगतश्लेषेण वर्त्तते संयुतम्। एवमेव “मैथिली तस्य दाराः”, **फुल्लेन्दीवरकाननानि नयने पाणी सरोजाकाराः**,[48] **वक्रे भ्रुवावतितराम्**[49] इत्याद्युहारणेषु वचनवक्रतासौन्दर्यं शोभतेतराम्। उपमाऽलङ्कारे च वचनभेदरूपो भवति दोषः, यथा - **ज्योत्स्ना इव सिता कीर्त्तिः**,[50] इत्यत्रोपमानोपमेययोर्वचनभेदः, एवमन्यत्रापि बहुधेदृशाः प्रयोगा एतत्तत्त्वविचारायोपयुक्ताः।[51] वचनस्य च रसाभिव्यञ्जकत्वस्वरूपविषयेऽभिहितमेवम् - **सुप्तिङ्वचनसम्बन्धैस्तथा कारकशक्तिभिः। कृत्तद्धितसमासैश्च द्योत्योऽलक्ष्यक्रमः क्वचित्॥**[52] एतेन वचनपदार्थमनुसृत्यालक्ष्यक्रमरूपो ध्वन्यर्थो रसाभिव्यञ्जको वा विचारणीयताङ्गतो दृश्यते। तद्यथा –

**न्यक्कारो ह्ययमेव मे यदरयस्तत्राप्यसौ तापसः,**
**सोऽप्यत्रैव निहन्ति राक्षसकुलं जीवत्यहो रावणः।**
**धिग्धिक्छक्रजितं प्रबोधितवता किं कुम्भकर्णेन वा**
**स्वर्गग्रामटिकाविलुण्ठनवृथोच्छूनैः किमेभिर्भुजैः॥**[53]

अत्र “अरयः” इति बहुवचनप्रयोगद्वारा रावणस्य शत्रोरभावत्वे सत्यरीणां कथमुद्भव इति क्रोधरूपविभाववत्त्वाद्[54] वीररसाभिव्यञ्जनम् अथ च “तापसः” इत्यत्रैकवचनद्वारा च प्रकृतनिर्वेदातिशयो द्योत्यते।

अन्यत्र च दोषप्रकरणेऽपि वचनस्वरूपं साहित्यशास्त्रीयं शक्यते निभालयितुम्। तद्यथा -

**आदावञ्जनपुञ्जलिप्तवपुषां श्वासानिलोल्लासित-**
**प्रोत्सर्पद्विरहानलेन च ततः सन्तापितानां दृशाम्।**
**सम्प्रत्येव निषेकमश्रुपयसा देवस्य चेतोभुवो**
**भल्लीनामिव पानकर्म कुरुते कामं कुरङ्गेक्षणा॥**[55]

अत्र तावद् दृशां वपुषां चेत्यनयोर्बहुवचनप्रयोगो वृत्तपूरणायैवोपात्तञ्जातम्, तस्माच्च वचनगतदोषरूपोऽयं कविकर्म्मणि। न चात्र *जात्याख्यामेकस्मिन् बहुवचनमन्यतरस्याम्*[56] इत्यस्य कथमपि प्रसङ्गः, श्लोकस्थात् साक्षात् “कुरङ्गेक्षणा” इत्येतत्पदाद् एकस्या एव स्त्रियो वर्णनात्। अनयैव दिशा प्रक्रमभङ्गान्तर्हितवचनदोषस्वरूपमप्यनुशीलयितुं शक्यते।[57]

47 काव्यप्रकाशः, नवम उल्लासः, पृष्ठसङ्ख्या - 513

48 वक्रोक्तिजीवितम्, प्रथमोन्मेषः, पृष्ठसङ्ख्या - 86

49 साहित्यदर्पणः, तृतीयः परिच्छेदः, पृष्ठसङ्ख्या - 160

50 अत्रैव, सप्तमः परिच्छेदः, पृष्ठसङ्ख्या -618

51 *प्राणा इव प्रियोऽयं मे* – काव्यादर्श, द्वितीय परिच्छेद, पृष्ठसङ्ख्या – 4 *अविगाह्योऽसि नारीणामनन्यवचसामपि। विषमोपलभिन्नोर्मिरापगेवोत्तितीर्षतः॥*- सरस्वतीकण्ठाभरणम्, प्रथमः परिच्छेदः, पृष्ठसङ्ख्या - 24

52 ध्वन्यालोकः, तृतीयोद्योतः, कारिकासङ्ख्या- 16

53 काव्यप्रकाशः, सप्तम उल्लासः, पृष्ठसङ्ख्या – 304

54 द्रष्टव्यो ध्वन्यालोकः, तृतीयोद्योतः (लोचनटीका), पृष्ठसङ्ख्या - 153

55 काव्यप्रकाशः, सप्तम उल्लासः, पृष्ठसङ्ख्या - 321

56 अष्टाध्यायीसूत्रसङ्ख्या – 1/2/58

57 *काचित् कीर्णा रजोभिर्दिवमनुविदधौ मन्दवक्त्रेन्दुलक्ष्मीरश्रीकाः काश्चिदन्तर्दिश इव दधिरे दाहमुद्भ्रान्तसत्त्वाः।*
*भ्रेमुर्वात्या इवान्याः प्रतिपदमपरा भूमिवत् कम्पमानाः प्रस्थाने पार्थिवानामशिवमिति पुरो भावि नार्यः शशंसुः॥*
- काव्यप्रकाशः, सप्तम उल्लासः, पृष्ठसङ्ख्या - 373



Jahnavi Sanskrit E-Journal (The First Unpaid Sanskrit E-Journal by सारस्वत-निकेतनम्) published by Dr. Bipin Kumar Jha
Avilable at jahnavisanskritejournal.in Issue 36-37 Vol- I Year 10. Date 09 March, 2019 JSEJ/36-37/I/10/2019
Since 2009
ISSN- 0976-8645
UGC RN-41039

इतोऽपि नाटकादिषु स्वविषयं विवेचयद्भिः पात्रविशेषैः स्वीयोपस्थापनं वयम्,[58] अस्माकम् इति रूपेण बहुवचनपरं विधीयते परं व्याकरणशास्त्रं समनुश्रित्य **सविशेषणस्य प्रतिषेधः**[59] इति वार्त्तिकवचःप्रामाण्यानुगुण्येन एवं प्रयोगाः नैव कर्तुं शक्यन्ते इति वचनगतराद्धान्तविशेषः। वस्तुतस्तु आदरार्थेऽपि बहुवचनप्रयोगस्य वर्तते परिपाटी यथा अभिनवगुप्तपादाः, आचार्याः कुमारिलभट्टाः इत्यादयः प्रयोगाः। अतिशयादरान्वितानाम् आचार्यादीनां पात्राणां विवरणप्रसङ्गे लभ्यन्त ईदृशाः प्रयोगाः, येषामाधारो वेदार्थदीपिकायां षड्गुरुशिष्यवचनालोके निभालयितुं शक्यते –
“व्याख्येयार्थबहुत्वेन बहुमानेन चात्मनः।
व्याख्यामात्रात्मन्यथाऽऽरोप्य बहुत्वं तु प्रयुज्यते॥
यथा हि निधिमासाद्य प्रयुञ्जानस्तु दृश्यते। एते वयं समृद्ध्यर्था देवोऽस्मासु प्रसीदति॥”

अथ च “एकोऽहं बहु स्याम्...” , “द्वा सुपर्णा सयुजा सखाया...” इत्येतद्वचनावलोके एव प्रकृतस्य वचनस्य सङ्ख्यातत्त्वस्य वा सारः शक्यते स्पष्टीकर्तुम्। ब्रह्ममायाजगद्रूपं समग्रमेव तत्त्वविशेषं वस्तुतः एतद्वचनपदार्थस्पष्टीकरणाधीनत्वेनैव शक्यते प्रतिपादयितुम्। ततश्च “जात्याख्यायाम् एकस्मिन् बहुवचनमन्यतरस्याम्” जातिव्यक्तिपक्षद्वयं समाश्रित्य च ऐक्यस्य बहुत्वस्य चाधारोऽपि एतद्विशिष्टवचनतत्त्वमेव विशदयति।

“न हि सर्वः सर्वं जानाति” इत्यत्र सत्यपि बहुत्वे बहुत्वयुक्तः सर्वशब्दस्य एकः समूहरूपोऽर्थो भवति प्रधानः, अपरत्र सर्वे इत्यत्र न हि एकः समूहरूपोऽर्थः प्रधानायतेऽपित्वत्रत्ये बहुत्वे व्यस्तत्वमेव प्रधानविषयः भवति। एवमेव उभशब्दः यस्य प्रयोगः केवलं द्विवचने जायते उभयशब्दस्य च बहुवचन एव। तत्रापि उभशब्दस्य द्वित्वं व्यस्तत्वनिरूपकम् अथ उभयशब्दस्य द्वित्वं समूहरूपं समस्तत्वस्य निरूपणीयतां ब्रूत इति विशेषः।

प्राणाः प्राणः इत्यनयोरेव प्रयोगयोः सन्तिष्ठते साधुतेति समां समां विजायते (५/२/१२) इत्यस्य “समायां समायां विजायते” इति भाष्यवचःप्रामाण्यमुररीकृत्य बहुवचनान्तोऽपि शब्दविशेषः भजत एव एकवचनान्ततामिति विशेष एव सिद्धान्तः वचनतत्त्वसम्बद्धः।

अथ एकशब्दः प्रसिद्धमेकत्वरूपमर्थं तु ब्रूते परं स एव एकशब्दः अर्थान्तरेऽपि युज्यते स चार्थः न ह्येकत्वस्यापितु बहुत्वस्यैव निरूपकः। यथा शास्त्रसिद्धान्तान्तरे बहुधा शास्त्रकारैः प्रयुज्यते – इत्येके, इति।

एवमेव वचनभेदविषयस्य प्रयोगवैलक्षण्यं सुस्पष्टमवगन्तुं शक्यत एव तत्तत्तत्त्वसम्बद्धान् आधारान् अधिकृत्य। तद्यथा शृङ्गारप्रकाशे सङ्ख्यायाः वचनस्य भेदविषयश्चर्चितः। तत्र हि सङ्ख्यायाः षड् भेदाः सन्ति प्रोक्ताः। ते सोदाहरणं यथाक्रमञ्चेमे - सा षोढा – आभिधानिकी, वैवक्षिकी, नैमित्तिकी, पारिभाषिकी, वैभाषिकी, पारिशेषिकी च।[60]

सङ्ख्यायाः वचनस्य वा निर्धारणं येषां शब्दानां जातमस्ति तेषां शक्यते परिगणनम् आभिधानिक्याः सङ्ख्यायाः वर्गे। तद्यथा – आपः, दाराः, लाजाः, द्वयम्, नियुतम् इत्यादयः नैकेऽन्ये शब्दाः।

यत्र च विवक्षाधीना भवति सङ्ख्या सा वैवक्षिकी इत्युच्यते। तद्यथा – रोदसी, रोदस्यौ, कबरी, कबर्यः, स्तनौ, स्तनाः, दृक्, दृशौ, दृशः, विशाखा, विशाखे, विशाखाः, जगत्, जगती, जगन्ति।

यत्र च वस्तुनो निमित्तस्य सद्भावो भवति सा सङ्ख्या नैमित्तिकीत्युच्यते। तद्यथा – वृक्षः, शोभनः, दम्पती, पितरौ, अक्षाः, गभस्तयः।

यत्र द्वित्वबहुत्वादिषु एकत्वादिपरिभाषणं विधीयते शास्त्रानुसारं सा हि सङ्ख्या पारिभाषिकीति निगद्यते। तद्यथा – पञ्चाला जनपदः (काशिका १/२/५२), मार्दङ्गिकपाणविकं पुरुषौ (काशिका २/४/२), खलतिकं वनानि (काशिका २/४/१२), गोदौ ग्रामः (काशिका १/२/५१), तिष्यपुनर्वसू तारकाः (काशिका १/२/६३), स चाहं पचाव इत्यादिप्रयोगाः।

यत्र भवन्ति विभाषयैकत्वद्वित्वबहुत्वानि सा हि सङ्ख्या वैभाषिकीत्युच्यते। तद्यथा – लक्ष्न्यग्रोधं प्लक्षन्यग्रोधाः (काशिका २/४/१२), अश्ववडवम् अश्ववडवौ (काशिका २/४/१२), पूर्वे फल्गुन्यौ पूर्वाः फल्गुन्यः (काशिका १/२/६०) इत्यादयः नैके प्रयोगाः।

एकाद्युक्तसङ्ख्यापरिशेषे स्वादयः जायन्ते सा हि

58 येषां कुलेषु सविता च गुरुर्वयञ्च – उत्तररामचरितम्, प्रथमाङ्कस्थनवमश्लोकांशः

59 सिद्धान्तकौमुदी, (अस्मदो द्वयोश्च – 1/2/59 अत्रत्यवार्तिकम्), पृष्ठसङ्ख्या 188

60 शृङ्गारप्रकाशः, षष्ठः प्रकाशः, पृष्ठसङ्ख्या - 289

सङ्ख्या पारिशेषिकीति कथ्यते। तद्यथा – एकः, द्वौ, बहवः, उभौ, द्वित्राः, अर्धतृतीया इति। वाक्यपदीये तावदुक्तम् –

निमित्तमेकमित्यत्र विभक्त्या नाभिधीयते। तद्गतस्तु यदेकत्वं विभक्तिस्तत्र वर्तते। (वाक्यपदीयम् ३/११/२७)

Jahnavi Sanskrit E-Journal (The First Unpaid Sanskrit E-Journal by सारस्वत-निकेतनम्) published by Dr. Bipin Kumar Jha
Avilable at jahnavisanskritejournal.in Issue 36-37 Vol- I Year 10. Date 09 March, 2019 JSEJ/36-37/I/10/2019
Since 2009
ISSN- 0976-8645
UGC RN-41039

दुर्वारा। 'भूतलं घटवत्' इत्याकारिका या बुद्धिः तन्निरूपितविषयतायाः प्रकारतादिरूपायाः घटादौ सत्त्वात् इति।

**अत्रोच्यते-**

विशिष्टबुद्धिनिरूपितविशेष्यताभिन्नप्रकारताभिन्न विषयताशालित्वमेव विशिष्टबुद्धिनियामकत्वं विवक्षितम्। तच्च घटादौ नातिव्याप्तम्। इत्थं नीलो घटः इत्याकारकविशिष्टबुद्धिनिरूपितप्रकारताभिन्नविशेष्यताभिन्नविषयतायाः अभेदे(तादात्म्ये) विद्यमानतया तस्यापि संसर्गत्वं उपपद्यते। एवं एषः घटः(घटशब्दः घटवाच्यः।) सः पटः इत्याकारकविशिष्टबुद्धौ अर्थे पदवैशिष्ट्यावगाहिन्यां विशेष्यता तत्तदर्थस्य, प्रकारता तत्त्पदस्य, प्रकारताभिन्नविशेष्यताभिन्न -विषयता तु स्वजन्यबोधविषयत्वनिष्ठप्रकारतानिरूपितभगवत्सङ्केतीयविशेष्यतायाः अस्तीति सङ्केतघटितायाः तस्याः परम्परायाः सम्बन्धत्वम् उपपद्यते।

**अत्रायं पूर्वपक्षः-** सङ्केतस्य इच्छात्मकस्य सम्बन्धत्वे प्रमाणाभावेन निष्प्रतियोगिकतया च तत्कल्पनस्यापि असम्भवेन पदार्थोपस्थापकत्वासम्भवेन वृत्तित्वानुपपत्तिः। न च सङ्केतस्य सम्बन्धात्वाभावेऽपि सङ्केतघटितपरम्परायाः वृत्तित्वं निर्वहति इति वाच्यम्। तथापि अक्लृप्तस्य इच्छाविषयत्वस्य सम्बन्धत्वोपगमे स्वजन्यज्ञानविषयत्वसमानकालीनज्ञान-विषयत्वादिपरम्परायाः अपि विनिगमनाविरहेण सम्बन्धता प्रसङ्गः।

**अत्रोच्यते** -आधुनिकसङ्केतितेषु नदीवृद्धिदेवदत्तादिपदेषु अपि सङ्केतमूलकमेवार्थप्रत्यायकत्वं दृश्यते। तथा च **घटादिपदानि सङ्केतज्ञानपूर्वमर्थप्रत्यायकानि पदत्वात् देवदत्तादिपदवत्** इत्यनुमानेन इच्छाघटितसम्बन्धः सिद्ध्यति। न च ज्ञानादिघटितः सम्बन्धः। तस्य दृष्टान्ते असिद्धत्वात्।

## सन्दर्भग्रन्थसूची

1. न्.एस्.रामानुजताताचार्यः, संस्करण सङ्ख्या २००६, शाब्दबोधमीमांसा, नवदेहली, राष्ट्रिय-संस्कृत-संस्थानम्
2. विश्वनाथपञ्चाननभट्टाचार्यः, (संपादकः-नारायणसूनुः), संस्करण सङ्ख्या २०१२, वाराणसी, चौखम्बा संस्कृत अकादमी।
3. भवेन्द्र झा, संस्करणसंख्या 2003, वैयाकरणसिद्धान्तमञ्जूषायाः विमर्शः(लक्षणानिरूपणान्तः भागः),दिल्ली, नाग पब्लिशर्स।
4. गदाधरभट्टाचार्यः,(संपादकः-गोस्वामि दामोदरशास्त्री) संस्करणसंख्या वि.सं.२०६६, शक्तिवादः(मञ्जूषा, विवृति,विनोदिनी टीकात्रयोपेता), वारणासी, चौखम्भा संस्कृत संस्थान।
5. पत्तूरु सुब्रह्मण्यशास्त्रि, (संपादकः-प्रो.के.टि.पाण्डुरङ्गी) संस्करणसंख्या 2006, शाब्दतरङ्गिणी(with exposition in English), बेङ्गलूरु, द्वैतवेदान्त स्टडिस् एण्ड् रिसर्च फौण्डेशन्।
6. महामहोपाध्याय भीमाचार्यः,(संपादकः-वासुदेवशास्त्री), संस्करणसंख्या-1996, न्यायकोशः, पुणे, भाण्डारकरप्राच्यविद्यासंशोधनमन्दिरम्।
7. ए.पि. सच्चिदानन्दः, संस्करणसंख्या-2017, वृत्तिविचारः, शृङ्गेरी, राष्ट्रियसंस्कृतसंस्थानम्।
8. महर्षिगौतमः) ,संपादकः ,2013 ,(महेश झा .डॉ - न्यायसूत्रम् (न्यायदर्शनम्) चौखम्बा ,वारणासी ,वात्स्यायनीयन्यायभाष्यसहितम् संस्कृत सीरीज आफिस।
9. नागेशभट्टः) ,संपादकः ,(जयशङ्करलाल त्रिपाठी - विभावप्रकाशिका )परमलघुमञ्जूषा ,२०४१ .सं. ,(बालबोधिनीव्याख्योपेतावारणासीचौखम्बा , कृष्णदासअकाडमी।
10. मम्मटाचार्यः),संपादकः ,(रिःकपिलदेवो गि - विसरलहिन्दीव्याख्या )काव्यप्रकाशः ,२०४६.सं. ,(सहितम्वारणासीचौखम्भा विश्वभारती। ,
11. महर्षिगौतमः, (संपादकः- डॉ. महेश झा), 2013, न्यायसूत्रम्(न्यायदर्शनम्) वात्स्यायनीयन्यायभाष्यसहितम्, पृष्ठसंख्या -228, वारणासी, चौखम्बा संस्कृत सीरीज आफिस।(न्या.सू.२.१.५४)

Since 2009
ISSN- 0976-8645
UGC RN-41039

Subscription ID 21742442 8 Received on- 04/10/2018

# छान्दोग्योपनिषदि यज्ञप्रकरणान्तर्गते आत्मतत्त्वविद्यानुकूल्ये धनविज्ञानसमीक्षणम्

**रीतापाल**
शोधच्छात्रा, संस्कृतविभागः, त्रिपुराविश्वविद्यालयः।

-------------------------------------------------------

**प्रमुखशब्दाः** – अर्थशास्त्रम्, उपनिषद्, ब्रह्म

**शोधसारः**
*सर्वासामेवोपनिषदामात्मतत्त्वनिरूपणे तात्पर्यम्। आत्मा हि ब्रह्म। अतः जीवब्रह्मैक्यप्रतिपादनमुपनिषदां मुख्यभूतमुद्देश्यम्। छान्दोग्योपनिषद्यपि तदेवमुख्यतयावेदितम्। उपनिषद्भागो वा नामान्तरेण वेदान्तभागो वा प्राधान्येन वेदान्तर्गतब्राह्मणांशतयोपनिषद्यप्यात्मतत्त्वप्रसङ्गेन यज्ञप्रसङ्गावतरणं दृश्यते। ईदृशमेव हि छान्दोग्योपनिषदि दृष्टम्। तत्र यज्ञप्रसङ्गेन आत्मतत्त्वप्रतिपादनप्रसङ्गेन च वर्णाश्रम धर्मसम्पर्कात् मानवजीवने वित्तप्रसङ्गेऽपि अपरिहार्यतया समाविष्टो भवति। धनविद्या प्रभावः छान्दोग्योपनिषदि यज्ञसम्पर्केण ततश्च आत्मोपलब्धौ वैराग्यसाधनयात्रायामपि वित्तव्यवहारोपयोगमूलकतया च कथमुपयुज्यते तदेव छान्दोग्योपनिषदि यथोपात्तं तथैवावेदितं प्रस्तुतप्रबन्धेऽस्माकम्।*

ब्रह्मतत्त्वप्रतिपादने एव सर्वासामुपनिषदां तात्पर्यम् 'तत्तु समन्वया'दिति ब्रह्मसूत्रे तथैव प्रतिपादितम्। अतः धनविद्याविषयकम् आलोचनम् कथं संगच्छते इति प्रश्नः सुतरामेव सुधियां धियमारोहति। वस्तुतस्तु एषणात्रयपरित्यागमन्तरेण चित्तशुद्धिर्न सम्भवत्येव। चित्तशुद्धिद्वारेणैव आत्मज्ञानोत्पत्तिरुपपद्यते। आत्मविज्ञाने उत्पन्ने सति अद्वयब्रह्मस्वरूपोपलब्धिर्भवति। एषणात्रयं तु वित्तैषणा लोकैषणा पुत्रैषणा चेति। विषयस्यास्य पर्यालोचनं बृहदारण्यकोपनिषदि याज्ञवल्क्यकाण्डे चतुर्थाध्याये सम्यक् समुपस्थापितम्। तद् यथा -- "........ एतद्ध स्म वै तत् पूर्वे विद्वांसः प्रजां न कामयन्ते किं प्रजया करिष्यामो येषां नोऽयमात्माऽयं लोक इति ते ह स्म पुत्रैषणायाश्च वित्तैषणायाश्च लोकैषणायाश्च व्युत्थायाथ भिक्षाचर्यं चरन्ति या ह्येव पुत्रैषणा सा वित्तैषणा या वित्तैषणा सा लोकैषणोभे ह्येते एषणे एव भवतः।..........।"[119]

चतुवर्णाश्रमविहितेषु कर्मसु जीवनरक्षणार्थम् जीविकाया प्रयोजनम् अङ्गीकृतम्। तत्र वित्तमूलं हि सर्वम् जीवनसाधनम्। तत्तु कथमपि परिहर्त्तुं न शक्यते। वित्तेन विना जीवननिर्वाहस्य न भवति शक्यसमाधानम्। अतः मानवजीवनस्य सम्यग् निर्वाहार्थं वित्तोपार्जनम् सुतरामेव अपेक्षितम्। यतो हि तत् स्वस्थजीवननिर्वाहस्य मूलाधारभूतं तत्त्वम्। जीवनस्यास्तित्वे स्वस्थतया संसिद्धे एव पारमार्थिक-सत्यविषयकजिज्ञासा स्वतः उदेति चरितार्थापि भवति निर्विघ्नम्। सोपानक्रमारोहणन्यायेन आत्मतत्त्वजिज्ञासुः उपनिषत्प्रतिपाद्यब्रह्मस्व-रूपरूपं पारमार्थिकतत्त्वमुपलब्धुं शक्नोति। प्रातिभासिक – व्यावहारिक –पारमार्थिकभेदेन सत्यस्य सत्तायाः वा त्रैविध्यमभ्युपेयते। वस्तुतस्तु व्यावहारिकदशायाम् मानवजीवननिर्वाहे प्रतिपदं वित्तस्य उपयोगः सदा सर्वत्र अङ्गीक्रियते। अतः मानवजीवनस्य भित्तिस्थानीयम् जीवनरक्षासाधनभूतम् वित्तम् जीवनस्य सर्वावस्थासु निखिलेषु आश्रमपर्यायेषु च उपनिषत्स्वपि अनालोचितं न स्थातुमर्हति। प्रासङ्गिकतयैव जीवनसम्पृक्ततया अर्थनैतिककार्यकलापस्य विवरणम् मोक्षशास्त्रेष्वपि उपनिषज्जातीयेषु आविर्भवति ग्रहणवर्जनपुरःसरम्। व्यावहारिकजीवने वित्तस्य अपरिहार्यतया जीवनधारणपोषणकारणात् शारीरमानसजगतः स्वस्थत्वे एव चित्ताकाशे परमरहस्यभूतपारमार्थिकसत्यविज्ञानार्थं जिज्ञासो-दयसम्भवात्। अस्मादेव कारणात् उपनिषत्प्रतिपाद्यमुख्यभूतविषयस्य ब्रह्म-विज्ञानस्य समीक्षणप्रसङ्गे वैचित्र्यसहित-धनव्यवहारमूलकस्य अर्थनैतिककार्यकलापस्य व्यावहारिकदशायाम् उपनिषद्स्वपि

119 बृहदारण्यकोपनिषत् – ४/४/२२ .

Jahnavi Sanskrit E-Journal (The First Unpaid Sanskrit E-Journal by सारस्वत-निकेतनम्) published by Dr. Bipin Kumar Jha
Avilable at jahnavisanskritejournal.in Issue 36-37 Vol- I Year 10. Date 09 March, 2019 JSEJ/36-37/I/10/2019
Since 2009
ISSN- 0976-8645
UGC RN-41039

प्रयोगदर्शनात् तदनुकूलपर्यवेक्षणम् अस्माकम् आदरणीयं समुपलब्धम्। अतः आत्मतत्त्वविज्ञानसम्पृक्ते आलोचने धनविद्यालोचनमपि वैचित्र्यबहुलम् विशिष्टार्थसंवेदकं प्रतीयादित्यस्माकं सम्यगवधारणम् वेदितव्यम्।

अतोऽधुना उपनिषदां मूर्धन्यभूतच्छान्दोग्योपनिषदि ब्रह्मतत्त्वावेदनप्रसङ्गे ओचित्येन प्रासङ्गिकतया च प्रवर्तमानं धनविद्याविषयकं वास्तविकप्रयोगमूलं पर्यालोचनं प्रारभ्यतेऽस्माभिः।

धनविद्या हि मातेव हितकारिणी। सा हि उपायसहस्रैः निरन्तरम् अखिललोककल्याणकारिणी प्रवर्तमाना उपलभ्यते। विना वित्तं जीवनं न प्रवहति। सर्वासु अवस्थासु जीवननिर्वाहे सम्यग् विकाशे च धनं सातिशयमपेक्षते। मानवजीवनस्य सभ्यतासंस्कृतिविकाशे तस्य च विवर्तनमुखेन परिपूर्णताप्राप्तौ वित्तस्य उपयोगः सुतरामेव काङ्क्षिततमः। अतोऽत्रैव धनविद्याया प्रयोजनं सर्वातिशायीति अनुभूयते। प्रकृष्टपरिमाणवत्त्वेन धनस्य उत्पादनम् सर्वोत्कर्षेण च तस्य विभागं प्रजासु वण्टनं वा धनविद्यायामुपजीव्यभूतम्। एवमेव प्रकृष्टरूपेण उन्नयनमूलककार्येषु तथा प्रजानां भोगव्यवहारे वित्तस्य सम्यग् प्रयोगेऽपि धनविद्याया प्रधानतमः लक्ष्यभूतविषयो भवति। एतावता इदमेव प्रतीयते यत् प्रजाहितसाधनाय सर्वकल्याणकर्मप्रारम्भार्थं धनस्य उपयोगित्वमिति वैयासिकीये महाभारतेऽपि शान्तिपर्वणि अर्थस्य यथार्थोपयोगिविनियोगे अयमेव सन्दर्भ उपयुक्तोपमाद्वारेण सम्यक्तया उपस्थापितः-

"अर्थेभ्यो हि विवृद्धेभ्यः सम्भृतेभ्यस्ततस्ततः।
क्रियाः सर्वा प्रवर्तन्ते पर्वतेभ्य इवापगाः॥"[120]

प्राचीनभारतीयशास्त्रग्रन्थेषु वित्तशास्त्रं नीतिशास्त्रमध्ये परिगणितं भवति स्म। अतः नीतिशास्त्ररूपम् अर्थशास्त्रं धर्मकामसाधनं भूत्वा समाजजीवनम् उत्तरोत्तरम् सर्वोत्कर्षेण विवर्तयति। शुक्राचार्यप्रणीते नीतिसारग्रन्थे एतत् तात्पर्यं महता प्रयत्नेन परिष्कृतं विशदीकृतञ्चेति।

120 महाभारतम्--८/२६ .

तद् यथा—

"सर्वोपजीवकं लोकस्थितिकृन्नीतिशास्त्रकम्।
धर्मार्थकाममूलं हि स्मृतं मोक्षप्रदं यतः॥[121]
अतः सदा नीतिशास्त्रमभ्यसेद् यत्नतो नृपः।
यद्विज्ञानान्नृपाद्याश्च शक्रजिल्लोकरञ्जकाः॥[122]
सर्वलोकव्यवहारस्थितिर्नीत्या विना न हि।
यथाशनैर्विना देहस्थितिर्न स्याद्धि देहिनाम्॥"[123]

प्राचीनभारतीयशास्त्रे धनविद्या वार्ताशब्देनापि सर्वत्र परिभाषिता उपलभ्यते। शुक्राचार्यप्रणीते नीतिसारे एवमुक्तम् –

"आन्वीक्षिकी त्रयी वार्त्ता दण्डनीतिश्च शाश्वती।
विद्याश्चतस्र एवैता अभ्यसेद् नृपतिः सदा॥[124]
अर्थानर्थौ तु वार्त्तायां दण्डनीत्यां नयानयौ।
वर्णाः सर्वाश्रमाश्चैव विद्यास्वासु प्रतिष्ठिताः॥[125]
कुसीदकृषिवाणिज्यं गोरक्षा वार्त्तयोच्यते।
सम्पन्नो वार्त्तया साधुर्नवृत्तेर्भयमृच्छति॥"[126]

अतः वार्ताविद्यायामेव कृषि-वाणिज्य-पशुपालनकुसीदव्यवहाराः धनोत्पत्तेः उपायरूपेण स्वीकृताः। महर्षिमनुनापि धनोत्पत्तेः प्रकृष्टोपायत्वेन वार्ताविद्याया माहात्म्यं प्रक्रीर्त्तितम्। तन्मते कृषि-वाणिज्य-पशुपालनादिरेव वार्ताशब्देन अभिधीयते। ततः एव हि प्रकर्षतः परिमाणतः आधिक्येन च धनागमः सम्भवति। तदुक्तं मनुसंहितायाम् –

"त्रैविद्येभ्यस्त्रयीं विद्यात् दण्डनीतिञ्च शाश्वतीम्।
आन्वीक्षिकीञ्चात्मविद्यां वार्त्तारम्भांश्च लोकतः॥"[127]

मनुसंहिताया अष्टमे याज्ञवल्क्यसंहितायाश्च द्वितीये व्यवहाराध्याये धनागारतः ऋणादानव्यवस्था धनागमोपायत्वेन निर्णीता। कौटिलीये अर्थशास्त्रेऽपि वार्ताविद्या धनविद्यारूपेणैव परिकल्पिता। यथा तत्र उक्तम्—

121 शुक्राचार्यप्रणीते नीतिसारग्रन्थे--१/५ .
122 तथैव --१/६.
123 तथैव --१/११ .
124 तथैव-- १/१५२.
125 तथैव --१/१२४.
126 तथैव--१/१५६)
127 मनुसंहिता-७/४३)

Jahnavi Sanskrit E-Journal (The First Unpaid Sanskrit E-Journal by सारस्वत-निकेतनम्) published by Dr. Bipin Kumar Jha
Avilable at jahnavisanskritejournal.in Issue 36-37 Vol- I Year 10. Date 09 March, 2019 JSEJ/36-37/I/10/2019
Since 2009
ISSN- 0976-8645
UGC RN-41039

क. 'आन्वीक्षिकी त्रयी वार्ता दण्डनीतिश्च विद्याः।'[128]

ख. 'अर्थानर्थौ वार्तायाम्।'[129]

कौटिल्येनैव दण्डनीत्यायत्तायाः वार्ताविद्यायाः श्रेष्ठत्वमाख्यातम्। इन्द्रियजयप्रकरणे राजर्षिवृत्तव्याख्यानप्रसङ्गे तेनोक्तम् –

"अर्थ एव प्रधानः इति कौटिल्य, अर्थमूलो हि धर्मकामाविति"। त्रिवर्गसाधने अर्थस्यैव प्राधान्यम् स्वीकृतम्। अर्थविद्या हि वार्ताविद्या। तत्स्वरूपमाहुः कौटिल्यपादाः –"कृषिपाशुपाल्ये वाणिज्या च वार्त्ता धान्यपशुहिरण्यकुप्यविष्टिप्रदानादौपकारिकी। तया स्वपक्षं परपक्षं च वशीकरोति कोशदण्डाभ्याम्।"[130]

"आन्वीक्षिकीत्रयीवार्त्तानां योगक्षेमसाधनो दण्डः, तस्य नीतिर्दण्डनीतिः अलब्धलाभार्था, लब्धपरिरक्षणी, रक्षितविवर्धनी, वृद्धस्य तीर्थेषु प्रतिपादनी च। तस्यामायत्ता लोकयात्रा। तस्माल्लोकयात्रार्थी नित्यमुद्यतदण्डः स्यात्। नित्यमुद्यतदण्डः राज्यप्रशासकः प्रजानां जीवनरक्षनार्थं वार्ताव्यवस्थायाम् अभिनिरतः सन् आधिक्येन धनोत्पत्तिमाध्यमेन प्रजावृत्तिव्यवस्थांम् अविच्छिन्नां कुर्यात्।" तथा चोक्तम् कामन्दकीयनीतिसारे –

"आयत्तं रक्षणं राज्ञि वार्ता रक्षणमाश्रिता।
वार्ताच्छेदे हि लोकोऽयं श्वसन्नपि न जीवति॥"[131]
"न्यायेनार्जनमर्थस्य रक्षणं वर्द्धनं तथा।
सत्पात्रप्रतिपत्तिश्च राजवृत्तं चतुर्विधम्॥"[132]

प्रजाजीवनरक्षार्थम् अर्थनैतिककार्यकलापव्यवहारसाध्यं धनोत्पादनं भवति अभीस्पिततमम्। धनोत्पादनकार्यकलापाः कृष्याधिकारे सर्वक्षेत्रेषु खनिजद्रव्यव्यापारेषु पशुपालनकर्मसु वाणिज्येषु तथा धनागारतः ऋणदानादिकर्मणा बृद्धिविवर्द्धनकर्मसु परिव्याप्ता भवन्ति। तेन च प्रजानां वृत्तिच्छेदभयं कदापि नोत्पद्यते। वृत्तिश्च सम्भवति शारीरश्रमप्रभावतः बुद्धिवैभवनैपुण्यप्रभावतश्च। अतः उक्तं कामन्दकीयनीतिसारे—

"पाशुपाल्यं कृषिः पण्यं वार्ता वार्तानुजीविनाम्।
सम्पन्नो वार्तया साधुर्न वृत्तेर्भयमृच्छति॥"[133]

कृषिकर्मादिद्वारेण तथा प्रजाभ्यः करादानमाध्यमेन राज्ञः कोशगतधनसञ्चयवृद्धिर्भवति नित्यम्। प्रजाधिपतिः प्रशासकः प्रजाजीवनरक्षकः आयादधिकं व्ययं कदापि न कुर्यात्। अतोऽसौ अन्वहं तौ आयव्ययौ प्रत्यवेक्षेत। तथा चोक्तं कामन्दकीये—

"कोष्ठागारेऽभियुक्तः स्यात् तदायत्तं हि जीवितम्।
नात्यायं व्ययं कुर्यात् प्रत्यवेक्षेत चान्वहम्॥"[134]

आयद्वाराणि स्पष्टतः कामन्दकीयनीतिसारे यथातथ्यनिष्ठं यथार्थतश्च समुल्लिखितानि। तानि आधुनिकानामपि अस्माकं विस्मयमावहन्ति। तानि च आयद्वाराणि एवमुक्तानि—

"कृषिर्वणिक्पथो दुर्गं सेतुः कुञ्जरबन्धनम् ।
खन्याकरधनादानं शून्यानां च निवेशनम्॥"[135]
"अष्टवर्गमिमं साधु स्वच्छवृत्तो विवर्द्धयेत्।
जीवनार्थमिहाजीव्यैः कर्तव्यः करणाधिकैः॥"[136]
"तथा यया प्रवर्तेत वृत्त्या क्षीणोऽपि पार्थिवः।
तस्यां तस्यान्न संरोधं कुर्यात् पण्योपजीविनाम्॥"[137]

प्रजानां धनोत्पत्तिस्थानेषु वृत्तिव्यवहारक्षेत्रेषु आयुक्तादिभ्योऽर्थात् राजकर्मचारिप्रभृतिभ्यः पञ्चधा भयं यथा न भवति तथा प्रशासकेन कर्तव्यमिति स्पष्टतः कामन्दकेन उल्लिखितम्। एतत्तु—

"आयुक्तकभ्यश्चोरेभ्यः परेभ्यो राजवल्लभात्।
पृथिवीपतिलोभाच्च प्रजानां पञ्चधा भयम्॥"[138]

128 कौटिलीयार्थशास्त्र—१/२/१
129 तथैव—१/२/१
130 तथैव—१/४/१
131 कामन्दकीयनीतिसारे --१/१२.
132 तथैव—१/२०
133 तथैव—२/३/१४।.
134 तथैव--१/७७.
135 तथैव—५/८/७८।
136 तथैव—५/८/७९.
137 तथैव—५/८/८०.

Jahnavi Sanskrit E-Journal (The First Unpaid Sanskrit E-Journal by सारस्वत-निकेतनम्) published by Dr. Bipin Kumar Jha
Avilable at jahnavisanskritejournal.in Issue 36-37 Vol- I Year 10. Date 09 March, 2019 JSEJ/36-37/I/10/2019
Since 2009
ISSN- 0976-8645
UGC RN-41039

"पञ्चप्रकारमप्येतदपोह्यं नृपतेर्भयम।
आददीत धनं काले त्रिवर्गपरिवृद्धये॥"[139]

धनसंबर्द्धनचेष्टायाम् नित्यमभिरतः नृपति यथाकालम् प्रजानाम् अभ्युदयमूलककर्मसु तद्व्ययं कुर्यात् इति सदा मनसि ध्येयम्। यथोक्तम् कामन्दकीयनीतिसारे—

"संबर्द्धयेत् सदा कोशमाप्तैस्तज्ज्ञैरधिष्ठितम्।
काले चास्य व्ययं कुर्यात् त्रिवर्गपरिवृद्धये॥"[140]

धनोत्पादनमुखेन धनविबर्धनं तस्य च यथायथवण्टनं मनुनापि महता कण्ठेन घोषितम्—
"अलब्धञ्चैव लिप्सेत लब्धं रक्षेत् प्रयत्नतः।
रक्षितं वर्द्धयेच्चैव वृद्धं पात्रेषु निक्षिपेत्॥"[141]
"एवञ्चतुर्विधं विद्यात् पुरुषार्थप्रयोजनम्।
अस्य नित्यमनुष्ठानं सम्यक् कुर्य्यादतन्द्रितः॥"[142]
"अलब्धमिच्छेद्दण्डेन लब्धं रक्षेदवेक्षया।
रक्षितं वर्धयेद्वृद्ध्या वृद्धं दानेन निक्षिपेत्॥"[143]

प्रजारक्षणकर्मनियुक्तानां कार्याधिकारिणां लोभतः कार्यार्थिशोषणात् प्रजापालकनृपतेर्नित्यतत्परता मनुसंहितातः अवधेया। अतः मनुसंहिताया सप्तमाध्याये मनुना यदुक्तं तद् आधुनिकयुगेऽपि अतीव उपादेयतया ग्राह्यम्। यथा—

"राज्ञो हि रक्षाधिकृताः परस्वादायिनः शठाः।
भृत्या भवन्ति प्रायेण तेभ्यो रक्षेदिमाः प्रजाः॥"[144]
"ये कार्यार्थिभ्योऽर्थमेव गृह्णीयुः पापचेतसः।
तेषां सर्वस्वमादाय राजा कुर्य्यात् प्रवासनम्॥"[145]

लोकतन्त्राधिकारी नृपतिः राष्ट्राधीनप्रशासनतन्त्रस्य प्रधानरूपेण तदधीनकार्याधिकारिभिः संमन्त्र्य राज्यशासनं कुर्यात्। तच्छासने प्रजानां सर्वोतोमुखं कल्याणं मनसि अवधानयोग्यं भवति। सर्वव्यपारेषु धनस्य प्राधान्यात् वित्तार्जने समधिकध्यानं दातव्यम्। प्रजाभ्यः करादानमन्तरेणापि वित्तोपार्जनस्य बलवत्तराणि स्थानानि प्राचीनेषु अर्थशास्त्रेषु परिज्ञापितानि । कृषिज-खनिजद्रव्याणामुत्पादनेन पण्यरूपेण सम्पाद्य वाणिज्यब्दारा धनोत्पादनविबृद्धिः स्यादिति सर्वकालीना रीतिः प्रचलति। प्राचीनकाले पशुपालनब्दारा सम्पद्समृद्धेः धारा अव्याहता आसीत्। सर्वत्रैव कृषिजानां खनिजानां पशुप्रभृतीनां तथा प्राणिजानां द्रव्याणां भोग्यपण्यरूपेण क्रयविक्रयरूपवाणिज्यद्वारा स्थलपथेन जलपथेन वा स्वदेशे विदेशे वा दैशिकवैदेशिकवाणिज्यव्यवहारेण राष्ट्रस्य धनभाण्डाररूपकोशसमबृद्धिः समधिकतया उपचिता अभूदिति आलक्ष्यते स्म।
बहुत्र मनुसंहितादिकामन्दकीयनीतिसारकौटिलीयार्थ शास्त्रेषु साक्षात् वार्ताप्रसङ्गे आयद्वाररूपेण धनबृद्धिसूचकम् अर्थनैतिकप्रतिष्ठारूपम् ऋणदानादानमपि नोल्लिखितम्। विचारव्यवस्थाप्रकरणे व्यवहारनिरूपणप्रसङ्गे ऋणदानमाध्यमेन बृद्धिग्रहणेन अर्थोपार्जनोपायः समुपवर्णितः उपलभ्यते। कृषि-खनि-पशुपालन-वाणिज्यादिव्यापारेषु धनविनियोगस्य सापेक्षतया बलवतः धनागारस्य स्वामिनः सकाशात् ऋणग्रहणम् कदापि अपरिहार्यम् अनिवार्यञ्च भवति। तादृशात् अर्थनैतिकप्रतिष्ठानात् कालनियतऋणग्रहणार्थं गृहीतमूलधनात् अधिकं बृद्धिसञ्ज्ञकं कुसीदं देयं भवति। बन्धकादिरूपेण न्यासरूपेण च उत्तमर्णाधमर्णसंयोगविशेषेण उत्तमर्णस्य बृद्धिप्राप्तिद्वारा कुसीदलाभद्वारा वा धनार्जनं धनोत्पादकव्यपारेषु च सहयोगः सुतरामेव स्पष्टतया प्रतिभाति। अर्थशास्त्रेषु

138 तथैव—५/८/८२.
139 तथैव –५/८/८३ .
140 तथैव –५/८/८७।
141 मनुसंहिता –७/ ९९
142 तथैव—७/१००.
143 तथैव—७/१०१.
144 तथैव—७/१२३.
145 तथैव –७/ १२४.

Jahnavi Sanskrit E-Journal (The First Unpaid Sanskrit E-Journal by सारस्वत-निकेतनम्) published by Dr. Bipin Kumar Jha
Avilable at jahnavisanskritejournal.in Issue 36-37 Vol- I Year 10. Date 09 March, 2019 JSEJ/36-37/I/10/2019
Since 2009
ISSN- 0976-8645
UGC RN-41039

वित्तविषयकपर्यालोचनमुखेन वार्ताधीनतया धनविद्याविषयतया वा यानि उपादानानि प्राचीनशास्त्रेषु अस्माभिरधिगतानि तेषामेव उपस्थितिद्वारेण ब्रह्मविद्याप्रतिपादकोपनिषच्छात्राण्यपि समुपबृंहितानि।

मुख्योपनिषद्वाङ्मये सामवेदान्तर्गता छान्दोग्योपनिषद् ज्ञानज्योर्तिरालकं विश्वजगतः सर्वार्थविद्योतकमिव विराजते। पारमार्थिकसत्यस्वरूपब्रह्मतत्त्वावेदिकासत्यपि व्यवहारिकजगत्तत्त्वमपि नोपक्षते उपनिषदियम्। मनुष्यसमाजमन्तरेण विश्वजगतः परमार्थसत्स्वरूपवेत्ता कोऽपि भवितुं नालम्। वेदानामन्ते वेदान्तेऽपि आर्यसमाजसंस्कृतिरेव प्रधानतया वरीवृत्यते। चतुवर्णाश्रमविधृते समाजेऽस्मिन् विशिष्टा काचन संस्कृतिधारा सुप्राचीनकालादेव प्रवहति। सुदृढार्थामूलप्रतिष्ठितसमाजशक्तिं विना समाजान्तर्गतमनुष्याणां प्रशान्तवाहिस्थितिदार्ढ्यं न सम्भवति। लोकतन्त्राधिकृतथसमाजे योगक्षेमसाधनधनस्य प्रभुत्वमेव उपनिषद्साम्राज्येऽपि सर्वत्र विराजमानं दरीदृश्यते। वेदसाहित्यस्य संहिताभागेषु ब्राह्मणभागेषु च देवताप्रसादनतः इहलौकिकसुखसाधनप्राप्तौ ऐकान्तिकी प्रार्थना समुपलभ्यते। पारलौकिकं सर्गसुखन्तु तत्पश्चात् विभावनीयम्। ऐहिकभोगैश्वर्यलाभार्थं स्वतः एव सर्वाश्रमप्रतिष्ठाभूमिरूपस्य गृहस्थाश्रमस्य सर्वज्येष्ठत्वेन सर्वगरिष्ठत्वेन च धर्मशास्त्रेषु अभ्युपेतस्य निरन्तरमायासः उपलभ्यते। यज्ञसम्भूता एतादृशी इहलौकिको आमुष्मिकी च सुखभोगकल्पना यज्ञतत्त्वविश्लेषणपराणां याज्ञिकमीमांसकानामभिमता। यज्ञानुष्टानं बहुलवृत्तश्रमसाधम्। अतः यज्ञकर्मैव धनवतां यजमानानां स्वायत्तम्। राजानः अपरेच ये सामाजिका बहुवृत्तस्वामिनः त एव यज्ञं कर्त्तुं शक्नुवन्ति। यज्ञोपकरणानां वित्तबहुलसाध्यत्वात् हीनवित्तानां स्वल्पवृत्तानां वा यज्ञानुष्ठाने असामर्थ्यमेव सूचितं श्रौतसूत्रेषु गृह्यसूत्रेषु च। यज्ञद्रव्यसम्भारक्रयार्थं वित्तमपेक्षितम्। यज्ञानुष्ठानोपयोगिभूमिगृहादिनिर्माणेऽपि धनस्य प्रयोजनम् अवश्यं स्वीकार्यम्। शारीरश्रमप्रयोगेन बुद्धिवैभवविनियोगेन च श्रमद्वैविध्ययोगात् यज्ञाङ्गसौधनिर्माणं सम्यक्तया परिनिष्पद्यते। कायिकश्रममूल्यं कायिकश्रमजीविनां बुद्धिवैभवजश्रममूल्यं बुद्धिजीविनां यागद्रव्यसंग्रहरतानां कायिकश्रमनिष्पाद्यकर्मप्रवृत्तानां पौरोहित्यकर्मणि निष्णातानां ऋत्विजां च धनव्यवहारेणैव सम्पद्यते। एवमेव बहुवित्तायाससाध्ये यज्ञसम्पादने अपरिमित धनव्ययोऽपेक्ष्यते।

छान्दोग्योपनिषदि यज्ञतत्त्वस्यापि प्रभावः परिलक्ष्यते। यज्ञभावनातः सम्पूर्णतया विच्युतिः उपनिषदि अस्यां नानुभूयते। क्रियासाध्ययज्ञस्य रूपकावरणेन ग्रहणात् यागगतानां द्रव्यदेवताक्रियाणां प्रतीकरूपेण अवलम्बनात् वैदिकचिन्ताजगति अभूतपूर्वमेकं विष्मयोत्पादकदार्शनिकचिन्ताधारायाम् व्यावहारिकजगत्तत्त्वविषयकम् आपेक्षिकं तत्त्वं परिहाय पारमार्थिकसत्ताविष्करणेन रूपान्तरमेकं युगान्तरञ्च प्रादुर्भूतम् आलक्षितम्।

छान्दोग्योपनिषदियम् अष्टभिरध्यायैर्विभक्ता प्रत्यध्यायञ्च बहुभिः खण्डैः संयुक्तम्। यज्ञाधिकारतः उपासनापद्धतिमाश्रित्य ब्रह्मतत्त्वावेदने निरतायाम् उपनिषदि अस्यां विचित्रविषयावतारणमुखेन व्याख्यानतत्परत्वमुपलभ्यते। उपनिषदोऽस्या प्रत्यध्यायं प्रसङ्गक्रमेणैव अर्थनैतिककार्यकलापा आविर्भूताः परिलक्ष्यन्ते।प्रथमाध्यायस्य प्रारम्भादेव यजमानस्य काम्यफलसमृद्धिः सूचिता तत्र ब्रीहियवादीनाम् शस्यानाम् उल्लेखः सुस्पष्टातया समुपलभ्यते। द्वितीयखण्डे ज्योतिष्टोमादियागानुष्ठानस्य सूचनात् यज्ञे प्रभूतवित्तव्ययसम्बन्ध सूचितः। तृतीयखण्डे अन्नस्य उल्लेखात् कृषिकर्मविधेः स्पष्टता अवधृता भवति। चतुर्थखण्डे मत्स्यविषयकप्रस्तावात् मत्स्यजीविनां मत्स्यपालनस्य तद्विक्रयस्य च परिचयः प्राप्यते। पञ्चमे खण्डे यजमानस्य ऋषेः बहुपुत्रकामनातः जनसम्पद्बृद्धिः सूच्यते। षष्ठे खण्डे सुवर्णस्य उल्लेखेन खनिजद्रव्याणाम् सुवर्णरजतादीनां लोहताम्रादीनाञ्च सुलभता सूचिता भवति। सप्तमे खण्डे वीणायन्त्रसहितसङ्गीतकलाया उल्लेखेन

Jahnavi Sanskrit E-Journal (The First Unpaid Sanskrit E-Journal by सारस्वत-निकेतनम्) published by Dr. Bipin Kumar Jha
Avilable at jahnavisanskritejournal.in Issue 36-37 Vol- I Year 10. Date 09 March, 2019 JSEJ/36-37/I/10/2019
Since 2009
ISSN- 0976-8645
UGC RN-41039

तौर्यत्रिकम् अर्थात् नृत्यगीतादीनां शिल्पकलानाम् लोकसमाजे अर्थोपार्जनसाधनभूतानां समुल्लेखः दृश्यते। एतत्प्रसङ्गेनैव स्पष्टतः समधिकधनलाभः शिल्पकलाया फलरूपेण समुल्लिखितः उपनिषदि अस्याम्। द्वादशे त्रयोदशे च खण्डे पुनरपि अन्नोत्पादनस्यैव जयगानं श्रूयते। अष्टमखण्डे पुनरपि अन्नोत्पत्तिप्रसङ्गः अवतारितः दृश्यते। तत्र अन्नोत्पत्तिकारणरूपेण जलस्य आवश्यकतापि स्पष्टतः उल्लिखिता। नवमे खण्डे उत्तरोत्तरम् उत्कृष्टतरजीवनलाभस्य प्रसङ्गः उत्थापितः। तत्र जीवनमानस्य उन्नयनद्वारेण समग्रपरिवारस्य समृद्धिः सूचिता भवति। दशमे एकादशे च खण्डे उषस्तिचाक्रायणमूलाख्यानप्रसङ्गेन जीवनरक्षार्थम् अन्नोत्पादनस्य अपरिहार्यत्वं समुल्लिखितम्।

द्वितीयाध्याये चतुर्विंशतिखण्डेषु अनुकूलपर्यावरणे अन्नसमृद्धिद्वारा कृषिसमृद्धिस्तथा पशुसम्पत्समृद्धिरपि स्पष्टतः समुलिखिता।

तृतीयाध्याये एकोनविंशखण्डेषु पुनरपि पुष्टिकरखाद्योत्पादनोल्लेखेन अन्नस्य साधारण्यनेन तथा मुख्यतः कृषिसम्पदः समृद्धिरेव सूचिता। अनेन सह पशुसम्पत्समृद्धिरपि तत्र प्रसङ्गक्रमेणैव समुल्लिखिता। एवमेव रजतसुवर्णादीनां साक्षात्समुल्लेखेन खनिजशिल्पसमृद्धिरपि स्पष्टतः सूचिता समुपलभ्यते।

चतुर्थाध्यायस्य सप्तदशखण्डेषु विशेषेण पशुसम्पश्मत्समृद्धिः, पुनरपि अन्नसमृद्धिद्वारेण कृषिसमृद्धिः एवमेव खनिजसमृद्धिः तथा कृषिजखनिजद्रव्यनिर्मितशिल्पसमृद्धिः सूचिता। अत्र सुवर्णरजतादिनिर्मितशिल्पकर्मद्वारा खनिजशिल्पसमृद्धिः यथा सूच्यते तथैव दारुशिल्पस्य चर्मशिल्पस्य च तथा भैषज्यद्रव्याणां समुल्लेखेन अर्थनैतिककार्यव्यवहारस्य समृद्धिः सुस्पष्टम् उल्लिखिता उपलभ्यते। अनेन प्रसङ्गेन चिकित्साविज्ञानस्य पुष्टिविज्ञानस्य धातुविज्ञानस्य विचित्रशिल्पविज्ञानस्य च सूचनेन समाजान्तर्गतमनुष्याणां शिक्षास्वास्थ्यजीविकादीनां परिचयोऽपि लभ्यते।

पञ्चमाध्याये चतुर्विंशखण्डेषु विशेषेण मानवजीवने वित्तस्य अपरिहार्यत्वं समुल्लिखितम्। वित्तमन्तरेण मानवजीवनम् शिक्षास्वास्थ्यजीविकाशून्यं भवति। इदन्तु पञ्चमाध्यायस्य तृतीयखण्डे स्पष्टतः उल्लिखितम्। खण्डान्तरेषु अन्नसुवर्णादीनाम्मुल्लेखेन कृषिजखनिजशिल्पकर्मणां समृद्धिः सूच्यते। एवंक्रमेणैव पशुपक्षिणामुल्लेखेन पशुपक्षिसंग्रहे तथा पशुपालनकर्मणि च उद्योगः परिलक्ष्यते।

पञ्चदशखण्डे धनसम्पदः समृद्धिबाहुल्यम् इष्टतमं परिदृश्यते। अन्यत्र खण्डेषु बहुत्र विचित्रशिल्पद्रव्याणां कृषिजखनिजानां, भेषजद्रव्याणाम् ओषधिरूपेण वर्तमानानां रोगनिरामयकारकाणाम् समुल्लेखः समुपलभ्यते। इष्टापूर्तकर्मणां समुल्लेखेन धनमूलकानां उद्योगानां सूचनात् उपनिषदि अर्थनैतिकस्थितेः काचन समुन्नता चित्ररेखा समुपलभ्यते। इतस्ततः पञ्चमाध्यायगतेषु खण्डेषु कृषिज-खनिज-प्राणिजद्रव्याणाम् उपस्थितिद्वारेण तत्कालीनाया वाणिज्यव्यवस्थाया परिचयोऽपि सुलभो भवति।

पञ्चमाध्याये प्राधान्येन च कृषिजखनिजसम्पदाम् पशुसम्पदाम् तदुत्पन्नभोगोपकरणभूतपण्यरूपशिल्पकर्मणाम् समुल्लेखेन तत्सम्पृक्तं वाणिज्यमपि सुतरामेव अवगम्यते। षष्ठाध्यायेऽपि अनुकूलपरिवेशे अन्नसृष्टेरुल्लेखात् कृषिकर्मसमृद्धेः स्पष्टता बोध्यव्या अण्डज-जीवज-उद्भिज्जानां समुल्लेखेन यथा प्राणिजगतः तथैव उद्भिद्जगतोऽपि परिचयः उपलभ्यते। एवमेव स्वर्णरजतलोहादीनां प्रसङ्गतः उल्लेखात् खनिजसमृद्धिरपि विस्पष्टं सुच्यते एव। एवमेव गवादिपशूनां व्याघ्र-सिंह-वृक-वराहप्रमुखानां प्राणिनां कीटपतङ्गादीनां च समुल्लेखेन प्राणिजगतः परिचयः समुपलभ्यते। पक्षिणामपि परिचयः प्राप्यते।

सप्तमाध्याये प्रथमे द्वितीये तृतीये च खण्डे अधीतव्यविषयाणाम् एका तालिका प्रदत्ता दृश्यते। विषयाणां तेषाम् अध्ययनात् ऐहिकसम्पद्समृद्धिः भवत्येवेति

Jahnavi Sanskrit E-Journal (The First Unpaid Sanskrit E-Journal by सारस्वत-निकेतनम्) published by Dr. Bipin Kumar Jha
Avilable at jahnavisanskritejournal.in Issue 36-37 Vol- I Year 10. Date 09 March, 2019 JSEJ/36-37/I/10/2019
Since 2009
ISSN- 0976-8645
UGC RN-41039

विज्ञेयम्। सप्तमाध्याये अष्टमम् खण्डमारभ्य षड्विंशखण्डपर्यन्तं पार्थिवसम्पद्लाभार्थं तथा शारीरमानसबलबृद्धिद्वारेण नैपुण्यरूपवैभवसम्पादनेन शारीरमानसस्वास्थ्यसम्पन्नता तथा ऐहिकसम्पद्विबृद्धिसम्पादनं द्योतितं भवति।

अष्टमाध्यायेऽपि राज्ञः राज्यप्रशासनादेव तस्यानुशासनेन प्रजानां जीविकालाभः राजधान्यां जनपदे अथवा क्षेत्रभागेषु सम्भवति इति सूच्यते। अथापि तत्र प्रजानां कर्मनैपुण्यबलेन जीविकास्थितेः उत्कर्षतारतम्यं भवतीत्यपि सूचितम्। प्रजानां जीवनमानोत्कर्षस्तु रोगादिशून्यदीर्घजीवनदर्शनात् हिरण्मयालोकेन आलोकितं भवेदिति अनुमीयते। अष्टमाध्यायस्य पञ्चदशखण्डपर्यन्तं सामाजिकमानवस्य समुन्नतजीवनमानस्य परिचयः उपलभ्यते। तत्र कृषि-पशुप्रभृतिसम्पदा सम्पन्नमानवः यथेष्टम् अन्नपानादिभोगेन तृप्तः सन् गन्धमाल्यघृतवादित्रादिद्वारेण विनोदनेन चित्तप्रसादनात् उत्तमालंकारभूषितः सन् सुवस्त्रपरिधानेन च शोभमानः वसनेन अलंकारेण च आत्मानं तथा संस्कुर्वन् रोगमुक्तं दीर्घजीवनम् इच्छतिस्म दरीदृश्यते।

छान्दोग्योपनिषदि अष्टसु अध्यायेषु प्रायेण सर्वत्र अन्न-पशु-स्वर्ण-रजतादीनामुल्लेखेन कृषिज-खनिज-प्राणिज-शिल्पपण्यद्रव्याणाम् वाणिज्यसम्प्रसारणमपि स्पष्टतः विज्ञायते। कृषि-खनि-पशुसम्पृक्तशिल्पद्रव्याणाम् वाणिज्यद्वारेण धनोत्पादनबृद्धिः प्रजानां जीविकालाभः सुलभः इति च संसूच्यते। यत्र कृषि-खनि-पशु-वाणिज्यादीनां समृद्धिः समाजे राष्ट्रसुशासनबलेन दृष्टिगोचरतामुपैति तत्र एतेषु क्षेत्रेषु अर्थसाहाय्यकारिणां वित्तप्रतिष्ठानानां ऋणदानकारिणां उपस्थितिः अवश्यमेव विभावनीया। मनु-याज्ञवल्क्य-गौतमस्मृतिषु तथा कामन्दकीयनीतिसार-शुक्रनीतिसारः-कौटिलीयार्थशास्त्रेषु वार्ताशब्देन परिभाषितस्य अर्थशस्त्रस्य परिचयात् अस्याम् छान्दोग्योपनिषदि समुपलब्धस्य अर्थनैतिकव्यवहारस्य समुज्वलमेकं विशिष्टं चित्रं प्रतिभाति। धनविद्यागृहीतोपादानानाम् अष्टाध्यायात्मिकायाम् अस्याम् छान्दोग्योपनिषदि पाठप्रसङ्गेन पदे पदे विचित्रव्यवहारिकरूपेण समुपस्थितेः सुदृढार्थनैतिकचित्रस्य रूपरेखा अस्माकम् मनसि अवतीर्य अस्मद्बुद्धिप्रदीपं समुद्भासयति।

अस्मदालोचिते प्रबन्धसन्धर्भे आत्मतत्त्वप्रतिपादिकायामपि उपनिषदि अर्थनैतिकतत्त्वस्य व्यवहारिकमूल्यायनम् छान्दोग्योपनिषदः विचित्य विचित्य प्रासङ्गिकपर्यवेक्षणं कृतम्। अधुना उपनिषद्गतप्रासङ्गिकस्थलानि अर्थनैतिकतत्त्वमूलसूचकानि उदाह्रियन्ते।

1. धनविषयकम् उदाहरणम् – १/७/६
2. उपासना मानवानाम् ऐहिकाम्भ्युदयकामनामूला—१/२/१२, १/२/१३, १/३/१४.
3. उत्तरोत्तरोत्कृष्टजीवनलाभेच्छा—२/९/२
4. कृषिकर्मणि बृष्टेरुपयोगः—२/२/३
5. अन्नम्—१/१२/५, २/८/३.
6. भोजनम् पानं च--- ३/६/१
7. भक्ष्यम् अन्नम्--- ३/४/२, ३/५/२, ३/३/२, ३/२/२.
8. दीर्घजीवन-कीर्ति-प्रजा-पशुसम्मृद्धिकामना--- २/१४/२, २/१५/२, २/१६/२, २/१७/२, २/१८/२, २/१९/२, २/२०/२.
9. पक्षिविषयकम् उदाहरणम्— २/९/४ ,
10. पशुविषयकम् उदाहरणम् --- २/९/२, २/६/१-२,
11. उत्कृष्टजीवनविषयकम् उदाहरणम्—२/७/२ ,
12. ऋतु-नदीप्रमुखानां कृषिसमृद्धिहेतुकत्वम्—२/४/१,२/५/१ ,
13. व्रीहि- यव- तिल- माष- सर्षप-श्यामाकतण्डुलविषयकं विवरणम्--- ३/१४/३, ५/१०/६,
14. धनपरिपूर्णा पृथिवी--- ३/११/६,
15. कीर्ति-देहलावण्य-वल-उजर्स्विताविषयं वर्णनम्--- ३/१३/२-५,
16. व्याधिविषयकं वर्णनम्--- ४/१०/३,

Jahnavi Sanskrit E-Journal (The First Unpaid Sanskrit E-Journal by सारस्वत-निकेतनम्) published by Dr. Bipin Kumar Jha
Avilable at jahnavisanskritejournal.in Issue 36-37 Vol- I Year 10. Date 09 March, 2019 JSEJ/36-37/I/10/2019
Since 2009
ISSN- 0976-8645
UGC RN-41039

17. गवादिपशु - स्वर्णहार- अश्वतरी-रथप्रमुखविषयकं वर्णनम्--- ४/२/१, २, ४ ,
18. चिकित्साविषयकं वर्णनम् --- ४/१७/८,
19. धातुद्रव्यविषयकं वर्णनम् --- ४/१७/७ ,
20. दारु-चर्मशिल्पविषयकं वर्णनम्--- ४/१७/७,
21. सर्वौषधिविषयकं वर्णनम् – ५/२/४,
22. अन्न-पशुविषयकं वर्णनम्--- ५/१९-२३,
23. धनदानविषयकं वर्णनम् – ५/११/५,
24. <u>वित्तप्रार्थना</u>विषयकं वर्णनम्--- ५/३/६,
25. कांस्य-चर्मशिल्पविषयकं वर्णनम्—५/२/७,
26. बृक्षवर्णनम् – ६/११,
27. नदीसमुद्रादिवर्णनम्—६/१०,
28. मधु- व्याघ्रादिपशुविषयकं वर्णनम् – ६/९,
29. अन्नम् – ६/४, ५,६,७, ६/२/४ , ७/४/२, ७/९/१-२,
30. लवणम् – ६/१३/१, २, ४/१७/७,
31. अलंकारवस्त्रवर्णनम् – ८/८/१-५, ८/९/१-२,
32. अन्नपान-गन्धमाल्य-घृतवादित्रादिवर्णनम् – ८/२,
33. राजानुशासनतः जीविकास्थाननिर्वाचनम् – ८/१/५,
34. गो-अश्व-हस्ति-हिरण्य-भृत्य-भार्य्या-भूसम्पत्ति-अट्टालिका-स्वर्ण-मुक्ताप्रमुखवर्णनम् – ७/२४/२,
35. सुखविषयकवर्णनम्—७/२२,
36. पुत्रपशुसम्पद्कामनाविषयकं वर्णनम् – ७/१३/१/, ७/१४/१– ७/२२,
37. पुत्रपशुविषयकवर्णनम् – ७/३/१,
38. कृषिपशुसमृद्धिः वर्णनम् –७/१०/१,
39. पशुपक्षिकीटपतङ्गादिवर्णनम्– ७/८/१,
40. परशुः(लोह निर्मितकुटार) – ६/१६,
41. रजतसुवर्णदिधातुवर्णनम् – ३/१९/२,
42. विद्याविषयविषयकं वर्णनम् – ७/१/२, ४ , ७/२/१, ७/७/१,
43. पशुविषयकं वर्णनम् – २/११/२-२/२०/१,

प्राचीनार्थनीतिशास्त्रेषु धर्मशास्त्रेषु च अर्थनीतिविषयकं प्रासङ्गिकं ऋणदानप्रसङ्गालोचनम् अस्मन्निबन्धानुकूलम् भवेदिति तेषां शास्त्राणां नामान्युल्लिख्य ऋणदानप्रकरणप्रसङ्गस्थानान्यपि समुल्लिख्यन्ते।

**ऋणदानप्रसङ्गः**

१) मनुसंहिता

२) याज्ञवल्क्यसंहिता

३) गौतमस्मृतिः

४) कौटिलीयार्थशास्त्रम्

५) शुक्रनीतिसारः

१) मनुसंहिताया अष्टमाध्यायः व्यवहारविषये ऋणदानप्रकरणम्, श्लोकः - ८/१३९-८/१९६,

२) याज्ञवल्क्यसंहिताया व्यवहारविषये ऋणदानप्रकरणम्, श्लोकः - २/३७-२/६४,२/६५, २/६७,

३) गौतमस्मृतिः, श्लोकः - १०/१, १०/६, १२/४, १२/५ ,

४) कौटिलीयार्थशास्त्रम् – ३/११/६३, ३/१२/६४,

५) शुक्रनीतिसारः, श्लोकः — ४/५/३२२-४/५/३२६,

खनिजानां सुवर्णादिधातूनाम् आकरजानां महार्घमणिरत्नादीनां धनविद्यान्तर्गतया तेषां मन्वादिसंहितासु तथा शुक्रनीतिसार-कामन्दकनीतिसार- कौटिलीयार्थशास्त्रेषु च उपात्तानि विवरणानि उपनिषद्विषयके अस्मत्प्रबन्धे अपरिहार्यतया अवश्यम्भाविरूपेण विश्लेषणमुखेन प्रासङ्गिकतया च उल्लेखमर्हन्ति। अतोऽधस्तात् तेषां परिचयः प्रदीयते—

प्राचीनभारतीयार्थशास्त्रेसु धनविद्याविषयक-मालोचनं पारिभाषिकार्थे वार्तायामन्तर्भुक्तम्। वार्तायां कृषिप्रसङ्गेन खनिविषयकप्रसङ्गेऽपि उत्थापितः। खनिजद्रव्याणाम् उपयोगस्तु समाजे महतीं भूमिकामास्थापयति। धातुद्रव्याणि यथा खनिजानि तथैव बहुमूल्यरत्नादिकान्यपि। धातुद्रव्याणि बहुप्रकाराणि भवन्ति। तथैव

Jahnavi Sanskrit E-Journal (The First Unpaid Sanskrit E-Journal by सारस्वत-निकेतनम्) published by Dr. Bipin Kumar Jha
Avilable at jahnavisanskritejournal.in Issue 36-37 Vol- I Year 10. Date 09 March, 2019 JSEJ/36-37/I/10/2019
Since 2009
ISSN- 0976-8645
UGC RN-41039

रत्नादीनि समुद्र गतानि मुक्ताप्रवालादीन्यपि तत्र अन्तर्भवन्ति। अतः मनु-याज्ञवल्क्य-शुक्र-कामन्दक-कौटिल्यप्रणीतेषु शास्त्रेषु आकरकर्मान्तविषयक-मालोचनं धातुरत्नादीनाम् आविष्करणं तथा तैः शिल्पद्रव्यनिर्माणम् प्रासङ्गिकतयैव अस्माकं दर्शनपथमुपैति। एवमेव मनु-याज्ञवल्क्यव्यतिरिक्तेषु अष्टादशस्मृतिशास्त्रेष्वपि प्रसङ्गान्तरच्छलेन धातु-निर्मितद्रव्याणां समुल्लेखेन बहुविचित्राणां सुवर्णरजतलोहादीनां धातूनां विशिष्टपरिचयः समुपलभ्यते। अतः तत्रापि खनिजद्रव्याणाम् धातूनां रत्नानां च समुत्पत्तिः तैश्च धातुद्रव्यैः रत्नैश्च सामाजिकव्यवहारोपयोगिशिल्पद्रव्यनिर्माणेन ततश्च क्रयविक्रयादिवाणिज्यद्वारेण अर्थनैतिककार्यकलापः संसूच्यते एव। उपरिवर्णित-प्रतिपाद्यविषयस्य यथा मनु-याज्ञवल्क्य-शुक्र-कामन्दक-कौटिल्यादिशास्त्रेषु समुपवर्णनमुपलभ्यते तथेदानीं तेषां मन्वादीनां ग्रन्थतः समुल्लिख्य समुपस्थापयामो वयम्—

१) मनुसंहिता (आकरकर्मान्तविषयकं समुद्धरणम्)
खनिविषयकालोचनसमुद्धृतिसूची-
सप्तमाध्यायश्लोकः - ६२, ७५, ९६, १३०, १३८, २२२,

२) याज्ञवल्क्यसंहिता(आचाराध्यायः)
प्रथमाध्यायश्लोकः- १८२, (द्रव्यशुद्धिप्रकरणे खनिजद्रव्यविवरणम्)
(गृहस्थधर्मप्रकरणे वृत्तिनिर्वाचने धनविद्याविषयविषयकं विवरणम्)

"प्रधानं क्षत्रिये कर्म प्रजानां परिपालनम्।
कुसीदकृषिवाणिज्यपाशुपाल्यं विशः स्मृतम्॥[146]

राजधर्मप्रकरणे आकरकर्मान्तविवरणम्, श्लोकसंख्या- ३२२, ३२८, ३५२, ३५३, ३६२, ३६६।
तृतीयोऽध्याये (प्रायश्चित्ताध्याये) आपद्धर्मप्रकरणम् आपत्कालीना वृत्तिव्यवस्था, श्लोकसंख्या ---३८, ४२।

"कृषिः शिल्पं भृतिर्विद्या कुसीदं शकटं गिरिः।
सेवाऽनूपं नृपो भैक्षमापत्तौ जीवनानि च ॥"[147]

शुक्रनीतिसारः चतुर्थाध्याये द्वितीयोप्रकरणे रत्नादिवर्णनम् श्लोकसंख्या — ४०-८६ ।
चतुर्थाध्याये द्वितीयप्रकरणे (धातुवर्णनम् तथा सुवर्णादिधातु-मुद्राविवरणम्)। श्लोकसंख्या--२/८७-२/१०६।
चतुर्थाध्याय तृतीयप्रकरणम्— रसायनसंयोगात् धातूनां शुद्धीकरणं, धातुभाण्डादिनिर्माणम्, कृत्रिमस्वर्णरत्नादिक्रियाविज्ञानमलंकारनिर्माण कौशलम्, काचपात्रादिनिर्माणम्, लोहशस्त्रास्त्र निर्माणम्, श्लोकसंख्या--७३, ७४, ७५, ८३, ८७, ८८, ८९, ९५, ९६,
कौटिल्यार्थशास्त्रे द्वितीयाधिकणे धातुसमीक्षा, श्लोकसंख्या --११-१४,१६-१८,
कामन्दकनीतिसारे चतुर्थसर्गे सप्तम प्रकरणे आकरज खनिजद्रव्याणां सुवर्णादिवज्रमणिमुक्तादीनामुत्पत्तिस्थानविवरणम्। श्लोकसंख्या — ५०-५६,
चतुदर्शसर्गे विंशतितमप्रकरणे सुवर्ण-धातुप्रमुख्यानां उत्पत्तिप्रकारवर्णनम् , श्लोकसंख्या —१४/२०/३ ।
चतुर्दशसर्गे एकविंशतितमप्रकरणे सुवर्णादिकांस्यलोहताम्रादिखनिजद्रव्याणाम् उल्लेखः, श्लोकसंख्या – १४/२१/२६,
चतुर्दशसर्गे एकविंशतितमप्रकरणे—

कोशो दण्डश्च कुप्यञ्च विष्टिर्वाहनमेव च
हिरण्यधान्य वस्त्राणि वाहनानि तथैव च।
तथान्ये द्रव्यनिचयाः प्रजातः सम्भवन्ति हि।[148]

धनविद्याश्रितविचित्रवृत्तीनाम् वार्ताशब्देन व्यवहारसमुल्लेखः –१४/२१/२७ ।
अर्थविद्याश्रित राजकोशवर्णनम् १४/२१/३३, १४/२१/३४ ।
वस्त्रमणिमुक्ताद्युत्पत्तिस्थानानां वर्णनम् - २१/५१ ।
पञ्चमसर्गे अष्टमप्रकरणे कृषिवाणिज्यकुसीदद्वारेण तथा खनिजद्रव्याणां रत्नादीनां तथा आकरजानां सुवर्णरजतलोहादिधातूनाम् उत्पादनद्वारेण

146 याज्ञवल्क्यसंहिता—१/११९ ,

147 तथैव –३/४२ ।

148 कामन्दकनीतिसारः – १४/२१/२६.

Jahnavi Sanskrit E-Journal (The First Unpaid Sanskrit E-Journal by सारस्वत-निकेतनम्) published by Dr. Bipin Kumar Jha
Avilable at jahnavisanskritejournal.in Issue 36-37 Vol- I Year 10. Date 09 March, 2019 JSEJ/36-37/I/10/2019
Since 2009
ISSN- 0976-8645
UGC RN-41039

राजकोशे धनागमोद्यमवर्णनम्। श्लोकसंख्या ---५/८/ ७७ -- ५/८/८० ।

अष्टादशस्मृतिसंहितासु आकरज धातुद्रव्याणाम् उपस्थितिपरिचयः

१) शङ्खस्मृतिसंहिता, श्लोकसख्या – १३/१३-१३/१६, १६/२-१६/४, १७/३, १७/१५, १७/१९।
२) अत्रिस्मृतिसंहिता, श्लोकसंख्या --१५२, १५३, १५६, १५७, १५८, १५९।
३) औशनसस्मृतिसंहिता, श्लोकसख्या —४० ।
४) आङ्गिरसस्मृतिसंहिता, श्लोकसख्या —४१-४४ ।
५) संवर्त्तस्मृतिसंहिता, श्लोकसख्या —४७, ४८, ५२, ७५, १२५ ।
६) लघुयमस्मृतिसंहिता, श्लोकसख्या —१३, ७४।
७) आपस्तम्बस्मृतिसंहिता श्लोकसख्या —२,३ ।
८) बृहस्पतिस्मृतिसंहिता, श्लोकसख्या —४, ५, ३९ ।
९) कात्यायनस्मृतिसंहिता, श्लोकसख्या —९/११, १४/१०, २९/१९।
१०) राशरस्मृतिसंहिता, श्लोकसख्या —१/६१, ७/२४-७/२८।
११) तातपस्मृतिसंहिता, श्लोकसख्या —२/२१, २/२२,४/१-४/७, ४/१२, ४/२३, ४/२४, ४/२८, ५/२८।
१२) तमस्मृतिसंहिता, श्लोकसख्या —१/४, १०/४, १३/२, २०/१, २१/२, २३/३, २४/३ ।

दुर्लभं हि मानवजन्म। अस्मिन्नेव जन्मनि पारमार्थिकसत्योपलब्धिद्वारेण सच्चिदानन्दरूपे अद्ययब्रह्मस्वरूपे स्वमहिम्नि प्रतिष्ठालाभे प्रयत्नः करणीयः जीवस्य। तत्र ब्रह्मविद्याद्वारेणैव ब्रह्मस्वरूपोपलब्धिः सम्भवति अन्यथा न। सर्वैषणापरित्यागपूर्वकं परवैराग्योत्पत्तिद्वारेण ब्रह्मविद्यालाभः सुकरो भवति। ज्ञानकर्मणोः आत्यन्तिकविरोधात् मुमोक्षोः कर्मसन्नासः अपरिहार्यस्तथापि जीवतः जीवस्य कर्मत्यागासम्भवात् श्रुतिरेव(ईशोपनिषद्)स्वयं वदति—

"कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः।
एवं त्वयि नान्यथेतोऽस्ति न कर्म लिप्यते नरे॥"[149]

अपि च केनोपनिषद्यपि उक्तम् –

"इह चेदवेदीदथ सत्यमस्ति
न चेदिहावेदीन्महती विनष्टिः।
भूतेषु भूतेषु विचित्य धीराः
प्रेत्यास्माल्लोकादमृता भवन्ति॥"[150]

इहलोके सम्यग् जीवननिर्वाहार्थं धनस्य प्रयोजनम् अनीवार्यतया ईस्पितमेव अतोऽपि उक्तम्—'अजरामरवत्प्राज्ञः विद्यामर्थञ्च चिन्तयेत्'(विष्णुशर्मविरचिते पञ्चतत्राख्ये ग्रन्थे)। 'न वित्तेन तर्पणीयो मनुष्यो'[151] इत्यपि कठोपनिषदि आम्नातम्। तथापि वित्तमन्तरेण मनुष्यजीवनम् नैराश्यकवलितं भूत्वा आत्महननेऽपि उद्यतो भवति। अतः जीवनरक्षार्थमपि धनार्जनम् अपेक्षितमेव।

गृहस्थजीवनम् वित्ताधीनं जीवनभोगोपकरणानि वित्तसाध्यानि। वित्तञ्च कृष्यादिकर्मसाध्यम् परिषेवादिमूलकञ्च। ब्रह्मचर्याद्याश्रमचतुष्टये समाजबन्धनस्य मूलीभूतम् भित्तिस्थानीयं गार्हस्थ्यश्रमस्थानम् पदं करोति। गार्हस्थ्यश्रमस्य ज्येष्ठत्वं श्रेष्ठत्वं च प्रतिध्वनितं कम्बुकण्ठेन मनुसंहिताया षष्ठाध्याये यथा(श्लोकसंख्या४/८७ – ४/९०)

ब्रह्मचा"रि गृहस्थश्च वानप्रस्थो यतिस्तथा।
एते गृहस्थप्रभवाश्चत्वारः पृथगाश्रमाः।।"[152]
सर्वोऽपि क्रमश"स्त्वेते यथाशास्त्रं निषेविताः।
यथोक्तकारिणं विप्रं नयन्ति परमां गतिम्॥"[153]
सर्वेषामपि चैतेषां वेदस्मृतिविधानतः।"
गृहस्थ उच्यते श्रेष्ठः स त्रीनेतान् विभर्त्ति हि॥"[154]
यथा नदीनदाः सर्वे सागरे यान्ति संस्थितिम्।"
तथैवाश्रमिणः सर्वेव गृहस्थे यान्ति संस्थितिम्॥"[155]

149 ईशोपनिषद् – २ ।

150 केनोपनिषद् – २/५ ।

151 कठोपनिषद् –१/१/२७

152 मनुसंहिता – ६/८७ ।

153 तथैव—६/८८ ।

154 तथैव – ६/८९ ।

155 तथैव – ६/९० ।

एतेन यद्यपि बृहदारण्यकोपनिषदुक्ते याज्ञवल्क्यकाण्डे चतुर्थाध्याये याज्ञवल्क्य-मैत्रेयीसंवादे परमपुरुषार्थस्वरूपभूतस्य अमृतत्त्वस्य वित्तसाध्यत्वं निषिद्धं, यद्यपि च शङ्कराचार्यविरचितविवेकचूडामणिग्रन्थे तथैव प्रतिध्वनितं तथापि मानवजीवनस्य चरमविकाशे परमात्मतत्त्वालोचनायामपि छान्दोग्योपनिषदि वित्तस्य उपयोगित्वं नापेक्षितम्। छान्दोग्योपनिषदि तत्त्वालोचनप्रसङ्गे अध्यायेषु अष्टसु वित्ताश्रितसमाजचित्रस्य प्रतिविम्बनं द्रष्टुं शक्यते। मनुसंहितादि शुक्रनीतिसार-कामन्दकनीतिसार-कौटिलीयार्थशास्त्रेषु महाभारते च शान्तिपर्वणि धनविद्या वार्ताविद्यारूपेण स्वतन्त्रतया समाजे प्रचलिता आसीत्। धनविद्याङ्गभूतानि उपादानानि सर्वाण्येव संक्षेपेण वार्ताविद्यायामन्तर्भूतानि उपलभ्यन्ते। वार्ताश्रितानि उपादानानि कृष्यादीनि छान्दोग्योपनिषदि प्रासङ्गिकतयैव आवेगभूतानि इत्युपलभ्यन्ते। तेषां परिचयः प्रागेवास्माभिरावेदितः। ब्रह्मविद्याप्रतिपादितायामस्यां छान्दोग्योपनिषदि अध्यायाष्टके अस्माकम् अर्थनैतिककार्यावलीचित्ररेखाङ्कने प्रयासः स्वहृदयानां विदुषां पाठकानां समीक्षकणाञ्च चित्तं नन्दयतु इत्याशास्महे ।

## सन्दर्भग्रन्थसूची


१) उपनिषद्ग्रन्थावली (तृतीयभाग बृहदारण्यकोपनिषद्), सम्पादकः – स्वामिगम्भीरानन्द; प्रकाशकः – उद्बोधनकार्यालयः कलिकाता ७०००० ३, प्रकाशः १४१३ वङ्गाब्दः।

२) उपनिषद्ग्रन्थावली (प्रथमभाग, ईषादिश्वेताश्वतरपर्यन्तम् उपनिषद्नवकम्) , सम्पादकः –– स्वामिगम्भीरानन्द; प्रकाशकः – उद्बोधनकार्यालयः कलिकाता ७०००० ३, प्रकाशः १४१९ वङ्गाब्दः।

३) उपनिषत्संग्रहः ( उपनिषत्संख्या- १८८), सम्पादकः – पं. जगदीशशास्त्री; प्रकाशकः – मोतीलाल बनारसीदास पब्लिर्शस नई दिल्ली – ११००२८, प्रकाशः – १९९६ ख्रीष्टाब्दः।

४) कामन्दकीयनीतिसारः, सम्पादकः – राजेन्द्रलालमित्र; ड. शिशिरकुमार-मित्रेण आङ्गलभाषायामनुदितं परिमार्जितञ्च, प्रकाशकः – दि एशियाटिक सोसाइटि, कलकाता – १६. नवसंस्करणम् –१९८२ ख्रीष्टाब्दः।

५) कामन्दकीयनीतिसारः, सम्पादकः – ड. मानवेन्दु वन्द्योपाध्याय, संस्कृतपुस्तकभाण्डार, कलकाता, प्रकाशः – १९९९ ख्रीष्टाब्दः।

६) कौटिलीयार्थशास्त्र, सम्पादकः – ड. मानवेन्दु वन्द्योपाध्याय, संस्कृतपुस्तकभाण्डार, कलकाता, प्रकाशः १९८९ ख्रीष्टाब्दः ।

७) कौटिलीयार्थशास्त्र, (खण्डः प्रथमो-द्वितीश्च) सम्पादकः – ड. राधागोविन्द वसाकः, जेनारेल प्रिन्टार्स एण्ड पावलिशार्स प्राइभेट लिमिटेड, कलकाता, प्रथमप्रकाश-१९६४ ख्री, द्वितीयप्रकाश- १९६७ ।

८) मनुसंहिता (कुल्लूकभट्टकृतटीकासमेता), सम्पादकः – श्री श्यामाकान्त विद्याभूषण, तारा लाइब्रेरी, कलकाता, प्रकाशः – १९३७ ख्रीष्टाब्दः।

९) छान्दोग्योपनिषद् (शाङ्करभाष्यसहिता), सम्पादकः – पं.श्रीनलिनीनाथ रायः; प्रकाशकः – वसुमतीसाहित्यमन्दिर कलिकाता-१२, प्रकाशः – १३४३ वङ्गाब्दः।

१०) छान्दोग्योपनिषद्(शङ्करभाष्य-आनन्दगिरिटीकासहित) सम्पादकः – दुर्गाचरणसांख्यवेदान्ततीर्थ; प्रकाशकः – देवसाहित्यकुटीर कलिकाता-९, प्रकाशः – १३६२ वङ्गाब्दः।


Jahnavi Sanskrit E-Journal (The First Unpaid Sanskrit E-Journal by सारस्वत-निकेतनम्) published by Dr. Bipin Kumar Jha
Avilable at jahnavisanskritejournal.in Issue 36-37 Vol- I Year 10. Date 09 March, 2019 JSEJ/36-37/I/10/2019
Since 2009
ISSN- 0976-8645
UGC RN-41039

Subscription ID E-234518486 Received on 15/02/2018

# दक्षिणामूर्ति शिव अष्टमूर्तिस्वरूप शिव एवं शंकराचार्यस्वरूप: एक विमर्श

**मीनाक्षी जोशी**
संस्कृत विभाग, जामिया मिल्लिया इस्लामिया, नई दिल्ली

----------------------------------------------------

**प्रमुख शब्द-** पञ्च ज्ञानेन्द्रिय - श्रोत्र , त्वक, नेत्र, रसना, ध्राण, पञ्च कर्मेन्द्रिय - वाक् वाणि, पाद, वायु और उपस्थ, पञ्च वायु - प्राण, अपान, व्यान, उदान और समान ,दक्षिणामूर्ति, अष्टमूर्ति

**शोधसार-** *वेदान्त-दर्शन वेदों के ज्ञान-काण्ड से अनुस्यूत ज्ञान-राशि को स्वयं में संजोता रहा है। भारतवर्ष में वेदान्त-सिद्वांतों का महातरू हजारों वर्ष पूर्व ज्ञान की उर्वरा-पर सुदृढता से उत्थित हुआ। जरा-मृत्यु रहित नित्य-नूतन अनेक शाखाओं में अनेक उपसनारूप फलों को लिए यह महातरू सारतत्त्व और विचार की परस्पर घनिष्टता के कारण एक ही प्राणरस से सभी का पोषण करता रहा। यही प्रतीक है मानव की लक्ष-लक्ष स्वरों एवं लक्ष-लक्ष विश्वासों से युक्त महागान का जिसके आराध्य देवता बर्बरतम से लेकर नामहीन-सीमाहीन निराकार परब्रह्म रूप तक है। दक्षिणामूर्ति शिवस्वरूप स्वंय वेदान्त के स्वरूप को स्पष्ट करता है।*

## दक्षिणामूर्ति शिवस्वरूप अष्टमूर्ति

दक्षिणामूर्ति शब्द का विग्रह अनेक विद्वानों ने अनेक पद्धतियों से किया। यथा-

1. दक्षिणा मूर्तिः (देह) अस्य सः दक्षिणामूर्तिः अर्थात् यस्य मूर्ति दक्षिणा अभिमुख यहाँ दक्षिण दिक्वाचक सर्वनाम सञ्ज्ञक स्त्रीलिङ्ग से आच् प्रत्ययान्त (दक्षिणा अदूरे भवम् ) अव्यय पदम् 'दक्षिणामूर्ति' बना। (बहुव्रीहि समास)

2. अथवा- दक्षिणे अभिमुखं यस्य सः दक्षिणामूर्ति शिवः जिनका मुख दक्षिण की ओर हो ऐसे शिव दक्षिणामूर्ति है। बहुव्रीहि समास यहॉ पर भी है।

3. अथवा- दक्षिण अमूर्तिः दक्षिणश्च असो अमूर्तिश्च इति सः दक्षिणामूर्तिः यहॉ पर दक्षिण तथा अमूर्ति शब्द विशेषण होगें जिससे कर्मधारय समास होगा अर्थात् दक्षिण शब्द का अर्थ होता है - निष्कपट, निष्पक्ष, योग्य, चतुर, कुशल इत्यादि।[156] तथा अमूर्ति का अर्थ होता है- आकारहीन, रूपहीन।[157] इस प्रकार चाहे दक्षिण दिशा अर्थ ले जो समस्त अशुभता की द्योतक है उसी की और मुख किए बिना किसी विकार के निर्विकार समस्त शुभता को धारण किए (अष्टमूर्ति ) जो परम शिव एक मात्र ज्ञान प्रदान करने में समर्थ है (परमयोगी निस्पृह ) ही दक्षिणामूर्ति हैं। और यही निवेदन आचार्यशङ्कर ने दक्षिणामूर्ति स्तोत्र के ध्यान में किया है। शिव की अष्टमूर्ति - दक्षिणमूर्ति के श्रीविग्रह (मूर्ति ) को सूक्ष्मता से देखने पर कई महत्त्वपूर्ण तत्त्वों का समावेश उसमें प्राप्त होता है। जो वेदान्त में उद्धृत मूल तत्त्वों को ही चिह्निनत करता है। जिन्हें हम स्पष्टरूप से आगे देख्रेगें।

शिव की अष्टमूर्ति अर्थात् आठ स्वरूपों का समावेश हमें दक्षिणामूर्ति में प्राप्त होता है। यह अष्टस्वरूप का वर्णन पूर्व में कालिदास विरचित अभिज्ञानशाकुन्तलम् के मङ्गलाचरण में भी प्राप्त होता है। 1. यही अष्टमूर्ति का स्वरूप स्वंय वेदान्त के स्वरूप को स्पष्ट करता है यथा प्रथम शिव स्वरूप-

1.पृथिवी- शिव का सम्पूर्ण विग्रह स्थूल पृथिवी का घोतक है जो भासमान होता है।

2.जल - शिरस्था गड्गा जल का प्रतिनिधित्व करती है।

3. अग्नि- शिवमूर्ति ने स्वयं अपने वाम हस्त में अग्निशिखा को धारण किया है।

---

156 क. दुर्मना विमना अन्तर्मनाः स्यादुत्क उन्मना। दक्षिण सरलोदारौ सुकलो दातृ भोक्तारि।। 3.1.1.2.1अमरकोष
ख. सरले - वाचस्पत्यम्
ग. आददे नातिशीतोष्णो नभस्वानीव दक्षिणः - वामन शिवराम आप्टे शब्दकोष

157 वामन शिवराम आप्टे शब्दकोष

अर्थात् जो ज्ञान देने में सक्षम हो और आकार हीन हो अपनी विराटता के कारण वही दक्षिणामूर्ति हैं।

4. शाङ्कर सम्प्रदाय में दक्षिणा शेमुषी प्रोक्ता इस व्युत्पत्ति के अनुसार दक्षिणा बुद्धि का पर्याय माना जाता है। अर्थात् ज्ञानमूर्ति के रूप में शिवतत्त्व की कल्पना की गई है जो अज्ञान का उच्छेदन करने में सक्षम हो।

Since 2009
ISSN- 0976-8645
UGC RN-41039

4. वायु - परमशिव की लहराती हुई जटाएँ वायु को प्रदर्शित करती है।

5. आकाश - करस्थ डमरू आकाश को प्रदर्शित करता है। जो अनहद नाद के रूप में सृष्टि के आरम्भ से ही उद्घोषित रहा है उसे डमरू से उत्पन्न माना जाता है अतः डमरू का वह रिक्त भाग आकाश माना जाता है।

6. सूर्य - सूर्य शिव के शीष पर दायीं ओर स्थित है।

7. चन्द्र - यह भी शिव ने शीष पर बायीं ओर धारण किया है।

8. आत्मा - चूँकि दक्षिणामूर्ति मौन मुद्रा ध्यानमुद्रा में है अतः जो मौन है वह आत्मस्थिति का अर्थात 'आत्मा' का घोतक है।

**या सृष्टिः सृष्टुराद्या वहति विधिहुतं या हविर्या च होत्री**
**ये द्वे कालं विधत्तः श्रुतिविषयगुणा या स्थिता व्याप्य विश्वम्**
**।**
**यामाहुः सर्वबीजप्रकृतिरिति यया प्राणिनः प्राणवन्तः**
**प्रत्यक्षाभिः प्रपन्नस्तनुभिरवतु वस्ताभिरष्टाभिरीशः।।**[158]

इसके साथ ही शिव के दाहिने कर्ण में साधारण कर्णविलय दिखाई देता है जो पुरुष पहनते है तथा वामकर्ण में स्त्रियोचित कर्णाभरण धारण किए हुए है जो अर्धनारीश्वर का स्वरूप घोतित करते हैं। जो सृजन का प्रतीक है। ( मायावरण का प्रतीक है)

दक्षिणामूर्ति शिव के दाहिने हाथ पीछे वाला में डमरू सृजन का प्रतीक है क्योंकि पौराणिक मान्यता के अनुसार डमरू के निनाद का एक आवर्तन कल्प का निर्माण करता है। वही बाँए पिछले हाथों में अग्निशिखा है जो संहारक है नाश का प्रतीक है इन दोनो ही हाथों के मध्य विराजित श्रीमुख है जो स्थिति का प्रतीक है। अत एव सृष्टि-स्थिति-संहार को धारण किए हुए दक्षिणामूर्ति है। जैसे कि गीता में भी कहा गया है-

अविभक्तं च भूतेषु विभक्तमिव च स्थितम्।
भूतभर्तृ च तज्ज्ञेय ग्रसिष्णु प्रभविष्णु च।।[159]

158 -अभिज्ञान शाकुन्तलम् प्रथमोऽङ्क मङ्गलाचरण ।।1।।

159 क्षेत्र क्षेत्रज्ञ विभागयोगाख्य त्रयोदश अध्याय श्लोक- 16 वाँ

यही दृष्टि अथर्ववेद के गणपति अथर्वोपनिषद के छठे मन्त्र में भी दिखाई देती है-
त्वं ब्रम्हा त्वं विष्णुस्त्वं रूद्रस्त्वमिन्द्रस्त्वमग्निस्त्वं वायुस्त्वं सूर्यस्त्वं चन्द्रमास्त्वं ब्रम्हा भूर्भुवः स्वरोम।।6।।

साथ ही एको देवः सर्वभूतेषु गूढः[160] इत्यादि द्वारा एक ब्रह्म की अर्थात् एकमेवाद्वितीयम् की स्थापना दक्षिणमूर्ति के श्रीविग्रह से अभिज्ञापित होता है। इसके अतिरिक्त सर्प शक्ति का पर्याय है। क्योंकि सर्प बिना हाथ- पैर होने के अपरान्त भी यादृच्छिक गति करने में सक्षम है। जो दक्षिणामूर्ति शिव ने दाहिने हाथ में डमरू को धारित करने हेतु उपयोग किया है। बाएँ अगले हाथ में भूर्जपत्र की पुस्तक धारण की है जो गुरूमूर्ति को लक्षित करती है। तथा आगे का दक्षिण हस्त चिन्मुद्रा में स्थित है वेदान्तमुद्रा कही जाती है। क्योंकि अनामिका आत्मा का प्रतीक है अंगुष्ठ ब्रह्म का प्रतीक है और दोनों का ऐक्य ही वेदान्त अभिप्रेत है। यह अष्टमूर्ति स्वरूप दक्षिणामूर्ति में दिखाई देता है।

***शिव की अष्टमूर्तिः वेदान्त का सूक्ष्मशरीर लिङ्ग शरीर ***

शिव की अष्टमूर्ति और वेदान्त के सूक्ष्म शरीर को एक दृष्टि से देखा जाय तो साम्य दिखाई देता है। अष्ट मूर्तियों मे पञ्चमहाभूत तथा सूर्य-चन्द्र व आत्मा चेतनता सम्मिलित है। वही वेदान्त के सूक्ष्म शरीर जिसे लिङ्ग शरीर या कारण शरीर कहा जाता है उसमें- सप्तदश अवयव समाहित है-




160 श्वेताश्वतरः 6.11



Jahnavi Sanskrit E-Journal (The First Unpaid Sanskrit E-Journal by सारस्वत-निकेतनम्) published by Dr. Bipin Kumar Jha
Avilable at jahnavisanskritejournal.in Issue 36-37 Vol- I Year 10. Date 09 March, 2019 JSEJ/36-37/I/10/2019
Since 2009
ISSN- 0976-8645
UGC RN-41039

- पञ्च ज्ञानेन्द्रिय - श्रोत्र ,त्वक, नेत्र, रसना, ध्राण
- पञ्च कर्मेन्द्रिय - वाक् वाणि, पाद, वायु और उपस्थ
- पञ्च वायु - प्राण, अपान, व्यान, उदान और समान
- मन
- बुद्धि
  - सूक्ष्मषरीराणि सप्तादषावयवानि लिङ्गशरीराणि।।
  - ज्ञानेन्द्रियाणि श्रोत्रत्वक्चक्षुर्जिह्नाध्राणाख्याणि।।
  - कर्मेन्द्रियाणि वाक्यपाणिपादवायूपस्थाख्याणि।।
  - वायवः प्राणपानव्यानोदानसमानाः।।
  - मनो नामसङ्कल्पविकल्पात्मकान्तःकरणवृत्ति।।
  - बुद्धिनार्म निष्चयात्मिकान्तःकरणवृत्तिः।।[161]

यदि सूक्ष्मता से देखें तो ज्ञानेन्द्रिय, कर्मेन्द्रिय तथा पञ्चवायु पञ्चमहाभूतों से निकले है। तब वे पञ्चमहाभूतस्वरूप ही है। कार्य होने सके कारण अपने कारण पञ्चमहाभूतों में समाहित है। इसी प्रकार अष्टमूर्ति स्वरूप दक्षिणामूर्ति में सूर्य या सविता मेधा अर्थात् बुद्धि का प्रतीक है।[२]और चन्द्रमा मन से उत्पन्न होकर मन का प्रतीक है।[3] अब यदि समग्रता से देखें तो दक्षिणामूर्ति के अष्टमूर्ति तथा वेदान्त के लिङ्ग शरीरावयव पूरक ही दिखाई देते हैं।

| अष्टमूर्ति | लिङ्गशरीर |
|---|---|
| पञ्चमहाभूत | पञ्चज्ञानेन्द्रिय, पञ्चकर्मेन्द्रिय, पञ्चवायु |
| सूर्य | बुद्धि |
| चन्द्रमा | मन |
| आत्मा | उपादान /अधिष्ठान रूप |

इस भाँति संसार का मूल लिङ्गशरीर ही धारणकर्ता अष्टमूर्तिरूप दक्षिणामूर्ति का स्वरूप ही वेदान्त-तत्त्व-व्याख्या कर देता है।

- ज्ञानेन्द्रियाणि एतान्याकाशादीनां सात्विकांशेभ्यो व्यस्तेभ्यः पृथक-पृथक क्रमेणोत्पद्यन्ते।.........एतानि पुनराकाशादीनां रजोंऽशेभ्यों व्यस्तेभ्यः पृथक् पृथक् उत्पद्यन्ते।[162]
- भूर्भुर्व स्वः तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि धियो यो नः प्रचोदयात्[163]
- चन्द्रमा मनसो जातश्चक्षोः सूर्यो अजायत ।।[164]

***दक्षिणामूर्ति शिव और आदिशङ्कराचार्य***



दक्षिणामूर्ति के विग्रह को देखें तो शिव तरुण योगी के रूप में वटवृक्ष के नीचे ध्यानमुद्रा में विराजित है। ज्ञानभास्वर स्वरूप लिए तारूण्य में भी गाम्भीर्य प्रस्फुटित होता है।उनके परितः वृद्ध ऋषिगण प्रणिपात



होकर ज्ञानवर्षा से स्नात दिखाई पडते हैं यद्यपि गुरू मौन है परन्तु षिष्य संशयविहीन है। इस परमशिव दक्षिणामूर्ति का इस प्रकार सचित्र वर्णन अपनी भक्तिसिक्ता-वाणी में करने वाले भारतीय-मेधा कमे मंन्त्रपूत-वरेण्य-श्रीमदादिशङ्कराचार्य है। श्रीमदादिशङ्कराचार्य ने अपने लघुजीवन (मात्र 32 वर्ष ) में अनेकानेक तत्त्व ग्रंथो का प्रणयन किया साथ

161 वेदान्तसार पृष्ठ 92 से 96 तक

162 वेदान्तसार पृष्ठ 92 से 96 तक

163 ऋग्वेद 4.62.10 3.

164 ऋग्वेद पुरूषसूक्त 10.90.13

ही चार्वाक, बौद्ध, जैन आदि वैदिक वितण्डावादों के सघन मेघो से आच्छन्न भारतीय-ज्ञानरूपी-अंशुमाली को अपनी दिव्य-ऋतम्भरा-वाणी द्वारा पुनः क्षितिज पर देदीप्यमान कर दिया। तमोविमूढ जनसमुदाय को परमाणुकारणवाद, आरम्भवाद, प्रधानकारणवाद, अनेकात्मवाद इत्यादि अनेक अधकचरे तर्को एवं वाक्याभासों की टर्र-टर्र से तमोविमूढ जनसमुदाय को दिग्भ्रान्त एवं पदभ्रष्ट कर रहे थे। सर्वत्र यही भाव विद्यमान था-

**किमिहः किङ्कायः स खलु किमुपायस्त्रिभुवनं**
**किमाधारो धाता सृजति किमुपादान इति च ।।**

ऐसे समय में वस्तुतः आचार्य शङ्कर ने किसी नवीन दर्शन को जन्म नहीं दिया प्रत्युत उन्होंने नीरक्षीर-विदग्ध-हंस के समान उपनिषत्काल से निरन्तर प्रवाहमान अद्वैत-परक-चिन्तनधारा को, जो दिग्दिगन्त से आने वाली शतश: विचारस्त्रोतस्विनियों के सङ्गम से अपनी पवित्रता और विशुद्धता को किसी सीमा तक खो चुकी थी। पुनः विजातीय-विचार-कल्मष से विविक्त कर पुण्यतमरूप में प्रवाहित किया। आचार्य की रचनाओं को देखें तो तीन रूपों में विभक्त कर सकते हैं भाष्यग्रन्थ, प्रकरण ग्रन्थ तथा स्तोत्ररचना, वन्त्र ग्रन्थ। इसके अतिरिक्त बहत्तर (72) मतों को अपने जीवन में परास्त किया। मात्र सोलह-वर्ष की अवस्था में ब्रह्मसूत्र-भाष्य का प्रणयन किया। अतः बिना आयास के ही हम दक्षिणमूर्ति के युवा गुरु परमशिव तथा युवागुरु शङ्कराचार्य (जिनके शिष्य पद्मपादादि उनसे वरिष्ठ ही थे ) की तुलना कर जाते हैं। यद्यपि स्वयं शङ्कराचार्य स्वयं दक्षिणमूर्ति परम-शिव के उपसक थे परन्तु उनका ज्ञान, आयु, तेज, साधना व शिष्यमण्डलरूपी आभाचक्र दोनों परमशिव व शंकराचार्य में समान ही दिखाई देता है। उनके बारें में प्रसिद्ध है-

**अष्टमवर्षे चतुर्वेदी द्वादष सर्वषास्त्रविद।**
**षोडशे कृतवान् भाष्यं द्वात्रिंषे मुनिरभ्यगात्।।**

क्षेत्रम् – क्षीयन्ते पदार्था प्राणिनो वाऽस्मिन्निति क्षेत्रम् . क्षेत्रपदस्य तात्पर्योऽयं वर्तते यत् , यत्र कृषिकर्म भवति तत् स्थानं क्षेत्र नाम्ना व्यवह्रियते । अर्थात् कृषिबीजस्य अधिष्ठानभूता पृथिवी भूमिर्वा क्षेत्रं भवति । ऋग्वेदे क्षेत्रस्य तुलना पात्र रुपेण कृता वर्तते । तद्यथा –

क्षेत्रमिव विममुस्तेजनेनं एनं पात्रमृभवो जेहमानम् । [6]

अस्य प्रयोगः गृह्यसूत्रेषु सीतायज्ञप्रसङ्गे भूम्यर्थे क्षेत्र शब्दस्य अपि प्रयोगः कृतः । कृषिकर्मसन्दर्भे क्षेत्रं कृष्यकृष्टभूमिर्वोच्यते । तथाहि प्रमाणरुपेण कोशवचनम् अपि द्रष्टुं शक्यते –

क्षीयते धान्यैरत्र क्षेत्रम् । [7]

अस्मिन् सन्दर्भे मुद्राराक्षसकारः विशाखदत्तेनापि एवमेव विवेचितम् । यथा –

चीयते वालिशस्यापि सत्क्षेत्र पतिता कृषिः । [8]

अर्थात् यस्यां भूमौ कृषिकार्यं भवति सा भूमि क्षेत्रनाम्ना व्यवह्रियते । प्राचीनकाले विविधसस्यनाम् (फसलानाम्) आधारं दृष्ट्वा क्षेत्रस्य नामकरणं कृतम् आसीत् । यथा – गोधूमक्षेत्रः , तिलक्षेत्रः , व्रीहिक्षेत्रः , शालिक्षेत्रः ,धान्यक्षेत्रः , इत्यादीनि बहूनि नामानि क्षेत्राधारितानि सन्ति। यथा चोक्तं केनापि कविना-

गोधूम शालिन नः क्षेत्रं वासव ।
व्रैहेयं व्रीहीनां भुवनं क्षेत्रम् ॥ [9]

एवमेव ऋग्वेदेऽपि सन्दर्भेऽस्मिन् वर्णितम् अस्ति । तथाहि -

क्षेत्रमिव वि मुमस्तेजनेनं एक पात्र मृम वो जेहमानन्।
उपस्तुता उपमं नाद्यमाना अमर्त्येषु श्रवइच्छमो ना ॥ [10]

शाल्यादिधान्यानामुत्पादनयोग्यानि तत्तत्क्षेत्राणि प्रसिद्धानि । तदनुसारेणैव कृषिकर्मणि प्रवृत्तः कृषकः क्षेत्राजीव इति नाम्नाभिहितः। कृषिभूम्यर्थे क्षेत्रशब्दस्य प्रयोगः लोकप्रसिद्धः अस्ति । अस्य प्रसिद्धेः आधारः एष एव प्रतीयते यत् शरीरमाश्रित्यैव यथा आत्मा बीजरुपं संस्थाप्य चीयते तथैव भूमिं विना बीजसन्तानं, प्ररोहः, धान्योत्पत्तिश्च नैव भवितुमर्हति । एवं क्षेत्रं भूमिः पृथिवी योनिः अपि उच्यते । कृषिकर्मणि घटकद्वयस्य अनिवार्यता वर्तते । बीजं क्षेत्रञ्च । तत्र जिज्ञासा जायते यत् उभयोः अपि बीजक्षेत्रयोः कस्य प्राधान्यं भवति , तत्र कश्चित् बीजं प्रधानं मन्यते कश्चित् क्षेत्रं कश्चिच्च बीजक्षेत्रयोः समस्थितिः मन्यते । अत्र प्रसङ्गे मनुः स्वमतं प्रस्तौति । तदनुसारं बीजक्षेत्रयोरुभयोरपि उत्कृष्टत्त्वं उत्तमधान्यार्थमावश्यकम् । यथोक्तं मनुना –

सुबीजं चैव सुक्षेत्रे ज्ञातं सम्पद्यते यथा ।
बीजमेके प्रशंसन्ति क्षेत्रमन्ये मनीषिणः।
बीजक्षेत्रे तथैवान्ये तत्रैषा तु व्यवस्थितिः ॥ [11]

कृषि कार्येषु अक्षेत्रे दुष्टायां विकृतायां वा भूमौ उप्तं बीजं मध्य एव विनश्यति , एवमेव बीजं विना क्षेत्रमूषरं भवति । तथाहि –

अक्षेत्रे बीजमुत्सृष्टमन्तरैव विनश्यति ।
अवीजकमपि क्षेत्रं केवलं स्थण्डिलं भवेत् ॥ [12]

विकृतायां भूमौ बीजस्य पोषणानुकूलाः परिस्थितयः न प्राप्यन्तेऽतः बीजस्य विकासो न सम्भवति । एवमेव वीजोत्सर्जनेन सस्य प्रसूर्भवति , उर्वरा च भवति ।

कृषिस्वरुपस्य अन्ये कारकाः –

कालोहि महतां धनम् इति धिया कृषेः स्वरुपनिर्णयार्थं समयः सूर्याचन्द्रमसौ च सहकारिणो भवन्ति । सर्वेषामपि प्राणिनां जन्ममरणे काले एव भवत। प्रसङ्गेस्मिन् उक्तं सुश्रुतसंहितायाम् –

कालो हि नाम भगवान्स्वयम्भूरनादिमध्यनिधनोऽत्ररसत्यापत्सम्पत्ती जीवितमरणे च मनुष्याणामायत्ते। स सूक्ष्मामपि कलां न लीयत इति काल । [13]

दैवज्ञानामनुसारं कृषेः वृद्ध्यादि सौरकालगणना चान्द्रकालगणनानुसारम् अनुमीयते । एवम् आयुर्वेदः सर्वेषामपि प्राणिनां शरीरसंरचनायां जलेन सम्बद्धं कफदोषम् अग्निना सम्बद्धं पित्तदोषं वायुना सम्बद्धं च वातदोषं प्रकृतिभूततत्त्वतया स्वीकरोति । तत्र सूर्यः अग्निनिर्धारकः , चन्द्रमाः जलनिर्धारकः , वायुश्च वातनिर्धारको भवति । जगति एतत्त्रयमपि स्वस्यकार्यैः त्रिदोषेषु समतोलनं स्थापयन्ति । यथोक्तं सुश्रुतसंहितायाम् –

शातांशुः क्लेदयत्युर्वीं विवस्वान्शोषयत्यपि ।
तावुभावपि संश्रित्य वायुः पालयति प्रजाः ॥ [14]



Jahnavi Sanskrit E-Journal (The First Unpaid Sanskrit E-Journal by सारस्वत-निकेतनम्) published by Dr. Bipin Kumar Jha
Avilable at jahnavisanskritejournal.in Issue 36-37 Vol- I Year 10. Date 09 March, 2019 JSEJ/36-37/I/10/2019
Since 2009
ISSN- 0976-8645
UGC RN-41039

एवमेव सूर्यचन्द्राभ्यां युक्तः वायुः कालानुसारं मेघानां सृष्टिं विधाय जलवर्षणं कारयति । उद्भिदानामङ्कुरणे हेतुः भवति, पुष्पफलानाम् अभिनिवर्तनस्य कारणं बीजाभिसंस्कारस्य कर्त्ता सस्याभिवर्धने साधको भवति क्लेदं च विशोषयति । तद्यथा –

सृष्टिश्च मेघानाम् अपां विसर्गः उद्भेदनं चोद्भिदानां पुष्पफलानामभिनिवर्तनं बीजादिसंस्कारः सस्याभिवर्धनम् अभिक्लेदोपशोषणे.........। [15]

कृषेः परिभाषा तादृशः कर्मणोऽर्थे कर्तुं शक्यते , येन एकेन बीजेन अनन्तानि सजातीयबीजानि जायन्ते । ब्रह्मणः चयनरुपेण बीजस्य च धान्यादिरुपेण चयनं इत्येव कृषेः स्वरुपनिर्धारणं करोति । कृषिः अस्मिन्नर्थे जीवसृष्टेः क्रमो भवति । भिन्नं क्लेदमेतद् भवति यत् क्षेत्रियःजीवः स्वयमेव चितिं क्षेत्रे बीजं तात्विकरुपेण निदधाति । ब्रीह्यादि कृषिश्च क्षेत्रियः क्षेत्रजीवो कर्षको वा भवति , यः क्षेत्रे अपरं बीजं निधापयति । उभयोः मध्ये भोग्यभोक्तृभावसम्बन्धः वर्तते । अनया रीत्या सनातनं कर्मफलचक्रं कृषेः यवब्रीह्यादिकं तात्त्विकस्वरुपं धान्यावाप्तये प्रवर्तितः कार्यक्रमः , कृषेः लौकिकं स्वरुपं भवति । कृषेः स्वरुपे मनीषिणः कृषिगोरक्ष्यवाणिज्यम् इति त्रयमपि विश्लेषितवन्तः । वैदिककालिककृषिकर्मप्रकारान् दृष्ट्वा स्पष्टमेतत्प्रतीयते , यत्तदानीं समये या कृषिव्यवस्था आसीत् सा परम्परा तु प्रायशः अद्यतनीया इवैव । उर्वरकक्षेत्राणि हलयन्त्रैः कर्षयित्वा बीजवपनयोग्यानि क्रियन्ते स्म , हलयन्त्रं सामान्यतया लाङ्गल सीरं नाम्ना उच्यते स्म , यस्य अग्रिमः अंशः सूचीसदृशः फाल इति कथ्यते स्म । तदानीं समये क्षेत्राणि प्रायशः उर्वरकयुक्तानि आसन् । प्राचीनकाले उर्वरकरुपेण अर्थात् खादनिमित्तं गोमयं करीषं वा प्रयुज्यते स्म । तस्मिन् समये धान्यनामानि कालश्च अद्यतनीये काले उपलभ्यमानानीव । सस्यं वर्षे बारद्वयं उत्पद्यते स्म। तदानीन्तनकालेऽपि अवर्षणमिव अतिवर्षणञ्च कृषिकार्ये विघ्नरुपेणास्ताम् । वैदिकाः जनाः स्वकृषिकार्यार्थं वृष्टावेवावलम्बिता आसन् , एतस्मादेव कारणात् वेदे वृष्टिदेवस्य प्राधान्यं वरीवर्ति । वृत्रनाम्नः यः वृष्टेरवरोद्धा दैत्यो वर्तते ,सः स्वप्रवलशक्त्या मेघगर्भे स्थितानां जलं रुणद्धि स्म । तदा इन्द्रः स्ववज्रेण वृत्रं हत्वा प्रच्छन्नं जलं वर्षयति स्म , नदीश्च प्रवहमानां विदधाति स्म । वैदिकदेवमण्डले जलवर्षणकारणात् यादृशं महत्त्वम् इन्द्रस्य वर्तते तादृशं प्राधान्यम् अन्येषां केषाञ्चिदपि देवानां न वर्तते । यतोहि इन्द्रप्रदत्तवृष्टिमाध्यमेनैव कृषिकार्यं भवति , कृषिकार्यानन्तरमेव सस्यादिकं भवति , तेन अन्नेन एव अस्माकं भरणपोषणं भवति । एतस्माद् कारणात् एव देवेषु इन्द्रस्य महन्महत्त्वं वर्तते । वैदिकार्याणाञ्जीवननिर्वाहनार्थं कृषिकर्मणः एतावन् महत्त्वम् उपयोगित्त्वञ्च वर्तते , यत्तैः क्षेत्रपति नाम्नः देवस्य पृथक् सत्ता एव स्वीकृता । तञ्च क्षेत्रपतिं स्वक्षेत्राणां सस्यसम्पन्नतायै प्रार्थितवन्तः । अस्य देवस्य चर्चा ऋग्वेदे प्राप्यते । तद्यथा –

इन्द्रः सीतां नि गृह्णातु तां पूषानु यच्छतु ।
सा नः पयस्वती दुहामुत्तरामुत्तरां समाम् ॥

अपि च –

शुनं नः फाला विकृषन्तु भूमिं शुनं कीनाशा अभि यन्तु वातैः ।
शुनं पर्जन्यो मधुना पयोभिः शुनासीरा शुनमस्मासु धत्तः ॥ [16]

एतावता अध्ययनेन निष्कर्षरुपेण वच्मि यत् वैदिककालिकं यत् कृषेः स्वरुपं वर्तते ,तत् स्वरुपं प्रायशः अद्यतनसमये अपि दृश्यते । प्राविधिकयुगानुदृष्ट्या काचित् भिन्नता वर्तते एव । परं प्रायशः मुख्या अंशाः तदानीन्तनवत् एव दृग्गोचरीभूता भवन्ति ।

## सन्दर्भग्रन्थसूची

1. ऋग्वेदः -10.34.13 पण्डित रामगोविन्द त्रिवेदी , चौखम्बा विद्याभवन वाराणसी , 2011
2. ऋग्वेदः -8.22.6 पण्डित रामगोविन्द त्रिवेदी , चौखम्बा विद्याभवन वाराणसी , 2011
3. ऋग्वेदः – 1.117.21 पण्डित रामगोविन्द त्रिवेदी , चौखम्बा विद्याभवन वाराणसी , 2011
4. अथर्ववेदः – 8.10.24 पं॰रामस्वरूपशर्मा गौडः , चौखम्बा विद्याभवन वाराणसी , 1995
5. मनुस्मृतिः – 10.72 हरगोविन्दशास्त्री ,चौखम्भा संस्कृत भवन , 2009
6. ऋग्वेदः – 1.110.5 पण्डित रामगोविन्द त्रिवेदी , चौखम्बा विद्याभवन वाराणसी , 2011
7. अमरकोशः – वैश्यवर्गः – 12 हरगोविन्दशास्त्री ,

चौ॰ संस्कृत सीरीज वाराणसी , 2005
8. मुद्राराक्षसः –श्लोकः 3 चौखम्बा विद्याभवन वाराणसी , 1994
9. यथाकथितम्
10. ऋग्वेदः – 1.110.105 पण्डित रामगोविन्द त्रिवेदी , चौखम्बा विद्याभवन वाराणसी , 2011
11. मनुस्मृतिः – 10.69,70 हरगोविन्दशास्त्री ,चौखम्भा संस्कृत भवन , 2009
12. मनुस्मृतिः – 10.73 हरगोविन्दशास्त्री ,चौखम्भा संस्कृत भवन , 2009
13. सुश्रुतसंहिता सूत्रस्थानम् – 6.2 खेमराज श्रीकृष्णदास प्रकाशन , बम्बई -4, 1998
14. सुश्रुतसंहिता सूत्रस्थानम् – 6.7 खेमराज श्रीकृष्णदास प्रकाशन , बम्बई -4, 1998
15. चरकसंहिता – 12 चौखम्बा सुरभारती प्रकाशन वाराणसी , 2005
16. ऋग्वेदः – 4.97. पण्डित रामगोविन्द त्रिवेदी , चौखम्बा विद्याभवन वाराणसी , 2011



Jahnavi Sanskrit E-Journal (The First Unpaid Sanskrit E-Journal by सारस्वत-निकेतनम्) published by Dr. Bipin Kumar Jha
Avilable at jahnavisanskritejournal.in Issue 36-37 Vol- I Year 10. Date 09 March, 2019 JSEJ/36-37/I/10/2019
Since 2009
ISSN- 0976-8645
UGC RN-41039

Subscription ID T-235110999 Received on- 09/01/2018

# महर्षिपतञ्जलिः तन्महाभाष्यञ्च

गिरीशकुमारमिश्रः
गवेषकः-व्याकरणम्, का.सि.द.वि.वि., दरभंगा

---

**प्रमुखशब्दाः** – भषा, पतंजलिः, लोकः, महाभाष्यम्।

**शोधसारः** -*इह खलु संसारे लोकव्यवहारनिर्वणाय भाशैव प्रधानभावं जुश्ते। लोकाः भाशामन्तरेण नैजमा ायं प्रका ायितुं समर्था न प्रभवन्ति। अपरञ्च भाशयापि सुसंस्कृतया भवितव्यमिति। सुविदितं यत्समग्रमपि पुरातनं वाङ्मयं संस्कृतमाश्रित्यावतिष्ठते। तद्ध्ययनञ्च संस्कृतभाशायाः ज्ञानं विना दुरूहमस्ति। संस्कृतभाशास्थसाधु ाब्दज्ञानाय व्याकरणाध्ययनं प्रधानं प्रयोजकमस्ति।*

व्याकरण ाास्त्रस्य सर्वाति ाायि महत्त्वं वर्तते। एतेनैव सर्व ाास्त्रेशु प्रवे ास्याधिकारो लभ्यते। तद्यथा–[1]

**'यो वेद वेदवदनं सदनं हि सम्यक्,**
**ब्राहम्याः स वेदमपि वेद किमन्य□ाास्त्रम् ।**
**यस्मादतः प्रथममेतदधीत्य धीमान्,**
**भाास्त्रान्तरस्य भवति श्रवणेऽधिकारी ।।'**

व्याकरण ाास्त्रमिदं ाट्स्वङ्गेशु प्रधानत्वेन मुखस्थानत्वं भजते। तद्यथा–[2] मुखं व्याकरणं स्मृतमित। अपि च–[3] ' ाट्स्वङ्गेशु प्रधानं व्याकरणं, प्रधाने च कृतो यत्नः फलवान् भवति' ति, तस्मादध्येयं व्याकरणमि' ति। तत्र बहुभिराचार्यैरनेकानि व्याकरणानि प्रणीतानि। तेशु लौकिकवैदिकभयप्रक्रियालङ्कृतत्वात् पाणिनीयव्याकरणस्यैव वेदाङ्गत्वं स्वीक्रियते। तत्र पाणिनीयव्याकरणे पाणिनीकृताश्टाध्याय्या सहैव कात्यायनकृतं वार्तिकं, पतञ्जलिकृतं महाभाश्यञ्चमूलग्रन्थत्वेन मान्यंवर्तते। अतएव पाणिनीव्याकरणविशये 'त्रिमुनिव्याकरणमि'त्युच्यते। पाणिनेरनन्तरं कात्यायनो वार्तिकानि व्यरचयत्। एवमेव तदनु च भगवान् पतञ्जलिरपि पूर्वदृश्टानि भाास्त्राणि साक्षात्कृत्य तदनुगुणं भाश्यं निर्ममे। महर्शिपाणिनिः सूत्रकाररूपेण, महर्शिकात्यायनः वार्तिककाररूपेण, महर्शिपतञ्जलि च महाभाश्यकाररूपेण प्रसिद्धाः सन्ति। तद्यथा उक्तम्–[4]

**'वाक्यकारं वररुचिं भाश्यकारं पतञ्जलिम् ।**
**पाणिनिं सूत्रकारञ्च प्रणतोऽस्मि मुनित्रयम् ।।'**

अतएव एभिस्त्रिभिर्मुनिभिः प्रवर्तितत्वादेव 'त्रिमुनिव्याकरणमि'ति वैयाकरणव्यवहारः।

एतेशु त्रिमुनिशु महाभाश्यकारो भगवान् पतञ्जलिः भोशनागस्यावताररूपेण स्तूयते। जनश्रुत्यनुसारेण नृत्तावसाने नटराजराजः ि ावः पाणिनेः तपसा प्रसादितः ढक्कां नादयामास। तेन चतुर्द ामाहे वरसूत्रण्यादाय पाणिनिर्व्याकरणं जग्रन्थ। कात्यायन चापिं तथैव तपसा ि ावं संतोष्य वार्तिकं प्रणीतवान्। तत्र सूत्रवार्त्तिकयोर्मतभेदं जातम्। इत्थं हि सूत्रवार्त्तिकयोर्मतभेदं विलोक्य व्याकरणस्याप्रचारं च दृश्ट्वा भगवान ि ावः स्वकण्ठावलम्बितं भोशनागंसमादिशत्– भूमण्डलं गत्वा भाश्यं रचेति। तदाज्ञां ि ारसा निधाय भोशः गोनर्ददे ो पुत्रार्थ तपन्त्या गोणिकायाः सूर्योपस्थापनार्थं प्रसारितेऽञ्जलौ पपात। भीतातपस्विनी त्वरया पृश्टवती– 'कोर्भवान्?' इति। भोश उवाच– सप्पोऽहम्। तपस्विन्या उक्तम्– रेफः क्व गतः'। भोश उवाच– त्वयापहृतः। प्रसन्नचित्ता सा तं पुत्ररूपेण पालयामासेति। स एव भोश अञ्जलौ पतनकारणात्पतञ्जलिरिति प्रसिद्धः।

तत्र भगवान् पतञ्जलिरनेकैर्नामभिः ग्रन्थेशु स्मर्यते। यथा गोनर्दीयः, गोणिकापुत्रः, नागनाथः, अहिपतिः, फणी, फणीभृत, भोशः, भोशराजः, चूर्णिकारः पदकार चेति। एवं बहुभिर्नामभिर्बहुधा परमप्रामाणिक आचार्यो भगवान् पतञ्जलिः स्मृतः स खलु कुत्रत्य इति सम्प्रत्यपि नैव नि ि चतम्। **पतञ्जलेः जन्मभूमिः कर्मभूमि□च–** म. म. ि ावदत्त ार्मणां मते पतञ्जलिरिति गोत्रनाम। गोत्रप्रवर्त्तकेशु पतञ्जलिरिति नाम दृ यते। केचिंत्तं गोनर्दीयसंज्ञया पौर्वापत्यं मन्यन्ते। मत्स्यपुराने हि गोनर्दजनपदः प्राच्यदे ोशु परिगणित इति। अपरे तु गोनर्दनाम्ना का मीरेशु त्रयाणां राज्ञां सत्त्वात्का मीरेशु हि गोनर्दजनपदोऽस्तीत्यपि मन्यन्ते। स हि महाभाश्ये पाटलिपुत्र– मथुरा– साकेत– कौ ाम्बीप्रभृतिनां जनपदां संस्मरति। 'गोनर्दीयः पतञ्जलौ'[5] इति

3 महाभाश्यम् (प्रदीपोद्योतसहितम्), पतञ्जलिः, गुरुप्रसाद भाास्त्री, प्रतिभा प्रका ान, भाक्तिनगर, नई दिल्ली, 1999

4 महाभाश्यम् (प्रदीपोद्योतसहितम्), हरि ांकर पाडेयः, श्रीसीताराम मुद्रण यन्त्रालय, बजरंगबली, वाराणसी, 1935

5 महाभाश्यम् (प्रदीपोद्योतसहितम्), श्रीभार्गव भाास्त्री, चौखम्बा संस्कृत प्रतिश्ठान, दिल्ली, 1987

6 वैयाकरणसिद्धान्तकौमुदी, गोपाल ाास्त्री नेने, चौखम्बा संस्कृत सीरीज ऑफिस, वाराणसी, 1968

7 काि ाका (न्यासपदमञ्जरी संहिता), जय ांकरलाल त्रिपाठी, सुधाकर मालवीयः, तारा प्रिंटिंग वर्क्स, कामेच्छा, वाराणसी, 1985

8 मत्स्यपुराणम्, गीताप्रेस, गोरखपुर, 2008

9 अश्टाध्यायी, भांकरदेव पाठकः, गुरुकुल वृन्दावन स्नातक भाोधसंस्थानान्तर्गत आदित्यप्रका ा विद्यापीठ, 2000

10 अश्टाध्यायी, रमा ांकर मिश्रः, मोतीलाल बनारसीदास, वाराणसी, वि. सं. 2054

11 वेदान्तसूत्रम, स्वामी योगीन्द्रानन्दः, चौखम्बा विद्याभवन, वाराणसी, 1996



Jahnavi Sanskrit E-Journal (The First Unpaid Sanskrit E-Journal by सारस्वत-निकेतनम्) published by Dr. Bipin Kumar Jha
Avilable at jahnavisanskritejournal.in Issue 36-37 Vol- I Year 10. Date 09 March, 2019 JSEJ/36-37/I/10/2019
Since 2009
ISSN- 0976-8645
UGC RN-41039

Subscription ID T-235111967 Received on- 06/12/2018

# आधुनिकपरिप्रेक्ष्ये शास्त्रस्य अध्ययनम् अध्यापनञ्च

भगवानसामन्तरायः
सहायकाचार्यः, राष्ट्रियसंस्कृतसंस्थानम्, वेदव्यासपरिसरः, बलाहारः (हिमाचलप्रदेशः)

---

**प्रमुखशब्दाः** – अद्धापनम्, शास्त्रम्, अध्ययनम्, शिक्षा।

**शोधसारः** -*परमकरुणावताराणाम् ऋषिमुनीनां तपःफलसंभूतानि शास्त्रतत्त्वानि विद्वद्भिश्च परिपुष्टानि लोकोपकाराय प्रावर्त्तन्त इति निश्चप्रचम् । तत्र च वादविवादरूपः तर्कविष्टम्भः तत्त्वस्य निष्कर्षतां प्रामाणिकतां च द्योतयतीति तु सत्यम् । किन्तु वैदुष्यविशेषावगाहित्वेन शब्दजालक्लेशमनुभूय मन्दमतयः शास्त्रतात्पर्यं नाभ्युपागच्छन् । किञ्च ते शास्त्रतात्पर्यमनभिप्रेत्य तत्र लोकोपकारकं तत्त्वं किमपि नास्तीति शास्त्राध्ययनात् निवृताः । गच्छता कालेन शास्त्रं केवलं विदुषामेव ज्ञानबर्धकं तन्त्रं, न तत्र सामान्यजनानामुपकाराय किञ्चिदुक्तमस्तीति शास्त्राध्ययनं प्रति वैमनस्यं समजायत ।परं च तत्र तत्र शाश्त्रेष्वपि सामाजिकतत्त्वानि सामान्यजनोपयोगीनि अवश्यमुपलभ्यन्ते । किन्तु आधुनिकशास्त्रविदां दृष्टिः तत्र न प्रसरति, अपि तु केवलं वाद-विवाद-तर्क-पराजयेष्वेव सीमीता भवति । शास्त्रस्य मौलिकं तत्त्वं, यच्च लोकोपकारि तद् बहुदूरे तिष्ठति । शाश्त्रं नाम यद् हिताहितमनुशास्ति उपदिशति वा इति । उपदेशः कस्य कृते इति चेत्, सामान्यजनानां कृते एव । साधारणजनानामुपकाराय खलु उपदेशाः, येन तेषां तदनुगुणं जीवनं पुण्यमयं सुखकरं च भूयात् । अतः सर्वेषामपि शाश्त्राणामुपयोगः केवलं सामान्यजनकल्याणायैवेति निश्चप्रचम्।*

शास्त्रस्य मुखद्वयं सरलं कठिनमिति तु सर्वैः ज्ञायत एव । सर्वदा स्थितिरियं समभावेन प्रचलितादृश्यत । यथा आचार्यश्रीमच्छङ्करभगवत्पादानां पारम्परिकशास्त्रसंप्रदायानुगुणं प्रसन्नगम्भीरं भाष्यमासीत् । तथालोकसामान्यानां कृते वेदान्ततत्त्वावबोधाय सरलसुललितहृद्यानि अत्यन्तरुचिकराणि मनोरमाणि छन्दोबद्धानि पद्यान्यप्यासन् । एवं प्रकारेण कवचित् सूत्र-भाष्य-व्याख्या-टीकादिषु शास्त्रपरम्परा सुसमृद्धा दृश्यते स्म । कवचिच्च लघु-लघुवाक्यवृत्तिभिः प्रकरणग्रन्थात्मना शास्त्रतत्त्वं सार्वजनीनं भवति स्म । गच्छता कालेन उभयमपि अवरुद्धम् ।
तत्र अनेकानि कारणानि भवितुमर्हति । तद्यथा-

1. शास्त्रस्य काठिन्यं बुद्धौ नावारोहत् ।
2. सरलं कर्त्तुं तलस्पर्शिज्ञानस्याभावः, बुद्धिवैशारद्यस्य तत्सूक्ष्मतीक्ष्णतायाश्च न्यूनता
3. युगोपयोगिशिक्षणतन्त्रे अनभिज्ञता
4. उपादेयता (Accountablity)

इतोऽपि अन्यानि कारणानि स्युः । अवश्यं विचारणीयोऽयं विषयः । अत्रापि विषयद्वयं चिन्त्यते यत्, किं वयं 1. शास्त्रपरम्पराशैलीं परिवर्त्तयामः उत 2 शास्त्रपरम्परायामनुभूयमानानां काठिन्यं निवारयामः । तत्र शास्त्रस्य सरलं मुखं तु प्रकरणग्रन्थमाध्यमेन क्वचिद्वयं प्राप्नुमः। तत्रापि सरलात् सरलतरं कर्त्तुं प्रयासो विधेयः। किन्तु समस्या तत्रैव महती वर्त्तते यत्, शास्त्रपरम्परायामनुभूयमानानां काठिन्यनिवारणे । शास्त्रपरम्परायां काठिन्यनिवारणे यच्च व्याख्यानं टीका वोपलभ्यते, तदितोऽपि कठिनायते कवचित् । अतः एतत्सर्वं समाहृत्य किञ्चिद्विशिष्टं गभीरं च विचारणीयम् । शाश्त्रीयपरम्परा तथैव तिष्ठतु नाम, यतो हि भारतीयसंस्कृतेः समृद्धेश्च सा परिचायिका वर्त्तते । किन्तु तस्य सरलं रूपम् आधुनिकतन्त्रज्ञानशैल्या समाजस्य पुरतः परिवेषणीयम्, येनास्माकं प्राचीनशास्त्रपरम्परा सर्वजनादृता भवेत् । यथोच्यते- तदेव सामान्यम् ओदनं विशिष्टपात्रोपशोभितं विशिष्टमोदनमिति । एवमेवलोकरुचये समयानुगुणम्

Jahnavi Sanskrit E-Journal (The First Unpaid Sanskrit E-Journal by सारस्वत-निकेतनम्) published by Dr. Bipin Kumar Jha
Avilable at jahnavisanskritejournal.in Issue 36-37 Vol- I Year 10. Date 09 March, 2019 JSEJ/36-37/I/10/2019
Since 2009
ISSN- 0976-8645
UGC RN-41039

ईषत्परिवर्त्तनमिष्यते । प्राचीनशास्त्रपरम्परानुगुणं वैदुष्यपूर्णानि रचनानि भवेयुः। तेन समं मनोवैज्ञानिकशिक्षणतन्त्रदृष्ट्यापि तेषां वैदुष्यपूर्णरचनानां सरलतमरूपाणि पाठ्यसहकारिसामग्रीरूपेण स्युरिति । तादृशरीत्या कश्चन प्रयासविशेषः अस्मिन्नाधुनिकयुगे प्रायशो नैव परिलक्ष्यते । अतस्तत्र वस्तुस्वरूपप्रदर्शनार्थं दिङ्मात्रमुदाह्रियतेयथा–

आचार्यमधुसूदनसरस्वतीप्रणीते अद्वैतसिद्धिग्रन्थे दृश्यत्वाद् इति मिथ्यात्वहेतुप्रकरणे विद्यमाना यथाग्रन्थपङ्क्तिः – अथ दृश्यत्वहेतूपपत्तिः । ननु मिथ्यात्वे साध्ये हेतुकृतं यद्दृश्यत्वम्, तदप्युपपादनीयम् । तथा हि- किमिदं दृश्यत्वम् । वृत्तिव्याप्यत्वं वा । फलव्याप्यत्वं वा । साधारणं वा । कदाचित् कथञ्चित् चिद्विषयत्वं वा । स्वव्यवहारे स्वातिरिक्तसंविदन्तरापेक्षानियतिर्वा । अस्वप्रकाशत्वं वा । नाद्यः, आत्मनो वेदान्तजन्यवृत्तिव्याप्यत्वेन तत्र व्यभिचारात् ।अत एव न तृतीयोऽपि । नापि द्वितीयः, नित्यातीन्द्रिये शुक्तिरूप्यादौ च तदभावेन भागासिद्धिसाधनवैकल्ययोः प्रसंगात् । नापि चतुर्थः, ब्रह्म पूर्वं न ज्ञातम्, इदानीं वेदान्तेन ज्ञातम्, इत्यनुभवेन आत्मनि व्यभिचारात् । नापि पञ्चमः, ब्रह्मण्यपि अद्वितीयत्वादिविशिष्टव्यवहारे संविदन्तरापेक्षानियतिदर्शनेन व्यभिचारात् । नापि षष्ठः, स हि अवेद्यत्वे सत्यपरोक्षव्य-वहारयोग्यत्वाभावरूपः । तथा च शुक्तिरूप्यादेरपि अपरोक्षव्यवहारयोग्यत्वेन साधनवैकल्यादिति चेन्मैवम्, फलव्याप्यत्वव्यतिरिक्तस्य सर्वस्यापि पक्षस्य क्षोदक्षमत्वात् ।

अत्र कश्चन सामान्यसंस्कृताभिज्ञजनोऽपि अर्थाव-बोद्धुमवश्यं काठिन्यमनुभूयेत । कुतः इति चेत्, शास्त्रस्य तत्वाववोद्धुं तलस्पर्शिज्ञानस्यावश्यकता वर्त्तते । वेद-व्याकरण-कोश-पुराणसाहित्य-विविधदर्शन-धर्म-नीत्यादिशास्त्राणां ज्ञानमपेक्षते ।यतो हि तत्र प्रत्येकशास्त्राणाम् अन्यैः शास्त्रैः सह परस्परसम्बन्धो नितरां वर्त्तते। तेन ज्ञानेन विना सः शास्त्रस्य याथार्थ्यं तत्त्वमवबोधयितुं न शक्नोति । अतः तादृशतलस्पर्शिज्ञानवता जनेन आधुनिक-शैक्षणिकतन्त्रज्ञानप्रयोगेन उपयोगेन च एतादृशमभिनवं कार्यं कर्त्तुं शक्यते। उदाहरणं यथा – आधुनिकशैक्षणिकतन्त्रे इदानीं Distance Mode Learning , Self-Learning Study Materias(SLM), Open Learning Study Materials, Short Learning Audio-Visual kits , Short video /film clips, MOOCS and etc.इत्यादयः विलसन्तः संदृश्यन्ते । तच्छैल्याधारेण तदनुगुणं वा रुचिकराः शास्त्रपाठ्यसामग्र्यः सरलतया निर्मातव्याः ।

उपर्युक्तस्य अद्वैतसिद्धिग्रन्थस्य गद्यखण्डस्य आधुनिकशैक्षणिकतन्त्रदृष्ट्या पाठ्यसामग्री कीदृशी भवेदिति यथामति दिङ्मात्रमत्र उदाह्रियते। तद्यथा –

1. सम्पूर्णगद्यखण्डस्य यावत् सरलं पदच्छेदः करणीयः।

2. उपक्रमः(Introduction)- अत्र मुख्यतया त्रयः विन्दवः(Points) भवेयुः । यथास्मिन् गद्यखण्डे (क) मिथ्यात्वम् (ख) मिथ्यात्वानुमानम् (ग)मिथ्यात्वानुमाने हेतवः ।

3. उद्देश्यम् (Aim & Objectives/Learning Outcome)- अनुमानस्वरूपे हेतूनां महत्त्वं ज्ञास्यते । मिथ्यात्वे अथवा अन्यत्र यत्र क्वापि अनुमाने हेतुं पश्यति चेत्, तत्र उद्भविष्यमाणानां दोषाणां निराकरणे उपायान् ज्ञातुंशैलीश्च प्रयोक्तुं शक्नोति ।

4. पाठ्यसंरचना(Data Structure)–



Jahnavi Sanskrit E-Journal (The First Unpaid Sanskrit E-Journal by सारस्वत-निकेतनम्) published by Dr. Bipin Kumar Jha
Avilable at jahnavisanskritejournal.in Issue 36-37 Vol- I Year 10. Date 09 March, 2019 JSEJ/36-37/I/10/2019
Since 2009
ISSN- 0976-8645
UGC RN-41039

**शीर्षकम्(Topic)- दृश्यत्वहेतूपपत्तिः**

**(अ) दृश्यत्वात् -**

1. वृत्तिव्याप्यत्वम् – सरलं विवरणम्.......
2. फलव्याप्यत्वम् -सरलं विवरणम्........
3. साधारणम् -सरलं विवरणम्........
4. कदाचित् कथञ्चित् चिद्विषयत्वम् -सरल विवरणम्.......
5. स्वव्यवहारे स्वातिरिक्तसंविदन्तरापेक्षानियतिः -सरलं विवरणम्.......
6. स्वप्रकाशत्वम् -सरलं विवरणम्

**(आ) पूर्वपक्षोक्ताः दोषाः–**

1. नाद्यः – आत्मनि व्यभिचारात् -व्यभिचारदोषस्य स्वरूपं सोदाहरणं वक्तव्यम् ......

2.नापि द्वितीयः – (क) भागासिद्धिः
(ख) साधनवैकल्यम्
इति दोषद्वययोः स्वरूपं सोदाहरणं वक्तव्यम् ......

3.न तृतीयोऽपि -व्यभिचारात् – सोदाहरणं स्पष्टं करणीयम्..........

4.नापि चतुर्थः -आत्मनि व्यभिचारात् -सोदाहरणं स्पष्टं करणीयम्..........

5.नापि पञ्चमः -ब्रह्मण्यपि अद्वितीयत्वादिविशिष्टव्यवहारे व्यभिचारात् - सोदाहरणं स्पष्टं

6.नापि षष्ठः - साधनवैकल्यात् - सोदाहरणं स्पष्टं करणीयम्..........

**(इ) सिद्धान्तः–**

- फलव्याप्यत्वव्यतिरिक्तस्य सर्वस्यापि पक्षस्य क्षोदक्षमत्वात् ।

अत्र विषयबोधनावसरे यावच्छक्यं पाठ्य-सहायकसामग्रीणां यथा – दृश्य-श्रव्योपकरणानि(Audio-Visual kits/ PPTs/Short Video Clips),रेखाचित्राणि(Graphs/Flow charts) च उपयोक्तुं प्रयोक्तुं वा शक्यन्ते ।यथा अत्र – लघुप्रश्नाः/प्रायोगिकप्रश्नाः(CYPs/SAQs/Activitie) –

(i) दृश्यत्वात् इति हेतौ कति विकल्पाः सन्ति ?
(ii) दृश्यत्वात् इति हेतौ पञ्चमः विकल्पः कः ?
(iii) तृतीयविकल्पस्वीकारे कुत्र व्यभिचारः
(iv) को नाम साधनवैकल्यदोषः ?
(iv) व्यभिचारदोषस्य एकं लौकिकम् उदाहरणं लिखत ।
(vi)विकल्पदोषान् एकत्र संकलनं कुरुत ।

**सारांशः(Summary)** -जगन्मिथ्यात्वे अनुमानप्रमाणं प्रवर्त्तते । तत्र अनुमानप्रमाणं यथा – प्रपञ्चो मिथ्या दृश्यत्वात्, शुक्तिरूप्यवत् दृश्यत्वात् । अस्मिन् अनुमानवाक्ये दृश्यत्वात् इति हेतुः प्रदर्श्यते । दृश्यत्वात् इति हेतुः न उपपद्यते इति कश्चन पूर्वपक्षाग्रहः । किं नाम दृश्यत्वम् इति तत्रषड् विकल्पाः प्रदर्श्यन्ते । सर्वेऽपि विकल्पाः दोषयुक्ताः इतिकृत्वा दृश्यत्वात्इतिहेतुः न उपपद्यते । तत्र सिद्धान्तस्तु केवलं द्वितीयविकल्पं परित्यज्य अवशिष्टानाम् अन्येषां पञ्च विकल्पानां दोषान् निराकरोत् ।

**काठिन्यनिवारणम्(Grossary)**

उपपत्तिः,वृत्तिव्याप्यत्वं,फलव्याप्यत्वं,स्वातिरिक्तसंविदन्तरापेक्षानियतिः,वेदान्तजन्यवृत्तिव्याप्यत्वं, भागासिद्धिः, साधनवैकल्यं,व्यभिचारः,अवेद्यत्वे सति अपरोक्षव्यवहारयोग्यत्वं,क्षोदक्षमत्वम् ।

**सन्दर्भग्रन्थाः(Reference/Suggested Readings)**– अद्वैतसिद्धिः – बालवोधिनीटीकोपेता, सिद्धान्तविन्दुः, वेदान्तपरिभाषा, सिद्धान्तलेशलंग्रहः,

वेदान्तसारः, पञ्चदशी, न्यायसिद्धान्तमुक्तावली, तर्कसंग्रहः-न्यायबोधिनीटीकोपेतः इत्यादयः । अत्रापि Bibiliographyइवसंकेतादिकमवश्यं लेखनीयम् । आवश्यकतायां सत्यां Refered Journal/magazine इत्यादीनामपि संदर्भः संकेतश्चावश्यं देयौ भवतः ।

एवं प्रकारेण शास्त्रीयग्रन्थानां पाठ्यांशत्वेन विभज्य आधुनिकशैक्षणिकतन्त्रदृष्ट्यापाठ्यसंरचनाकर्त्तुं शक्यते इति कश्चन उपायविशेषः प्रस्तुतः इत्यस्मिन्आधुनिकपरिप्रेक्ष्ये शास्त्रस्य अध्ययनम् अध्यापनञ्च शीर्षके ।

## सन्दर्भग्रन्थसूची

1. **प्राचीन** भारतीय शासन पद्धति, **प्रो.अनन्त सदाशिव**- विश्वविद्यालय प्रकाशन,वाराणसी, 2002
2. भारतीय राजनीतिक विचारक,डा.आनन्द प्रकाश अवस्थी- लक्ष्मी नारायण अग्रवाल, आगरा, 2003-04
3. महाभारत,कृष्ण द्वैपायन व्यास, गीत प्रेस गोरखपुर. 2013
4. वाचस्पत्यम्. श्री तारानाथ, तर्कवाचस्पति, राष्ट्रियसंस्कृतसंस्थान, नई दिल्ली,
5. वाल्मीकी रामायण, गीता प्रेस गोरखपुर,वि,सं., 2020.
6. संस्कृत-हिन्दी कोश,वामन शिवराम आप्टे, रचना प्रकाशन,जयपुर,२००६



Jahnavi Sanskrit E-Journal (The First Unpaid Sanskrit E-Journal by सारस्वत-निकेतनम्) published by Dr. Bipin Kumar Jha
Avilable at jahnavisanskritejournal.in Issue 36-37 Vol- I Year 10. Date 09 March, 2019 JSEJ/36-37/I/10/2019
Since 2009
ISSN- 0976-8645
UGC RN-41039

**Subscription ID 219710676 Received on- 01/12/2018**

# कतिपयशब्दानां साधुत्वासाधुत्वभ्रमनिवारणम्

जयकृष्णः
व्याकरण-प्राध्यापकः,राष्ट्रियसंस्कृतसंस्थानम्, दव्यासपरिसरः,
बलाहरः, प्रागपुरम्, कांगडा हि.प्र.

----------------------------------------------------------------

**प्रमुखशब्दाः** – महदानदः, उपवेशयति, पिताश्रीः, भ्रात्री, रचनात्मिका।

**शोधसारः -** *केषुचित् पञ्चषेषु शब्देषु अयं शब्दः साधुः स्यात् अथवा असाधुः स्यात् इति एतादृशः भ्रमः निवारितः भवतु इति कश्चन प्रयासः अस्मिन् शोधप्रबन्धे कृतः अस्ति। तत्र ह्याद्यः विचारः महानन्दः महदानदः इति शब्दद्वयम् आदाय कृतः। ततः उपवेशयति इति भवतु अथवा उपावेशयति इति भवतु इति स्पष्टता कृता। ततः भाषान्तरस्य प्रभावकारणात् भ्राताश्रीः इति पदं अबहुव्रीहौ पुंलिङ्गे अपि ये भवन्ति व्यवहरन्तः तेषां स्पष्टता कृता। सर्वान्ते रचनात्मिका इति प्रयोज्यमुत रचनात्मकी इति प्रयोज्यम् इति सप्रमाणं प्रत्यपादि।*

स्थितस्य प्रयोगस्य रक्षकं व्याकरणम्। परन्तु स्थितः सः प्रयोगः केनचित् शिष्टेन कृतः स्यात्। अशिष्टः प्रयोगः स्थितः चेत् तं तर्हि नूनमेव व्याकरणशास्त्रम् अस्थितं करोति। वर्तमाने संस्कृतेन सम्भाषणस्य परम्परायाः पुनरुद्भावः राष्ट्रे जायमानः अस्ति इति यद्यपि संतोषास्पदम् अस्ति तथापि जायमाने सम्भाषणे अनवधानात् दोषाणां स्खालित्यानाञ्च अपि उत्पत्तिः दरीदृश्यते एव अनवधानकारणात्। दोषाणाम् एषां निवारणाय प्रयासः तत्-तत्-समये नैकैः विद्वद्भिः क्रियमाणम् एव भवति परन्तु सामान्यस्य संस्कृतलोकस्य समग्रशब्दशास्त्रस्य अनध्ययनात् दोषाः पुनरपि जायन्त एव। अतः तेषां निवारणाय अधीतशब्दविद्यैः निश्चप्रचमेव प्रयत्नः विधेयः। अतः अत्र लेखे ये शब्दाः विचारार्थम् अचायिषत ते तावत् संस्कृतलोकस्य व्यवहारं श्रुत्वा एव सङ्कलिताः सन्ति। पत्रिकया अनया इमे विचाराः संस्कृतलोके प्रसरेयुः इति कृत्वा तेषामिह यथामति विवेचनं क्रियते।

## 1. महानन्दः / महदानन्दः

‘विवाहे **महानन्दः** भवति’, ‘विवाहे **महदानन्दः** भवति’ इति एवं प्रकारेण केचन द्वे वाक्ये स्तः। इदं वाक्यद्वयं प्रायशः समानम् एव अस्ति परन्तु द्वयोः वाक्ययोः मध्ये **महानन्दः, महदानन्दः** इति द्वयोः पदयोः किञ्चित् इव स्वरूपे भेदः अस्ति। एवं तर्हि द्वे अपि एते पदे दृष्ट्वा बुद्धौ चिन्तनं भवति यत् यथा एतयोः **स्वरूपे** भेदः किञ्चित् एव अस्ति किं तथा द्वयोः एतयोः पदयोः **अर्थे** अपि भेदः अस्ति अथवा न? एतयोः स्वरूपे अपि भेदः किमर्थम् अस्ति? इति अपि जिज्ञासा भवति। **महानन्दः** इति शुद्धम् अथवा **महदानन्दः** इति शुद्धम्? इति एतादृशी अपि शङ्का भवति कदाचित्। तर्हि आयान्तु! अतीव सरलैः व्याकरणस्य नियमैः द्वयोः अपि शब्दयोः रहस्यं जानीमः।

वस्तुतः **महानन्दः, महदानन्दः** इति द्वे अपि रूपे शुद्धे स्तः। परन्तु द्वयोः अपि अर्थे कश्चन भेदः अस्ति। **महानन्दः** इति अस्य पदस्य अर्थः अस्ति **महान् आनन्दः** इति। **महदानन्दः** इत्यस्य पदस्य अर्थः अस्ति **महताम् आनन्दः** इति। अधुना पुनः जिज्ञासा भवेत् यत् द्वयोः पदयोः एवम् अर्थभेदः भवति इति कथं ज्ञातं भवति? इति चेत् सरलतया एव ज्ञातुं शक्नुमः। **महानन्दः** इति पदं ययोः द्वयोः पदयोः मेलनेन निर्मितं भवति ते द्वे पदे स्तः **महान् आनन्दः** इति। **महान्** इति रूपं **महत्** इति शब्दस्य प्रथमाविभक्तेः एकवचने पुंलिङ्गे भवति। **आनन्दः** इति रूपं **आनन्द** इति शब्दस्य प्रथमाविभक्तेः एकवचने पुंलिङ्गे भवति। **महान् आनन्दः** इति द्वयोः अपि विभक्तिः समाना अस्ति इति कारणात् द्वयोः अपि पदयोः सामानाधिकरण्यम् अस्ति। प्रायशः यत्र द्वयोः अपि पदयोः विभक्तिः समाना भवति तत्र सामानाधिकरण्यं भवति इति वदामः। अधुना प्रथमायां विभक्तौ विद्यमानयोः एतयोः द्वयोः पदयोः समासं कर्तुं मूलशब्द-रूपेण **महत् + आनन्द** इति द्वौ शब्दौ स्वीकुर्मः। स्मरणे तिष्ठेत् यत् एतौ मूलशब्दौ ययोः पदयोः स्तः तयोः द्वयोः अपि विभक्तिः **प्रथमा** एव अस्ति। अतः यत्र द्वयोः पदयोः विभक्तिः **समाना** (प्रथमा) भवति, तत्रापि प्रथमं पदं यदि **महत्** इति शब्देन निर्मितं भवति तर्हि समासात् पूर्वम् एव **महत् + आनन्द** इति अवस्थायाम् **महत्** इति शब्दस्य त्-

Since 2009
ISSN- 0976-8645
UGC RN-41039

वर्णस्य **आ**[304] इति आदेशं करोति भगवान् पाणिनिः। **मह आ + आनन्द** इति भवति। **मह + आ** इति दीर्घसन्धेः द्वारा मेलनेन **महा** इति भवति। **महा + आनन्द = महानन्द** इति भवति। विभक्तिकार्यं कृत्वा **महानन्दः** इति भवति। एवं तर्हि **महानन्दः** इति रूपं दृष्ट्वा एव वयं वक्तुं शक्नुमः यत् अस्य अर्थः **महान् आनन्दः** इति अस्ति। यतः अत्र द्वयोः अपि पदयोः समाना एव विभक्तिः अस्ति अतः **त्-वर्णस्य** स्थाने **आ-वर्णः** श्रूयते।

**महदानन्दः** इति पदस्य अर्थः **महताम् आनन्दः** इति पूर्वं कथितम्। **महताम्** इति पदे षष्ठी विभक्तिः अस्ति। **आनन्दः** इति पदे प्रथमा विभक्तिः अस्ति। अतः द्वयोः अपि पदयोः विभक्तिः समाना नास्ति। अतः एव अनयोः पदयोः मूलशब्दयोः यः **महत्** इति शब्दः तस्य **त्-वर्णस्य आ-वर्णः** न भवति। अतः **महत् + आनन्द** इति अवस्थायां **त्-वर्णस्य** स्थाने सन्धिकार्यं कृत्वा **द्-वर्णं**[305] कुर्मः। **महद् + आनन्द** इति मेलनेन **महदानन्द** इति भवति। विभक्तिकार्यं कृत्वा **महदानन्दः** इति पदस्य निर्माणं कुर्मः। अत्र **त्-वर्णस्य स्थाने आ-वर्णः** न जातः अस्ति इत्येव प्रमाणम् अस्ति यत् **महदानन्दः** इति द्वयोः अपि पदयोः समाना विभक्तिः नास्ति। यदि समाना विभक्तिः भवति स्म तर्हि **महदानन्दः** इति रूपम् एव न भवति स्म **महानन्दः** इति भवति स्म।

एवञ्च वयं जानीमः यत् 'विवाहे **महानन्दः** भवति' इति वाक्यस्य अर्थः भवति यत् 'विवाहे **महान् आनन्दः** भवति' इति। 'विवाहे **महदानन्दः** भवति' इत्यस्य तु 'विवाहे **महताम्** (जनानाम्) **आनन्दः** भवति' इति अर्थः भवति। एतादृशः एव अर्थस्य भेदः अस्माभिः **महादेवः/महद्देवः, महाराजः/महद्राजः, महापण्डितः/महत्पण्डितः, महालयः/महदालयः** इत्यादौ सर्वत्र ज्ञातव्यः।

## 2. उपवेशयति उत उपावेशयति ?

'शिक्षकः छात्रान् आतपे **उपवेशयति**', 'शिक्षकः छात्रान् आतपे **उपावेशयति**' इति किञ्चन वाक्यद्वयम् अस्ति। एतयोः वाक्ययोः अभिप्रायः एषः यत् 'शिक्षकः छात्राणाम् आतपे **उपवेशनं कारयति**' इति। एतयोः द्वयोः अपि वाक्ययोः मध्ये प्रायशः सर्वत्र समानता एव अस्ति परन्तु क्रियापदयोः मध्ये किञ्चित् एव भेदः दृश्यते। प्रथमे वाक्ये **उपवेशयति** इति क्रियापदम् अस्ति द्वितीये वाक्ये **उपावेशयति** इति क्रियापदम् अस्ति। केचन प्रयोक्तारः **उपवेशयति** इति अनुक्त्वा **उपावेशयति** इति प्रयोगं कुर्वन्ति। एवं तर्हि द्वयोः अनयोः पदयोः मध्ये कः विशेषः कः च अविशेषः इत्यत्र चिन्तनस्य आवश्यकता अस्ति। तथाहि –

**उपविशति** अर्थात् **उपवेशनं करोति**। **उपवेशयति** अर्थात् **उपवेशनं कारयाति**। आम्! **उपविशति** इति पदं उप-उपसर्गपूर्वकस्य **विश्-प्रवेशने** इति धातोः लट्-लकारस्य प्रथमपुरुषस्य एकवचने भवति। **उप विश् अ(शप्) ति** इति मेलनेन **उपविशति** इति भवति। अस्य एव धातोः प्रेरणार्थे **णिच्-प्रत्ययं**[306] कुर्मः यदि तर्हि **उप विश् इ(णिच्) अ ति** इति भवति। ततः विश्-धातोः इ-वर्णस्य **ए-वर्णः**[307] भवति। **उप वेश् इ अ ति** इति भवति। ततः णिच्-प्रत्यस्य इकारस्य अपि **ए-वर्णः**[308] भवति। **उप वेश् ए अ ति** इति भवति। ततः ए-वर्णस्य **अय्**[309] इति आदेशः भवति। **उप वेश् अय् अ ति** इति मेलनेन **उपवेशयति** इति रूपं भवति प्रेरणायां **णिच्-प्रत्ययस्य** योजनेन।

ननु! उपरि द्वितीये वाक्ये **उपावेशयति** इति क्रियापदम् अपि दृश्यते खलु! तस्य अपि अभिप्रायः **उपवेशनं कारयति** इति भवति इति उक्तं खलु! किं तर्हि अत्र

304 ब्रह्मदत्त जिज्ञासु ,(व्याख्याता)*अष्टाध्यायी प्रथमावृत्ति*नवम ) , संस्करण (२००५– रेवली ,रामलाल कपूर ट्रस्ट , सोनीपत ,हरयाणा , तृतीय भाग - पृष्ठ संख्या ,१९४, सूत्रसंख्या –६.३.४५

305 ब्रह्मदत्त जिज्ञासु ,(व्याख्याता)*अष्टाध्यायी प्रथमावृत्ति*नवम ) , (संस्करण२००५– रेवली ,रामलाल कपूर ट्रस्ट , सोनीपत ,हरयाणा , तृतीय भाग - पृष्ठ संख्या ,५२६, सूत्रसंख्या –८.२.३९

306 भट्टोजिदीक्षितः (सम्पादकः – गिरिधरशर्मा), संस्करण - ,२०१० वैयाकरणसिद्धान्तकौमुदी, तृतीयः भागः, पृष्ठ संख्या - ४२५, सू२५७६.सं., वाराणसी, मोतीलाल बनारसीदास।

307 भट्टोजिदीक्षितः (सम्पादकः – गिरिधरशर्मा), संस्करण - २०१०, वैयाकरणसिद्धान्तकौमुदी, तृतीयः भागः, पृष्ठ संख्या - ३०, सू२१८९.सं., वाराणसी, मोतीलाल बनारसीदास।

308 ब्रह्मदत्त जिज्ञासु ,(व्याख्याता)*अष्टाध्यायी प्रथमावृत्ति*नवम ) , (रणसंस्क२००५– रेवली ,रामलाल कपूर ट्रस्ट , सोनीपत ,हरयाणा , तृतीय भाग - पृष्ठ संख्या ,४१५, सूत्रसंख्या –७.३.८४

309 ब्रह्मदत्त जिज्ञासु ,(व्याख्याता)*अष्टाध्यायी प्रथमावृत्ति*नवम ) , (संस्करण२००५– रेवली ,रामलाल कपूर ट्रस्ट , सोनीपत ,हरयाणा , तृतीय भाग - पृष्ठ संख्या ,३१, सूत्रसंख्या –६.१.७५



Jahnavi Sanskrit E-Journal (The First Unpaid Sanskrit E-Journal by सारस्वत-निकेतनम्) published by Dr. Bipin Kumar Jha
Avilable at jahnavisanskritejournal.in Issue 36-37 Vol- I Year 10. Date 09 March, 2019 JSEJ/36-37/I/10/2019
Since 2009
ISSN- 0976-8645
UGC RN-41039

काचित् विशिष्टा व्यवस्था भवति वा क्रियापदस्य निर्माणे? अपि च किञ्चित् एव रूपभेदेन अर्थभेदः अपि भवेत् वा **उपवेशयति, उपावेशयति** इति अनयोः क्रियापदयोः मध्ये? इत्यादयः जिज्ञासाः जायन्ते प्रयोगयोः अनयोः श्रोतॄणाम्। अत्र कथयामः, वस्तुतः **उप आ(आङ्)** इति द्वयोः उपसर्गयोः योजनेन **उप + आ + वेशयति = उपावेशयति** इति क्रियापदस्य निर्माणम् अपि भवितुम् अर्हति। अत्र **आङ्** इति उपसर्गस्य योजनेन कदाचित् अर्थे भेदः भवितुम् अर्हति कदाचित् अर्थभेदः न अपि स्यात्। यतः उपसर्गाः कदाचित् धातोः अर्थं परिवर्तयन्ति कदाचित् परिवर्तनं विना धातोः अर्थम् एव पोषयन्ति। परन्तु एषा व्यवस्था प्रयोगाणाम् अनुसारेण एव ज्ञातव्या भवति। अत्र अस्माकं प्रसङ्गे **उपवेशनं कारयति** इति अर्थः **उपवेशयति** इति अनेन क्रियापदेन एव लभ्यते खलु! अतः तम् एव अर्थं वक्तुं अतिरिक्त-रूपेण **आङ्** इति उपसर्गः योजनीयः एव इति या का अपि आवश्यकता नियमः वा नास्ति। अतः **आङ्** इति गौरवभूतस्य अतिरिक्तस्य कार्यस्य आवश्यकता एव नास्ति इति कृत्वा **उपवेशयति** इति क्रियापदम् एव प्रयोक्तम्। ओम्! यदि **उपावेशयति** इति विशिष्टे अर्थे केनचन शिष्टेन जनेन प्रयुक्तं भवेत् तर्हि व्याकरणम् अपि तस्य व्युत्पादनं असंशयम् एव करोति।

## 3. कथं **पिताश्रीः स्वस्थः** जातः?

'अधुना मम **पिताश्रीः स्वस्थः** जातः', 'एषः मम **भ्राताश्रीः क्रीडकः** अस्ति' इत्यादीनि वाक्यानि प्रायशः संस्कृतेन सम्भाषण-समये अथवा लेखनसमये श्रुतानि दृष्टानि च। अनयोः वाक्ययोः प्रयोगः शुद्धः न प्रतीयते। अनयोः वाक्ययोः अपेक्षया 'अधुना मम **पिता स्वस्थः** जातः', 'एषः मम **भ्राता क्रीडकः** अस्ति' इति एवं वाक्ययोः प्रयोगः शुद्धः सरलः च अस्ति। एवं तर्हि जिज्ञासा तु भवति एव यत् 'अधुना मम **पिताश्रीः स्वस्थः** जातः', 'एषः मम **भ्राताश्रीः क्रीडकः** अस्ति' इति वाक्यद्वयं कथं शुद्धं नास्ति इति? एतत् वाक्यद्वयं कथं शुद्धं न स्यात् इति एकं सरलं चिन्तनं कुर्मः सरलैः व्याकरणस्य नियमैः। तथाहि -

आदौ **पिताश्रीः भ्राताश्रीः** इत्यादयः प्रयोगाः किं शुद्धाः इति परिशीलयामः। उदाहरणाय **पिताश्रीः** इति प्रयोगे चिन्तनं कुर्मः, तद्वत् **भ्राताश्रीः** इत्यादिषु अपि ज्ञातव्यम्। 'अधुना मम **पिताश्रीः स्वस्थः** जातः' इति वाक्ये वक्तुम् इष्टस्य अर्थस्य अपेक्षानुसारं **पिताश्रीः स्वस्थः** इति द्वयोः पदयोः मध्ये एकं पदं **विशेष्यम्** अपरं च **विशेषणं** भवेत्। यदि **पिताश्रीः** इति विशेष्यपदं **स्त्रीलिङ्गे** अस्ति तर्हि विशेषण-पदम् अपि **स्त्रीलिङ्गे** एव स्यात् **स्वस्था** इति। यदि **पिताश्रीः** इति विशेष्य-पदं **पुंलिङ्गे** अस्ति तर्हि **स्वस्थः** इति विशेष्यपदम् अपि **पुंलिङ्गे** एव भवति। यतः कश्चन नियमः अस्ति यत् **यस्मिन् लिङ्गे, वचने विभक्तौ च विशेष्यं** भवति **तस्मिन् लिङ्गे, वचने विभक्तौ च एव विशेषणम्** अपि भवति। अस्तु!

**पिताश्रीः स्वस्थः** इति वाक्यांशं दृष्ट्वा तु अनुभूयते यत् अत्र **स्वस्थः** इति विशेषण-पदं **पुंलिङ्गे** अस्ति। अतः **पिताश्रीः** इति विशेष्य-पदं **पुंल्लिङ्गे** एव स्यात् इति, यतः विशेषण-पदानि अपि कदाचित् अस्माकं भ्रमे सति विशेष्य-पदानां लिङ्गस्य ज्ञानं कारयन्ति। परन्तु 'अधुना मम **पिताश्रीः स्वस्थः** जातः' इति वाक्ये **पिताश्रीः** इति विशेष्य-पदं **पुंलिङ्गे** नास्ति। तत् कथम् इति चेत् अत्र **पिताश्रीः** इति पदस्य द्वाभ्यां प्रकाराभ्यां विग्रहः सम्भवति तत्र प्रथमः प्रकारः कर्मधारय-तत्पुरुष-समासस्य द्वारा सम्भवति। तद्यथा – '**पिता** च एषः **श्रीः** च' इति। समस्त-पदं निर्मातुं मूलशब्दानां योजनं कुर्मः इति वयं जानीमः। अतः **पितृ + श्री** इति द्वयोः समसनम् अत्र भवति। मेलनेन **पितृश्री** इति समस्तः शब्दः निर्मितः भवति। विभक्ति-कार्यं कृत्वा **पितृश्रीः** इति रूपं भवति। अत्र **पितृ** इति शब्दस्य **ऋ-वर्णस्य** स्थाने **आ-वर्णः**[310] तु न भवति। ऋ-वर्णस्य आ-वर्णः तु **द्वन्द्व-समासे** एव भवति। यथा **मातापितरौ** इत्यादि। अत्र **मातृ** इति शब्दस्य **ऋ-वर्णस्य** स्थाने **आ** इति भवति। अतः **मातापितरौ** इति भवति। **पितृश्रीः** इत्यत्र तु **तत्पुरुषः** समासः उक्तः। अतः अत्र ऋ-वर्णस्य आ-वर्णः न भवेत्। अतः **पिताश्रीः** इति रूपं तु सर्वथा न भवेत् **पितृश्रीः** इति रूपम् एव भवेत्। अस्तु! **पितृश्रीः** इति प्रयोगस्य अपि किं लिङ्गं भवेत् इति अपि निर्णयः कर्तव्यः। तदर्थम् एकः नियमः अस्ति यत् तत्पुरुषे

310 भट्टोजिदीक्षितः (सम्पादकः – गिरिधरशर्मा), संस्करण - २०१०, वैयाकरणसिद्धान्तकौमुदी, तृतीयः भागः, पृष्ठ संख्या - २००, सू९२१.सं., वाराणसी, मोतीलाल बनारसीदास।

Since 2009
ISSN- 0976-8645
UGC RN-41039

उत्तरपदस्य यत् लिङ्गं भवति तद् एव लिङ्गं समस्त-पदस्य अपि भवति[311] । **पितृश्रीः** इति पदे उत्तरपदं **श्रीः** इति अस्ति। **श्रीः** इति पदं **नित्य-स्त्रीलिङ्गे** भवति। अतः **पितृश्रीः** इति पदं स्त्रीलिङ्गे भवति इति स्पष्टं भवति। एतेन प्रथमेन प्रकारेण तु ज्ञायते यत् **पिताश्रीः स्वस्थः** इति प्रयोगः न साधुः।

अस्तु! उक्ते प्रथमे तत्पुरुषस्य विग्रहे यदि सङ्गतिः केनचन न अनुभूयते तर्हि तत्पुरुषस्य एव अन्यः प्रकारः अपि अत्र चिन्तयितुं शक्यते। तथाहि – **पितृरूपा श्रीः = पितृश्रीः** इति **उत्तरपद-लोपी तत्पुरुषः** समासः वक्तुं शक्यते। अत्र विग्रहे **रूपा** इति उत्तरपदस्य लोपः भवति[312]। **पितृश्रीः** इति एव रूपम् प्राप्नुमः विभक्तिकार्यं कृत्वा। परन्तु अत्र अपि **तत्पुरुषः** अस्ति इति कृत्वा पूर्ववत् **स्त्रीलिङ्गम्** एव भवति। अतः **पिताश्रीः स्वस्थः** इति प्रयोगः सर्वथा **अशुद्धः** एव इति वक्तुं शक्यते। न च 'अधुना मम **पिताश्रीः स्वस्थः** जातः' इति वाक्ये **पिताश्रीः** इति पदे **बहुव्रीहि-समासः** चिन्तनीयः। तथा यदि कुर्मः तर्हि **पिता श्रीः यस्य** इति विग्रहस्य द्वारा अन्यस्य एव कस्यचित् अर्थस्य बोधः भवेत् न तु पितुः। अपि च अन्यस्य अर्थस्य बोधे अपि **पिताश्रीः** इति न स्यात् अपितु **पितृश्रीः** इत्येव स्यात्। अतः **संस्कृत-भिन्न-भाषाणां** प्रभावेण 'अधुना मम **पिताश्रीः स्वस्थः** जातः' इति एतादृशानि वाक्यानि प्रयत्नेन निवारणीयानि, 'अधुना मम **पिता स्वस्थः** जातः' इति, अथवा 'अधुना मम **पितृवर्यः स्वस्थः** जातः' इति एतादृशानि वा वाक्यानि प्रयोक्तव्यानि इति मम चिन्तनम्। मम प्रतिपादने अस्मिन् यदि क्वचित् त्रुटिं पश्यन्ति अथवा प्रकारान्तरेण उक्तानां प्रयोगाणां सिद्ध्यर्थं शास्त्रीयां युक्तिं यदि पाठकाः सुधियः पश्यन्ति तर्हि निश्चयेन एव मम अज्ञानं निवारयन्तु इति सादरं सम्प्रार्थये।

4. किं **भ्रातुः** भगिनी अथवा पत्नी **भ्रात्री** भवेत् वा?

यथा **कर्ता** इत्यस्य स्त्रीलिङ्गे **कर्त्री, भोक्ता** इत्यस्य **भोक्त्री, अधिष्ठाता** इत्यस्य **अधिष्ठात्री** इत्यादीनि रूपाणि भवन्ति तथैव किं **भ्राता** इत्यस्य स्त्रीलिङ्गे **भ्रात्री** इति रूपं भवेत् वा इति एकवारं मम मित्रेण अहं पृष्टः। अत्र महोदयेन एवं काचित् युक्तिः दर्शिता – **भगवान् पाणिनिः** तत्र **ऋकारान्तेभ्यः** शब्देभ्यः स्त्रीलिङ्गस्य विवक्षायां (वक्तुम् इच्छा = विवक्षा) **ङीप्(ई)**[313] इति प्रत्ययस्य विधानं करोति। अतः एव **कर्तृ** इति ऋकारान्तात् शब्दात् स्त्रीलिङ्गस्य विवक्षायां **ङीप्(ई)** इति प्रत्ययः भवति। **कर्तृ + ई** इति स्थितौ ऋ-वर्णस्य **र्**[314] भवति। **कर्त् र् ई** इति मेलनेन विभक्तिकार्य-द्वारा च **कर्त्री** इति भवति। अतः **भ्रातृ** इति शब्दः अपि **ऋकारान्तः** एव अस्ति खलु! अतः अस्मात् शब्दात् अपि स्त्रीलिङ्गस्य विवक्षायां **ङीप्** इति प्रत्ययः भवेत् खलु! तेन **भ्रात्री** इति **स्त्रीलिङ्गे** रूपं भवेत् एव किल! इति। इति चेत्, अत्र किञ्चित् प्रतिपादयामः –

यद्यपि **भ्रातृ** इति शब्दः **ऋकारान्तः** इति सत्यम्, तथापि अस्मात् **स्त्रीलिङ्गस्य** विवक्षायां **ङीप्** इति प्रत्ययस्य विधानं न कर्तुं शक्नुमः। तत् कुतः इति चेत् **भ्रातृ** इति शब्दः **पुंलिङ्गे** एव प्रसिद्धः। अस्य **स्त्रीलिङ्गं नपुंसकलिङ्गं** वा न भवति एव। अतः यस्य शब्दस्य **स्त्रीलिङ्गम्** एव न भवति तस्य शब्दस्य **स्त्रीलिङ्गस्य** विवक्षा अपि न भवति। यदि एतादृशी विवक्षा जायते अपि, तर्हि सा समीचीना न भवति। अर्थात् असङ्गता भवति। अतः **भ्रातृ** इति शब्दस्य **भ्रात्री** इति रूपं न शुद्धम्। अन्यथा **सुहृदः** अर्थे **नित्यनपुंसकलिङ्गे** विद्यमानस्य **मित्रम्** इति रूपस्य **मित्री मित्रा** वा इति अपि किमपि रूपं स्यात्। परन्तु नियतलिङ्गानां न एषा व्यवस्था।

अपि च, कश्चन शब्दः अस्मिन् एव लिङ्गे भवति,

[311] भट्टोजिदीक्षितः (सम्पादकः – गिरिधरशर्मा), संस्करण - ,२०१० वैयाकरणसिद्धान्तकौमुदी, तृतीयः भागः, पृष्ठ संख्या - ११८, सू८१२.सं., वाराणसी, मोतीलाल बनारसीदास।

[312] भट्टोजिदीक्षितः (सम्पादकः – गिरिधरशर्मा), संस्करण - ,२०१० वैयाकरणसिद्धान्तकौमुदी, तृतीयः भागः, पृष्ठ संख्या - ७७, वार्तिक१३१०.सं., वाराणसी, मोतीलाल बनारसीदास।

[313] ब्रह्मदत्त जिज्ञासु ,(व्याख्याता)*अष्टाध्यायी प्रथमावृत्ति*नवम ) , (संस्करण२००५– रेवली ,रामलाल कपूर ट्रस्ट , सोनीपत ,हरयाणा , द्वितीय भाग पृष्ठ संख्या ,३, सूत्रसंख्या –४.१.५

[314] ब्रह्मदत्त जिज्ञासु ,(व्याख्याता)*अष्टाध्यायी प्रथमावृत्ति*नवम ) , (संस्करण२००५– रेवली ,ट्रस्ट रामलाल कपूर , सोनीपत ,हरयाणा , तृतीय भाग पृष्ठ संख्या ,३६, सूत्रसंख्या –४.१.७४



Jahnavi Sanskrit E-Journal (The First Unpaid Sanskrit E-Journal by सारस्वत-निकेतनम्) published by Dr. Bipin Kumar Jha
Avilable at jahnavisanskritejournal.in Issue 36-37 Vol- I Year 10. Date 09 March, 2019 JSEJ/36-37/I/10/2019
Since 2009
ISSN- 0976-8645
UGC RN-41039

अथवा **स्त्रीलिङ्गे** अपि भवति **नपुंसके** अपि भवति, अथवा **त्रिषु लिङ्गेषु** भवति इति ज्ञानाय मुख्यतया **त्रयः प्रकाराः** भवन्ति। तेषु **प्रथमः पाणिनीय-लिङ्गानुशासनं, द्वितीयः कोषाः, तृतीयः च लोकः**। अर्थात् केषाञ्चन शब्दानां लिङ्गानां लोकात् अपि प्रसिद्धिः भवति। **भ्रातृशब्दः** उक्तेषु त्रिषु अपि प्रकारेषु स्त्रीलिङ्गे न अन्तर्भवति। अतः **भ्रातृ** इति शब्दात् **स्त्रीलिङ्गस्य** बलात् विवक्षां कृत्वा **ङीप्** इति प्रत्ययस्य विधानम् असङ्गतम् अनुभूयते।

अस्तु! एतावता **भ्रातृ** इति शब्दस्य स्वरूपं स्वीकृत्य स्त्रीलिङ्गस्य विवक्षा न कर्तव्या इति विचारः कृतः। अधुना तर्हि जिज्ञासा जायते यत् **भ्रातुः भगिन्याः** अर्थे **पत्न्याः** च अर्थे किं विशिष्टं रूपं वक्तव्यम् इति? इति चेत् **भगिन्याः** अर्थे **भगिनी, स्वसा** इति शब्दद्वयं प्रसिद्धम् अस्ति। **भ्रातुः पत्न्याः** अर्थे च **भ्रातृजाया, भ्रातृभार्या, प्रजावती** इति एते शब्दाः प्रसिद्धाः सन्ति एव।

इति एवं प्रकारेण **भ्रात्री** इति एतद् रूपं सङ्गतं न भवेत् इति मम मतिः। **सुधियः पाठकाः** अन्याम् अपि काञ्चित् शास्त्रीयां दृष्टिम् अत्र आवहन्ति यदि तर्हि नूनम् एव स्वकीयान् विचारान् कथयन्तु येन परस्परं चर्चया अस्माकं सर्वेषां ज्ञानवर्धनं भवेत् इति सम्प्रार्थये।

5. **रचनात्मकी कार्यपद्धतिः** अथवा **रचनात्मिका कार्यपद्धतिः ?**

'अस्माकं सङ्घटनस्य **रचनात्मकी** कार्यपद्धतिः अस्ति', 'अस्माकं सङ्घटनस्य **रचनात्मिका** कार्यपद्धतिः अस्ति' इति अस्ति किञ्चन वाक्यद्वयम्। एतयोः वाक्ययोः आशयः अस्ति यत् 'अस्माकं सङ्घटनस्य या कार्यपद्धतिः अस्ति तस्याः **आत्मा रचना** वर्तते। सा रचना कार्यकर्तॄणां वा स्यात्, संस्कृत-भवनानां वा स्यात्, संस्काराणां वा स्यात्। भवतु! वयम् अस्मिन् लेखे **रचनात्मकी, रचनात्मिका** इति द्वयोः पदयोः रचनायाः विषये चिन्तनं कर्तुम् अस्य विचारस्य आरम्भं कृतवन्तः स्मः। अनयोः पदयोः रचना किमर्थं चिन्तनीया इति चेत् एतत् पदद्वयम् अपि दृष्ट्वा कश्चन सन्देहः उत्पन्नः भवति यत् किं **रचनात्मकी** इति प्रयोगः शुद्धः भवति अथवा **रचनात्मिका** इति प्रयोगः शुद्धः भवति? अथवा द्वयम् अपि शुद्धं भवति? इति। अयं च सन्देहः प्रकटितः संस्कृतबन्धुना केनचन। अस्तु! सरलेन विवरणेन पश्यामः यत् अस्मिन् विषये व्याकरणशास्त्रे कथं समाधानं प्राप्तुं शक्येत इति। तथाहि –

**रचनात्मिका कार्यपद्धतिः** इत्यत्र **रचनात्मिका** इति समस्त-पदस्य **रचना आत्मा यस्याः** इति विग्रहः कर्तव्यः भवति। एतादृशः विग्रहः **बहुव्रीहि-समासे** भवति **पीतानि अम्बराणि यस्य सः पीताम्बरः** इत्यादौ यथा। ततः **रचना सु आत्मन् सु** इति अलौकिकः विग्रहः भवति। ततः द्वयोः पदयोः **समासः**[315] भवति। ततः **सु सु** इति अनयोः प्रत्यययोः **लोपः**[316] भवति। ततः **रचना आत्मन्** इति द्वयोः पदयोः **दीर्घसन्धिं** कृत्वा **रचनात्मन्** इति स्थितिः भवति। अधुना **रचनात्मन्** इति न्-वर्णान्तात् शब्दात् **बहुव्रीहि-समासान्तः** प्रत्ययः कर्तव्यः भवति **कप्** (क)[317] इति। **रचनात्मन् क** इति अवस्थायां **न्-वर्णस्य लोपः**[318] भवति। **रचनात्म क** इति मेलनेन **रचनात्मक** इति भवति। अधुना स्त्रीलिङ्गस्य बोधकः **टाप्**[319] इति प्रत्ययः भवति। **रचनात्मक आ** (टाप्) इति मेलनेन **रचनात्मका** इति भवति। ततः क्-वर्णात् पूर्वः म्-वर्णात् च परः यः **अ-वर्णः** तस्य स्थाने **इ-वर्णः**[320] भवति। **रचनात्मिका** इति भवति। एवञ्च

[315] भट्टोजिदीक्षितः (सम्पादकः – गिरिधरशर्मा), संस्करण - ,२०१० वैयाकरणसिद्धान्तकौमुदी, द्वितीयः भागः, पृष्ठ संख्या - १२९, सू८३०.सं., वाराणसी, मोतीलाल बनारसीदास।

[316] भट्टोजिदीक्षितः (सम्पादकः – गिरिधरशर्मा), संस्करण - ,२०१० वैयाकरणसिद्धान्तकौमुदी, द्वितीयः भागः, पृष्ठ संख्या - २, सू५.सं., वाराणसी, मोतीलाल बनारसीदास।

[317] ब्रह्मदत्त जिज्ञासु ,(व्याख्याता)*अष्टाध्यायी प्रथमावृत्ति*नवम ) , (संस्करण२००५– रेवली ,रामलाल कपूर ट्रस्ट , सोनीपत ,रयाणाह , द्वितीय भाग पृष्ठ संख्या ,१२३, सूत्रसंख्या –५.४.१५४

[318] ब्रह्मदत्त जिज्ञासु ,(व्याख्याता)*अष्टाध्यायी प्रथमावृत्ति*नवम ) , (संस्करण२००५– रेवली ,रामलाल कपूर ट्रस्ट , सोनीपत ,हरयाणा , तृतीय भाग पृष्ठ संख्या ,५९६, सूत्रसंख्या –८.२.१७

[319] भट्टोजिदीक्षितः (सम्पादकः – गिरिधरशर्मा), संस्करण - ,२०१० वैयाकरणसिद्धान्तकौमुदी, प्रथमः भागः, पृष्ठ संख्या - ४९४, सू४५४.सं., वाराणसी, मोतीलाल बनारसीदास।

[320] भट्टोजिदीक्षितः (सम्पादकः – गिरिधरशर्मा), संस्करण - ,२०१० वैयाकरणसिद्धान्तकौमुदी, प्रथमः भागः, पृष्ठ संख्या - ५०८, सू४६३.सं., वाराणसी, मोतीलाल बनारसीदास।

विभक्तिकार्यं कृत्वा **रचनात्मिका** इति रूपं सिद्धं भवति। एतादृशं रूपं च वयं भगवतः **पतञ्जलेः महाभाष्ये** अपि द्रष्टुं शक्नुमः। तत्र हि **'संभावनावयवात्मिका आशंसा'**[321] इति प्रयोगः कृतः। अत्रापि **संभावनावयवः आत्मा यस्याः** सा **आशंसा** इति विग्रहेण सङ्गतिः भवति।

भवतु! अधुना **रचनात्मकी** इति प्रयोगस्य शुद्ध-अशुद्धत्वं विचारयामः। तथाहि – **रचमात्मन्** इति **बहुव्रीहौ** सम्पन्नः यः शब्दः तस्मात् यः **कप्** इति प्रत्ययः उक्तः सः **विकल्पेन** भवति। एवं तर्हि यस्मिन् पक्षे **कप्** न भवति तस्मिन् पक्षे **रचनात्मन्** इति **न्-**वर्णान्तात् शब्दात् **ङीप्** (ई)[322] प्राप्तः भवति। परन्तु अस्य ङीप्-प्रत्ययस्य सूत्रकारः **निषेधं**[323] कथयति। अतः **रचनात्मन्** इति एव शब्दः कप्-प्रत्ययस्य अभावे **स्त्रीलिङ्गे** भवति। एतस्मात् **सु** -प्रत्ययः भवति। **रचनात्मन् सु** इति अवस्थायां **सु** इत्यस्य **लोपः**[324] भवति। ततः **न्**-वर्णात् पूर्वं यः **अकारः** तस्य स्थाने **आ-वर्णः**[325] भवति। **रचनात्मान्** इति भवति। ततः परं **न्-वर्णस्य लोपः** भवति। **रचनात्मा** इति रूपं स्त्रीलिङ्गे अपि सिद्धं भवति। अत्र **प्रथमायाः** विभक्तेः **द्विवचने बहुवचने** क्रमशः **रचनात्मानौ रचनात्मानः** इति रूपे भवतः। अन्यानि रूपाणि आत्मन्-शब्दवत् एव ज्ञातव्यानि।

अत्र इदम् अपि एकम् अवधानं कर्तव्यम् – **रचनात्मन्** इति एतादृशेभ्यः बहुव्रीहि-समासे निर्मितेभ्यः शब्देभ्यः येषाम् अन्ते **अन्** इति श्रूयते, तेभ्यः सूत्रकारेण विकल्पेन **डाप्** (आ)[326] इति प्रत्ययः उक्तः अस्ति। **रचनात्मन् डाप् (आ)** इति अवस्थायां **अन्** इति भागस्य **लोपः**[327] भवति। **रचनात्म् आ** इति मेलनेन **रचनात्मा** इति आकारान्तः स्त्रीलिङ्गः शब्द निर्मितः भवति। **रचनात्मा रचनात्मे रचनात्माः** इति एवं **लताशब्दवत्** रूपाणि अत्र भवन्ति। यस्मिन् च पक्षे **डाप्** न भवति तस्मिन् पक्षे **रचनात्मा रचनात्मानौ रचनात्मानः** इति इमानि रूपाणि तु कथितानि एव।

एतावता विमर्शेन तर्हि फलितं भवति यत् 'अस्माकं सङ्घटनस्य **रचनात्मिका** कार्यपद्धतिः अस्ति' इति, 'अस्माकं सङ्घटनस्य **रचनात्मा** कार्यपद्धतिः अस्ति' इति वा प्रयोगः साधुः स्यात्। ' **रचनात्मकी** कार्यपद्धतिः' इति प्रयोगः तु न स्यादेव इति भाति, तथापि प्रयोगस्य अस्य समर्थानाय सुधीनां पाठकानां युक्तिः यदि काचित् स्फुरति तर्हि नूनम् एव उपकुर्वन्तु इति सप्रश्रयं प्रार्थये।


**सन्दर्भग्रन्थसूची**

१. वैयाकरणसिद्धान्तकौमुदी, रचयिता – भट्टोजिदीक्षितः, (सम्पादकः – गिरिधरशर्मा), संस्करणम् – २०१०, वाराणसी, मोतीलाल बनारसीदास।

२. अष्टाध्यायी प्रथमावृत्तिः, रचयिता – पाणिनिः, (व्याख्याता – ब्रह्मदत्तजिज्ञासुः), संस्करणम् – २००५, रामलाल कपूर ट्रस्ट, रेवली – सोनीपत, हरयाणा।

३. महाभाष्यम्, रचयिता – पतञ्जलिः, (व्याख्याता – चारुदेवशास्त्री), संस्करणम् – २००९, मोतीलाल बनारसीदास, जवाहर नगर – दिल्ली


[321] पतञ्जलिः (सम्पादकः – शिवदत्तशर्मा), संस्करण - ,२०१० महाभाष्यम्, तृतीयः भागः, पृष्ठ संख्या - २४०, सू१३२.३.३.सं., दिल्ली,बंगलो रोड- चौखम्बा संस्कृत प्रतिष्ठानम्।

[322] ब्रह्मदत्त जिज्ञासु ,(व्याख्याता)*अष्टाध्यायी प्रथमावृत्ति*नवम ) , (संस्करण२००५– रेवली ,रामलाल कपूर ट्रस्ट , सोनीपत ,हरयाणा , द्वितीय भाग पृष्ठ संख्या ,३, सूत्रसंख्या –४.१.५

[323] ब्रह्मदत्त जिज्ञासु ,(व्याख्याता)*अष्टाध्यायी प्रथमावृत्ति*नवम ) , (संस्करण२००५– रेवली ,रामलाल कपूर ट्रस्ट , सोनीपत ,हरयाणा , द्वितीय भाग पृष्ठ संख्या ,६, सूत्रसंख्या –४.१.१२

[324] भट्टोजिदीक्षितः (सम्पादकः – गिरिधरशर्मा), संस्करण - ,२०१० वैयाकरणसिद्धान्तकौमुदी, प्रथमः भागः, पृष्ठ संख्या - २४८, सू२५२.सं., वाराणसी, मोतीलाल बनारसीदास।

[325] भट्टोजिदीक्षितः (सम्पादकः – गिरिधरशर्मा), संस्करण - ,२०१० वैयाकरणसिद्धान्तकौमुदी, प्रथमः भागः, पृष्ठ संख्या - २४७, सू२५०.सं., वाराणसी, मोतीलाल बनारसीदास।

[326] ब्रह्मदत्त जिज्ञासु ,(व्याख्याता)*अष्टाध्यायी प्रथमावृत्ति*नवम ) , (संस्करण२००५– रेवली ,रामलाल कपूर ट्रस्ट , सोनीपत ,हरयाणा , द्वितीय भाग पृष्ठ संख्या ,६, सूत्रसंख्या –४.१.१३

[327] ब्रह्मदत्त जिज्ञासु ,(व्याख्याता)*अष्टाध्यायी प्रथमावृत्ति*नवम ) , (संस्करण२००५– रेवली ,रामलाल कपूर ट्रस्ट , सोनीपत ,हरयाणा , तृतीय भाग पृष्ठ संख्या ,३२९, सूत्रसंख्या –६.४.१४३



Jahnavi Sanskrit E-Journal (The First Unpaid Sanskrit E-Journal by सारस्वत-निकेतनम्) published by Dr. Bipin Kumar Jha
Avilable at jahnavisanskritejournal.in Issue 36-37 Vol- I Year 10. Date 09 March, 2019 JSEJ/36-37/I/10/2019
Since 2009
ISSN- 0976-8645
UGC RN-41039

**Subscription ID T235145007 Received on- 07/01/2019**

# ज्यौतिषशास्त्रे विवाहकालविमर्शः

संतोष कुमार पाठक
गवेषकः, का०सिं०द०सं०वि०वि० दरभंगा (बिहार)

---

**प्रमुखशब्दाः** – ज्योतिषशास्त्रम्, कालः, विवाहः।

**शोधसारः -** *ज्यौतिषं नाम कालविज्ञापकं शास्त्रम् । विवधसंस्काराणां कालबोधाय ज्यौतिषशास्त्रस्य स्थानं महत्वपूर्णं विद्यते । उक्तंञ्च आर्चज्योतिषे यथा- वेदा हि यज्ञार्थमतिप्रवृत्ताः कालानुपूर्वा विहिताश्च यज्ञाः । तस्मादिदं कालविधानशास्त्रं यो ज्यौतिषं वेद स वेद यज्ञान् । (आर्चज्यौतिषम् 36)*

प्रशस्तमासाः – तत्र विवाहे वैशाख-ज्येष्ठ-आषाढ़-मार्गशीर्ष माघ-फाल्गुन संज्ञकाः षण्मासा प्रशस्ता मन्यन्ते । व्यासेन एषु मासेषु ऊढायाः सौभाग्यं धनसम्पत्तिश्च निर्दिष्टा ।

नारदेन विवाहे देवप्रतिष्ठायाञ्च माघ फाल्गुन वैशाखज्येष्ठ-मासा
उत्तमाः प्रतिपादिताः, कार्त्तिक मार्गशीर्षमासौ च मध्यमौ निर्दिष्टौ ।

माघ फाल्गुन वैशाख ज्येष्ठमासाः शुभप्रदाः ।
कार्तिको मार्गशीर्षश्च मध्यमा वितरेऽधमाः ।।
न कदाचित् दशर्क्षेषु भानोरार्द्राप्रवेशनात् ।
विवाहे देवतानाञ्च प्रतिष्ठां चोपनायनम् ।।

संस्काररत्नमालायां विवाहे उत्तममासानां फलकथने यद्यपि माघ-फाल्गुनयोः प्राशस्त्यमेवोक्तम्, परम आषाढस्तत्र न परिगणितः माघमासे भवेद् व्यूढा कन्या सौभाग्यसंयुता । फाल्गुनोढा भवेत् साध्वी वैशाखे पुत्रिणी भवेत् । देवपूजारता नित्यं मासे स्यात् सोमदेवते ।।1 ज्येष्ठमासे विशेषः – ज्येष्ठे मासे ज्येष्ठापत्यस्य विवाहो न कार्यः । तत्रापि त्रिज्येष्ठं विशेषेण वर्णनीयम् । प्रथमं त्रिज्येष्ठम् – ज्येष्ठः कन्या, ज्येष्ठो वरः ज्येष्ठो मासश्च । द्वितीयं त्रिज्येष्ठम् – ज्येष्ठा नक्षत्रं, ज्येष्ठो मासः, ज्येष्ठा कन्या उत ज्येष्ठो वरः । तत्र ज्येष्ठद्वयं मध्यमम् उक्तम् । परं कृत्यरत्नाकरे चण्डेश्वरः कृत्तिकानक्षत्रे स्थितं सूर्यं विहाय ज्येष्ठमासेऽपि ज्येष्ठ पुत्रस्य विवाहं प्रशस्तं मनुते । तत्र ज्येष्ठत्वं नाम आद्यगर्भजत्वम् उत जीवितेषु अग्रजत्वमिति शंकायां सत्याम् आचार्यः श्रीपतिः समादधात् यत् ज्येष्ठत्वमपत्ये आद्यगर्भजत्वमेव, न तु जीवितेषु अग्रजत्वमात्रम् । उक्तं तेन –

"आद्यगर्भदुहितुः सुतस्य वा ज्येष्ठमासि न तु जातुमंगलम् ।(2)"

पक्षः - विवाहे प्रधानतः शुक्ल एव पक्षो ग्राह्यः ।(3) वरं तदसम्भवे त्रयोदशीं चतुर्दशीम अमावस्यां च विधाय कृष्णपक्षोऽपि ग्राह्यः । सुदर्शनाचार्यः उभावपि पक्षौ ग्राह्यौ मनुते ।

दिनानि - विवाहे बुध-गुरू-शुक्र वासराः सामान्यतो विवाहे प्रशस्ता वर्तन्ते । चन्द्रस्य शुभग्रहत्वात् तदीयं वासरमपि नृसिंहः शुभमेव वदति । परम ज्योतिर्निबन्धे सोमवासरे विवाहेऽनुष्ठिते सति सापत्न्यावाप्ति श्रवणात् सोमवासरस्त्याज्य एव । रिक्तायां (चतुर्थी नवमी चतुर्दशी) तिथ्या शनिवासरे समागते सति सिद्धियोगो भवति । अत एव निर्णयामृते तादृशे शनिवासरेऽपि विवाहः प्रशस्त एव प्रतिपादितः ।

तिथयः – तत्र द्वितीया, तृतीया, पञ्चमी, सप्तमी, दशमी, एकादशी, द्वादशी, त्रयोदशी, पूर्णिमा-इत्येतास्तिथ्यो विवाहे प्रशस्ताः सन्ति । संस्काररत्नमालायाम् विविधासु तिथिषु विवाहानुष्ठानेन जायमानं फलं प्रतिपादितम्

| तिथिः | फलम् |
|---|---|
| प्रतिपदा | दुःखम् |
| द्वितीया | प्रीतिवर्धनम् |
| तृतीया | सौभाग्यम् |
| चतुर्थी | अर्थनाशः |
| पञ्चमी | सुखं वित्तंञ्च |

| | |
|---|---|
| षष्ठी | विघ्नानि |
| सप्तमी | विद्या, शीलं, सुखम् |
| अष्टमी | निष्फलम् |
| नवमी | शोकः |
| दशमी | आनन्दः |
| एकादशी | सुखम् |
| द्वादशी | साफल्यम् |
| त्रयोदशी | मानः पुत्रश्च |
| चतुर्दशी | दुःखम् |

नक्षत्राणि – तत्र रोहिणी, मृगशिरः, उत्तराफाल्गुनी, हस्तः, चित्रा, स्वातिः, उत्तराषाढा, श्रवणाः, धनिष्ठा, उत्तरभाद्रपदा, रेवती, अश्विनी चेति द्वादश नक्षत्राणि पारस्करमतेन विवाहाय विहितानि । कात्यायनः पारस्करमेव मोदते ।

विवाहे स्त्रीणां गुरूबलं पुरुषाणाञ्च सूर्यबलं द्रष्टव्यम् - “स्त्रीणां गुरूबलं श्रेष्ठं पुरूषाणां रवेर्वलम् ।।” यदि अनयोः अन्यतरः उभौ वा निर्बलौ स्यातां तर्हि गुरूपूजनं सूर्यपूजनं वा विधाय नैर्बल्यदोषशमनं कर्तव्यम् । पुनश्च धनुर्मीनसिंहान्यतरस्थे रवौ विवाहो वर्जितो वर्तते ।

मीने धनुषि सिंहे च स्थिते सप्ततुरंगमे ।
क्षौरमत्र न कर्त्तव्यं विवाहं गृहकर्म च ।।(4)

एवं प्रकारेण ज्यौतिषशास्त्र दृष्ट्या विविहकालविमर्शः कर्तुं शक्यते ।

संदर्भाः-

1. संस्कार रत्नमाला, पृ० 458 ।
2. संस्कार मयूखः पृ० 101 ।
3. संस्कार रत्नमाला, पृ० 460 ।
4. संस्कार रत्नमाला, पृ० 465 ।

## सन्दर्भग्रन्थसूची

1. प्राचीन भारत की प्रशासनिक एवं राजनीतिक संस्थायें, डा.कु मार कृष्ण, श्री सरस्वती सदन, नई दिल्ली,1998
2. भारतीय राजनीतिक विचारक,डा.आनन्द प्रकाश अवस्थी- लक्ष्मी नारायण अग्रवाल, आगरा, 2003-04
3. याज्ञवल्क्यस्मृति: निर्णय सागर प्रेस,बम्बई,1949
4. वाचस्पत्यम्. श्री तारानाथ, तर्कवाचस्पति, राष्ट्रियसंस्कृतसंस्थान, नई दिल्ली,
5. संस्कृत-हिन्दी कोश,वामन शिवराम आप्टे, रचना प्रकाशन,जयपुर,२००६शुक्रनीतिसारः, सम्पादकः – श्रीजीवानन्दविद्यासागर, कलकाता, प्रकाशः – १८९० ख्रीष्टाब्दः।



Jahnavi Sanskrit E-Journal (The First Unpaid Sanskrit E-Journal by सारस्वत-निकेतनम्) published by Dr. Bipin Kumar Jha
Avilable at jahnavisanskritejournal.in Issue 36-37 Vol- I Year 10. Date 09 March, 2019 JSEJ/36-37/I/10/2019
Since 2009
ISSN- 0976-8645
UGC RN-41039

Subscription ID T- 234518800 Received on- 20/02/2018

# वैयाकरणसिद्धान्तकौमुद्याः कारकप्रकरणे कर्मप्रवचनीयसंज्ञाविमर्शः

अभिषेकमुखोपाध्यायः
शोधच्छात्रः,राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः - ५१७५०७

---

**प्रमुखशब्दाः** – संज्ञा, याकरणम्, कौमुदी, निपाताः, उपसर्गाः।

**शोधसारः-**
*पाणिनीयव्याकरणान्तर्गतवैयाकरणसिद्धान्तकौमुद्यां कारकप्रकरणे विभक्त्यालोचनावसरे येषु येषु स्थलेषु कर्मप्रवचनीयानामन्तर्भावः दरीदृश्यते तानि स्थलानि सामान्यतो उपस्थाप्यन्ते।*

कर्मप्रवचनीयाः (१/४/८३) इति एका महासंज्ञा, योगप्रसिद्धशब्दश्च। यतो हि **"महासंज्ञाकरणं हि अन्वर्थलाभार्थम्"** इति भाष्यकारवचनम्। **"कर्म क्रियां प्रोक्तवन्तः कर्मप्रवचनीयाः। बाहुलकाद् भूते कर्तरि अनीयः। तेन सम्प्रति क्रियां न द्योतयन्तीति लभ्यते"** - इति तत्त्वबोधिनी। एकस्यामपि संज्ञायां संज्ञिबहुत्वात् *प्रागीश्वरान्निपाताः*(१/४/५६), *कृत्याः*(३/१/९५) इत्यादिवदत्रापि बहुवचनं सिद्धम्। कुत्रचिद् सामान्यैकत्वविवक्षायामेकवचनमपि स्यात्, यथा *गतिश्च*(१/४/६०), *प्रत्ययः*(३/१/१) चेत्यादीनि सूत्राणि। प्रकृतसूत्रस्थे **कर्म** इति क्रिया, तां क्रियां प्रोक्तवन्तः भूते ये निपाताः ते कर्मप्रवचनीयाः इति। भूते कर्तृवाच्ये अनीयर् इति *कृत्यल्युटो बहुलम्*(३/३/११३) इत्यनेन बाहुलकाद्भवति। अत एवमर्थ आगच्छति - अन्वादयो ये निपाताः क्रियायाः वैशिष्ट्यं द्योतितवन्तः किन्तु वर्तमाने तथा न कुर्वन्ति ते एव कर्मप्रवचनीयाः। अत्र तु कश्चन प्रश्नः स्यात्। साम्प्रतं ते क्रियायाः न द्योतनं चेत् कस्य द्योतनं कुर्वन्ति। तदुत्तरम् – **‘क्रियानिरूपितसम्बन्धविशेषस्य’**[328] इति। यथा **‘शाकल्यस्य संहितामनुप्रावर्षत्’** - अत्र अप्रयुज्यमाना क्रिया हि निशमनमिति, अनया अप्रयुज्यमानया क्रियया शाकल्यसंहितापाठः वर्षणं चेत्यनयोर्कार्यिकारणभावसम्बन्धस्य प्रतीतिर्भवति। अत्रैतादृशः सम्बन्धविशेषस्य प्रतीतिः **अनु**रिति द्योतकेन सम्भवति। अतः **अनु**रिति कर्मप्रवचनीयः स खलु क्रियानिमित्तसम्बन्धस्य प्रत्यायकः। वस्तुतः वयं कर्मप्रवचनीयानां त्रिविधान् प्रकारान् जानीमः यथा
१. क्रियानिरूपितसम्बन्धस्य द्योतकाः कर्मप्रवचनीयाः
२. अनर्थकाः कर्मप्रवचनीयाः, यथा *अधिपरी अनर्थकौ*(१/४/९३) ३. क्रियायाः अर्थस्य द्योतकाः, यथा *सुः पूजायाम्*(१/४/९४)चेति।

➢ **कूटशब्दाः :**

कर्मप्रवचनीयाः, निपाताः, उपसर्गाः, क्रिया।

सामान्यतोऽव्ययानां द्वैविध्यं परिलक्ष्यते शब्दिकाभिमते यथा वाचकं द्योतकञ्चेति। *स्वरादिनिपातमव्ययम्*(१/३/३७) इति अव्ययानि निर्दिष्टानि, **स्वः प्रातः** इत्यादिनामव्ययानां वाच्यार्थोऽस्ति, तानि वाचकाव्ययानीति। परं येषां वाच्यार्थो नास्ति, शब्दधात्वादिभिः सह युक्ते सति अर्थविशेषाणां द्योतनं कुर्वन्ति, तानि द्योतकाव्ययानीति विवक्षितानि; अस्य नामान्तरं हि निपात इति। निपाता अनेके वर्तन्ते। *चादयोऽसत्त्वे*(१/४/५७) इत्यनेन अद्रव्यवाचिनां चादिशब्दानां निपातसंज्ञा भवति। *प्रादयः*(१/४/५८) इत्यनुसारं विंशतिः द्वाविंशतिर्वा(मतान्तरे) निपाताः स्युः। क्रियया साकं युक्ते सति ते विंशतिः निपाताः उपसर्गसंज्ञकाः स्युः *उपसर्गाः क्रियायोगे* (१/४/५९) इति। कथितमस्ति.....

---

328 कर्मप्रवचनीयाःइत्यस्योपरि बालमनोरमाटीकायाम् (८३/४/१), पृष्ठा ६२४

Jahnavi Sanskrit E-Journal (The First Unpaid Sanskrit E-Journal by सारस्वत-निकेतनम्) published by Dr. Bipin Kumar Jha
Avilable at jahnavisanskritejournal.in Issue 36-37 Vol- I Year 10. Date 09 March, 2019 JSEJ/36-37/I/10/2019
Since 2009
ISSN- 0976-8645
UGC RN-41039

**प्रपरापसमन्ववनिर्दुरभिव्यधिसूदतिनिप्रतिपर्यपयः।**
**उपआङिति विंशतिरेष सखे उपसर्गविधिः कथितः कविना॥**[329] इति।

विंशत्युपसर्गेषु एकादशानां कर्मप्रवचनीयसंज्ञा भवति, ते एव क्रमशः सूत्रेषु समुपवर्णिताः।

पुनः *ते प्राग् धातोः* (१/४/८०) इत्यनेन तेषामन्तर्भावो धातोः प्रागेव दृश्यते। *गतिश्च* इत्यनेन तेषां गतिसंज्ञापि भवति। **अभिनवः सुपुरुष** इत्यादिस्थलेषु **सु अभि** इति निपातरूपेण गण्येते, न तु उपसर्गो गतिर्वा। किन्तु **प्रणमति, प्रणम्य** इत्यादिस्थलेषु ते उपसर्गा एव। इमे प्रादयो निपाताः कदाचित् *कर्मप्रवचनीयाः*(१/४/८३) इति संज्ञायुक्ताः स्युः। अतः तेषामपि तत्र स्वकीयार्था न सन्ति, केवलमर्थद्योतनं कुर्वन्तीति। क्रियया सह युक्ता उपसर्गास्तथा गतिः कदापि क्रियायाः व्यवहिते विच्छिन्नतया वाक्ये प्रयुक्ते सति ते कर्मप्रवचनीया इति संज्ञकाः स्युः। अतः तस्य व्युत्पत्तिगतार्थो ये पूर्वे क्रियां विशेषितामकुर्वन् सम्प्रति तस्मात् परांमुखिनः ते कर्मप्रवचनीयाः इति।

'*जपमनु प्रावर्षत् मेघः*' वाक्येऽस्मिन् अनुरिति कर्मप्रवचनीयः। वस्तुतस्तु प्रकृतवाक्यमिदमेवं हि '*जपमनुनिशम्य प्रावर्षत् मेघः*' इति। अत्र **अनु** इति कर्मप्रवचनीयः यतो हि **अनु** इति निपातः अधुना 'निशम्य' इत्यस्याः क्रियाया विच्छिन्नस्तथा सम्पर्कशून्यश्चेति। परन्तु पूर्वे प्रकृतवाक्ये '*अनुनिशम्य*' इत्यवस्थायाम् **अनु** इति निपातः निशमनक्रियां विशेषितां कृत्वा जपेन वर्षणस्य यं कार्यकारणसम्बन्धं द्योतयति स्म, सम्प्रति निशमनकृयावर्जितेऽपि **अनु**रिति तं सम्बन्धमेव द्योतते। जपश्रवणादनन्तरमेव मेघो वर्षति। अतो वर्षणमिति फलं जप इति हेतुः। प्रकृतविषयेऽस्मिन्नाचार्यभर्तृहरिप्रदत्ता कारिकैका स्मरणीया –

**"क्रियाया द्योतको नायं, सम्बन्धस्य न वाचकः। नापि क्रियापदाक्षेपी, सम्बन्धस्य तु भेदकः"॥**[330] इति।

अर्थात् प्रत्यक्षं कामपि क्रियां न विशेषितां करोति, क्रियया सह किमपि सम्बन्धमात्रं नास्ति, वाच्यार्थोऽपि नोपलब्धः, केवलं सम्बन्धविशेषस्य भेदको द्योतको वेति भवति।

सम्प्रति कर्मप्रवचनीयाणां स्वरूपं कीदृशं तत् प्रदर्शनीयम् –

- *<u>अनुर्लक्षणे(१/४/८४) :</u>*

**लक्षणे द्योत्ये अनुरुक्तसंज्ञः स्यादिति**[331]। **'लक्षण'** इत्युक्ते कार्यकारणसम्बन्धः। **'जपमनुप्रावर्षत्'** इत्यत्र निशमनक्रियां विहायापि जपश्रवणादनन्तरमिति बुद्ध्यते। अत्र हेतुहेतुमद्भावोऽस्तीति सूचयति, अतोऽनुरिति कर्मप्रवचनीयः, तदनन्तरं *कर्मप्रवचनीययुक्ते द्वितीया*(२/३/८) इत्यनेन द्वितीया प्राप्ता। अत्र कश्चित् प्रश्नो भवितुमर्हति, जपमनुप्रावर्षदित्यत्र *हेतौ*(२/३/२३) इत्यनेन कथं तृतीया न भवतीति, यतो हि पाणिनीयसूत्रानुक्रममेवम् –

*अनुर्लक्षणे* (१/४/८४),
*लक्षणेत्थम्भूताख्यानभागवीप्सासु प्रतिपर्यनवः* (१/४/९०),
*कर्मप्रवचनीययुक्ते द्वितीया* (२/३/८),
*हेतौ* (२/३/२३) चेति।

अतः विप्रतिषेधे परं कार्यम्(१/४/२) इत्यनेन 'जपेन अनु प्रावर्षत्' इत्येवं साध्यम्। तदुत्तरे दीक्षितमहाभागैःनिगदितम् **"परापि हेतौ तृतीया अनेन बाध्यते, 'लक्षणेत्थंभूत...' इत्यादिना सिद्धे पुनः अनुर्लक्षणे (१/४/८४) संज्ञाविधानसामर्थ्यादिति"**[332]। अतः समासतो **विप्रतिषेधे परं कार्य**मिति सामान्यनियममुल्लङ्घ्य अनोः कर्मप्रवचनीयत्वे

[329] सुपद्मव्याकरणम्

[330] वाक्यपदीयम् वाक्यकाण्डम्-२०४

[331] दीक्षितवृत्तिः

[332] इति सूत्रवृत्तौ "कर्मप्रवचनीययुक्ते द्वितीया"



Jahnavi Sanskrit E-Journal (The First Unpaid Sanskrit E-Journal by सारस्वत-निकेतनम्) published by Dr. Bipin Kumar Jha
Avilable at jahnavisanskritejournal.in Issue 36-37 Vol- I Year 10. Date 09 March, 2019 JSEJ/36-37/I/10/2019
Since 2009
ISSN- 0976-8645
UGC RN-41039

सूत्रद्वयमत्र प्रवृत्तम्, अर्थात् पूर्वसूत्रमेव प्रयुक्तं न तु परमिति भावः। *अनुर्लक्षणे* (१/४/८४), *लक्षणेत्थंभूताख्यानभागवीप्सासु प्रतिपर्यनवः* (१/४/९०), इति सूत्रद्वयमेव प्रयोज्यम्। *लक्षणेत्थंभूताख्यानभागवीप्सासु प्रतिपर्यनवः* (१/४/९०) इति सूत्रे सदैव *हेतौ* (२/३/२३) इत्यस्य अधिकारो वर्तते, परन्तु सूत्रस्थे केवलम् **अनोः** कृते नेति तात्पर्यम्।

- *<u>तृतीयार्थे(१/४/८५):</u>*

अस्मिन् द्योत्येऽनुरुक्तसंज्ञः स्यात्। *नदीमन्ववसिता सेना*, नद्या सह सम्बन्ध इत्यर्थः। अनुरित्यनेन तृतीयार्थे द्योतिते तस्य कर्मप्रवचनीयसंज्ञा भवतीति। अत्र '*सहार्थे तृतीया*' इत्येवं विवक्षायाम् **अनु**रिति कर्मप्रवचनीयसंज्ञां लभते। '*अवसिता*' इति पदम् **अनु**पूर्वकात् **सि**धातोः कर्तरि **क्त**प्रत्यये जातम्। '*षिञ् बन्धने*' इत्येवं धातुपाठेऽस्ति। सूत्रस्थतृतीयया तस्याः निमित्तवाचकशब्दो गृहीतः। **"अनन्तरस्य विधिर्वा भवति प्रतिषेधो वा**[333]**"** अर्थाद् विधिप्रतिषेधौ अव्यवहितोत्तरस्यैव भवतः। अनेन नियमेन *सहयुक्तेऽप्रधाने*(२/३/१९) इत्यत्र यस्याः तृतीयायाः ग्रहणं भवति, तृतीयायाः("*तृतीयार्थे*"इति सूत्रस्थायाः) कृते तस्य ('*सह*' इत्यस्य) तृतीयया ग्रहणं भवतीति भावः। अतः **सह**शब्दवाची साहित्यार्थः ***अनु*** इत्यनेन द्योतिते **अनु** 'कर्मप्रवचनीय' इति संज्ञां लभते। अनुना द्योतितः साहित्यरूपसम्बन्धः द्वितीयाविभक्तेरर्थोऽत्र, अतः सम्बन्धे षष्ठ्याः प्राप्ताशङ्कास्ति, तां बाधित्वा द्वितीया भवतीति विवक्षा। **"नदीमन्ववसिता सेना" इत्यत्र नद्या सह सम्बन्ध इति। साहित्यं द्वितीयार्थः। अनुस्तद्द्योतक इति भावः"** इति बालमनोरमा।

- *<u>हीने (१/४/८६):</u>*

**हीने द्योत्ये अनुः प्राग्वत्**[334], यथा **अनु हरिं सुरा** इति । निकृष्टार्थद्योतके **अनु**रिति प्रयोगे य उत्कृष्टः स द्वितीयाविभक्तिं लभते, न तु निकृष्टः। अत्र द्वितीयाया अर्थः हीनत्वरूपसम्बन्धविशेषः। अतः अत्र सम्बन्धे षष्ठी इति प्रयोक्तव्या, तां निषिद्ध्यात्र द्वितीया भवतीति भावः।

- *<u>उपोऽधिके च(१/४/८७) :</u>*

अत्र **उप** इत्यनेन आधिक्यार्थो हीनार्थश्च उभौ प्रतिभातौ। सूत्रस्थेन **च**कारेण पूर्वसूत्रं **हीने** इत्यनुवर्तते यथा **उप हरिं सुराः**। यस्माद्धीनस्तद्द्वितीया। आधिक्यार्थे सप्तमी भवतीति या खलु *यस्मादधिकं यस्य चेश्वरवचनं तत्र सप्तमी* (२/६/९) इति सूत्रे अस्ति।

- <u>लक्षणेत्थम्भूताख्यानभागवीप्सासु प्रतिपर्यनवः(१/४/९०)</u>:

सूत्रस्थं लक्षणमिति पदवाच्यं हि ज्ञापकं सूचकम्वा। **वृक्षं प्रति परि अनु वा विद्योतते विद्युत्** अत्र वृक्षद्वारा ज्ञापिता बोधिता वा विद्युद् इत्यर्थः। कश्चित् पुरुषो गृहे वर्तते, गवाक्षद्वारा स वृक्षान् पश्यति, विद्युतालोको वृक्षेषु पतति, एतेन विद्युतो ज्ञापका वृक्षा इति। बालमनोरमाकारानुसारं वृक्षद्वारा लक्ष्यमाणा विद्युत् प्रकाशिता भवति, अतो वृक्षोऽत्र ज्ञापको लाक्षणिको वा। अत्र लक्षणे कर्मप्रवचनीयत्वं भवति, पुनः *कर्मप्रवचनीययुक्ते द्वितीया(*२/३/८) इत्यनेन द्वितीया भवति। शब्देन्दुशेखरकारमतानुसारं वृक्षज्ञानाद् विद्युतालोकदेशीयं ज्ञानं भवतीति।

दीक्षितवृत्तौ एवमस्ति **"एष्वर्थेषु विषयभूतेषु प्रत्यादय उक्तसंज्ञा स्युः"** इति। अतः अत्रापि इत्थंभूताख्याने द्योतिते प्रत्यादिना कर्मप्रवचनीयसंज्ञा भवेदिति वाच्यम्। **इत्थं** नाम "अयं प्रकार" इति; **प्रकार** इत्यनेन विशेषणस्य बोधो भवति। भूत इत्युक्ते प्राप्त इति। अत इत्थंभूत इत्युक्ते एतत्प्रकारं प्राप्तम् इति। अर्थादनेन प्रकारेण विशेषणेन विशेषित इति। एतत् प्रकारम् नाम एतद् विशेषणमिति। आख्यानमित्यस्य आख्यायते अनेनेति व्युत्पत्या निरूपकं बोधकं वेति ज्ञेयम्। **विष्णुं प्रति परि अनु वा भक्त** इत्यत्र भक्तः भक्तिरूपविशेषणेन विशेषितः। अर्थाद् भक्तिमान् भक्त

[333] परिभाषा

[334] बालमनोरमा

Since 2009
ISSN- 0976-8645
UGC RN-41039

इत्यर्थः। भक्तिरस्यास्ति इत्यस्मिन्नर्थे भक्तिशब्दाद् *अर्शआदिभ्योऽच्* (३/२/१२७) इत्यनेन अचि कृते भक्त इति जातम्। भक्तेन सह विष्णोः यः सम्बन्धः स भक्ते स्थितो भक्तिविषयत्वरूपसम्बन्ध इति स्वीकृतः। अस्य सम्बन्धस्य अवबोधनाय षष्ठीविभक्तिः प्राप्ता, किन्तु तां बाधित्वा "*कर्मप्रवचनीययुक्ते द्वितीया*" इति संयोगेन प्रकृतसूत्रद्वारा **प्रतिपर्यनूनां** योगेन द्वितीया भवतीति स्पष्टम्।

**भाग** इत्यस्योदाहरणं यथा **लक्षीर्हरिं प्रति परि अनु वेति** समुद्रमन्थनकाले हरेः भागे लक्षीदेवी आगता, यस्य भागे गच्छति तत्रैव उक्तानां कर्मप्रवचनीयानां योगे द्वितीया भवति। **भागत्वमित्युक्ते** स्वत्वविशिष्टत्वमिति। नागेशभट्टानुसारं '*भाग*' इति अर्श आद्यजन्तत्वं तथा स्वामिबोधकम्। अतः **हरिनिष्ठस्वामित्वनिरूपितस्वत्ववती लक्षीरिति** नागेशविवक्षा। **वीप्सायां** यथा **वृक्षं वृक्षं प्रति परि अनु वा सिञ्चति** । वीप्सा इत्युक्ते व्याप्तिः। *नित्यवीप्सयोः*(८/१/४) इति वीप्सायां वृक्षशब्दस्य द्विरुक्तिर्जाता। अतः प्रत्येकं वृक्षे जलसेचनं भवतीति द्विरुक्तिवशतो ज्ञायते। अतः कथं तत्र प्रतिपर्यनूनां कर्मप्रवचनीयत्वे प्रयोजनमिति प्रश्ने आह वीप्सायामत्र कर्मप्रवचनीयत्वं न गृह्यते, अपि तु वीप्सार्थे प्रतिपर्यनूनामुपसर्गत्वं निवारणायेति। उपसर्गे सति *उपसर्गात् सुनोतिसुवतिस्यतिस्तौतिस्तोभतिस्थासेनयसेधसिचसञ्जस्वञ्जाम्*(८/३/६५) इत्यनेन षत्वे **परिषिञ्चति** इत्यादीनि रूपाणि भवन्ति। यतो वीप्सार्थे प्रतिपर्यनूनां कर्मप्रवचनीयसंज्ञा भवति अतो षत्वमपवार्यतेऽत्र। वृक्षं परिषिञ्चत्यत्र वृक्षे जलसेचनं भवत्यर्थः; वीप्सार्थः नास्त्यत्यर्थः, अतः परिरत्र न कर्मप्रवचनीयः तु उपसर्गमात्रम्। कर्मप्रवचनीयत्वे **वृक्षं परि सिञ्चति** इति प्रकृतसूत्रेण प्रतिपर्यनूनां कर्मप्रवचनीयत्वं केवलं लक्षणेत्थंभूताख्यानभागानां सूचयति, न तु वीप्सायाः, यतः तत्तु द्विरुक्तिः स्पष्टेति। वीप्सायां कर्मप्रवचनीयत्वं केवलमुपसर्गत्वमेव निवारयतीति भावः।

➢ *अभिरभागे(१/४/९१)* :

पूर्वसूत्रे लक्षणेत्थम्भूताख्यानभागवीप्साः इत्यर्थचतुष्टये केवलं भागं विहाय अपरत्र **अभि** इति कर्मप्रवचनीयसंज्ञा भवतीति वाच्यार्थः। लक्षणार्थे उदाहरणं यथा **हरिमभिवर्तते**ऽर्थाद् हरिमुद्दिश्य कश्चित् पुरुषः तत्र तिष्ठतीति । इत्थम्भूताख्याने यथा **भक्तो हरिमभि** इति हरिविषयकः भक्तिमान् हरेः भक्तः वेति । **वीप्सार्थे** यथा **देवं देवमभि सिञ्चति**। ननु अभागे इति प्रश्ने वृत्तौ **यदत्र ममाभिष्यात् तद्दीयताम्**[335] इति। अर्थादत्र मम यो भागोऽस्ति स दीयतां मह्यमित्यर्थः, अत्र भागार्थे अभिरिति प्रयुज्यते । अतः कर्मप्रवचनीयस्य प्रसङ्गो नास्ति पुनः उपसर्गेण अभिरिति प्रयुक्तः। अतः *उपसर्गप्रादुर्भ्यामस्तिर्यच्परः*(८/३/८७) इत्यनेन **स्यादिति ष्यादिति** रूपेण परिवर्तते।

➢ *अधिपरी अनर्थकौ(१/४/९३)* :

अनर्थकौ अधिपरी कर्मप्रवचनीयौ भवतः इति। यथा कुतः अध्यागच्छति, कुतः पर्यागच्छतीति। अत्रागच्छति इत्यर्थं ऋते नान्यः कोपि अर्थः सूच्यते, अतः तौ अनर्थकौ इति। भगवन्तः पतञ्जलयः महाभाष्ये निगदितवन्तः **"अनर्थान्तरवाचिनौ धातुना उक्तक्रियामेव आहतुः"**इति, तौ केवलं धातुना बोधितायाः क्रियायाः वाचकौ इति।

एतयोः अनर्थकयोः निपातयोः कर्मप्रवचनीयत्वमस्वीक्रियते चेद् गतिसंज्ञा प्राप्ता; पुनश्च स्वरभेदोऽपि जातः। *यतो हि गतिर्गतौ* (४/१/७०) इत्यनेन गतिसंज्ञकशब्दे सति पूर्वस्थितो गतिसंज्ञकशब्दोऽनुदात्तो भवतीति । **कुतः अध्यागच्छति** इत्यत्र **आ** इति गतिसंज्ञकं यतो हि धातुना सह वर्तमानम्; अस्मात् प्रागधिरिति गतिसंज्ञको भवति चेत् तस्य स्वरो *गतिर्गतौ* (४/१/७०) इत्यनेनानुदात्तो भवति, तन्निवारणाय तयोः कर्मप्रवचनीयत्वं स्वीकृतम् । सरलतया तयोः निपातयोः कर्मप्रवचनीयत्वं नास्तीति सत्त्वेऽप्यनुदात्तनिवारणाय कर्मप्रवचनीयता स्वीकार्या इति भावः।

[335] दीक्षितवृत्तिः



Jahnavi Sanskrit E-Journal (The First Unpaid Sanskrit E-Journal by सारस्वत-निकेतनम्) published by Dr. Bipin Kumar Jha
Avilable at jahnavisanskritejournal.in Issue 36-37 Vol- I Year 10. Date 09 March, 2019 JSEJ/36-37/I/10/2019
Since 2009
ISSN- 0976-8645
UGC RN-41039

➢ *सुः पूजायाम्(१/४/९४)* :

प्रशंसार्थे सु इति कर्मप्रवचनीयसंज्ञां लभते इति सूत्रार्थः । यथा **सुसिक्तम्** अर्थात् सम्यक् सेचनमिति, **सुस्तुतम्** सम्यक् स्तव इति । अत्र सोः कर्मप्रवचनीयत्वात् "*उपसर्गात् सुनोति-सुवति-स्यति-स्तौति-स्तोभति-स्था-सेनय-सेध-सिच्-सञ्जस्वञ्जाम्*"(८/३/६५) इत्यनेन सकारस्य षत्वं न भवति । प्रकृतसूत्रे *पूजायामि*ति प्रश्ने दीक्षितमहाभागैर्भणितम् **"सुषिक्तं किं तवात्र । क्षेपोऽयम्"** इति, किमिदं तव सुसेचनमित्यर्थः; उपहासः प्रकटितोऽत्र। अतो निन्दायां सोः कर्मप्रवचनीयत्वे अप्रसक्तित्वात् तथोपसर्गत्वे प्रसक्तित्वात् षत्वं भवतीति।

➢ *अतिरतिक्रमणे च(१/४/९५)*:

अतिक्रमार्थे प्रशंसार्थे च अतेः कर्मप्रवचनीयसंज्ञा भवति। यथा **अति देवान् कृष्णः** अर्थाद् गुरुत्वे कृष्णः देवान् अतिक्रमति तथा देवेभ्यरुत्कृष्ट इत्यर्थः।

➢ अपिः *पदार्थसम्भावनान्ववसर्गगर्हासमुच्चयेषु(१/४/९६)*:

**एषु द्योत्येष्वपिरुक्तसंज्ञकः स्यादि**ति दीक्षितवचनम्। अप्रयुज्यमाने(अप्रयुक्ते) पदार्थे, असाध्यसाधनशक्तौ, स्वेच्छाचारानुमतौ, निन्दायां, समुच्चये च सूचिते सति **अपि** कर्मप्रवचनीयसंज्ञको भवतीत्यर्थः। उदाहरणानि क्रमशः प्रदर्श्यन्ते यथा अप्रयुज्यमानार्थे "*सर्पिषोऽपि स्यात्*" इति। अत्र बिन्दुरिति पदमप्रयुक्तत्वाद् अपिना तदर्थः सूच्यते। अतो बिन्दोरर्थमपि सूचयतीति, अतः अपिरत्र स्वल्पार्थस्य द्योतक इति। सर्पिष इति षष्ठी कथमिति प्रश्ने सर्पिषा सह अपेरन्वयो नास्ति किन्तु अपिना साकं बिन्दोरन्वयोऽस्ति। बिन्दुसर्पिषोर्मध्येऽत्रावयवावयविभावसम्बन्धे षष्ठी भवतीति। पुनश्च **स्यादि**त्यनेन अपेरन्वयः न तु उपसर्गगतः अपि तु अर्थगतः। अतः कर्मप्रवचनीयत्वात् *उपसर्गप्रादुर्भ्यामस्तियच्परः*(८/३/८७) इत्यनेन षत्वं न भवतीति।

सम्भावनार्थे **अपि स्तुयाद् विष्णुम्** इत्यत्र अवाङ्मनसगोचरविष्णोः स्तुतिः केनापि न कर्तुं शक्यते इति तात्पर्यम्। अतः असम्भवेऽप्यत्रात्युक्तिर्ज्ञायते। अतः **अपिः** कर्मप्रवचनीयः; **स्तुयादि**त्यत्र षत्वं न भवति। *सम्भावनेऽलमिति चेत् सिद्धाप्रयोगे*(३/३/१५४) इत्यनेन सम्भावनार्थे लिङ्लकारो भवत्यत्र। अन्ववसर्गार्थे यथा **अपि स्तुहि** इति। इच्छास्ति चेत् स्तुहि इत्यर्थः। गर्हार्थे यथा **धिग्देवदत्तम्, अपि स्तुयाद् वृषलमि**ति देवदत्तं निन्दति, यतः स शूद्रं स्तौति इत्यर्थे अपिरत्र निन्दार्थद्योतकत्वात् कर्मप्रवचनीयो भवति। समुच्चयार्थे यथा **अपि सिञ्च अपि स्तुही**ति सेचनं कुरु स्तुतिमपि कुरु इत्युभयोः बोधो जायतेऽत्र। पुनश्च कर्मप्रवनीयत्वात् तत्र कुत्रापि षत्वं न भवति। एतावत् पर्यन्तं कर्मप्रवचनीयानां साहचर्येण द्वितीयाविभक्तेरुपपत्तिर्दर्श्यते।

सम्प्रति पञ्चमीविभक्तावपि तेषां प्रारूप्यमालोचनीयम्।

➢ *अपपरी वर्जने(१/४/८८)*:, *पञ्चम्यपाङ्परिभिः(२/३/१०)*:

एताभ्यां सूत्राभ्यां वर्जनार्थे अपपरी एतौ कर्मप्रवचनीयौ स्तः; *पञ्चम्यपाङ्परिभिः*(२/३/१०) इत्यनेन पञ्चमी प्राप्ता। *कर्मप्रवचनीयाः*(१/४/८३) इत्यस्मादत्र कर्मप्रवचनीयसंज्ञायाः अनुवृत्तिर्भवति तथा अस्य विपरिणामो भवति द्विवचनान्तरूपेण। **अप हरेः संसारः, परि हरेः संसारः** इति। **"हरिं वर्जयित्वा जनिमृतिचक्रात्मकः संसार इत्यर्थः"**[336]। वर्जनमित्यर्थकं विहायान्यत्र न कुत्रचिदप्यपपरियोगेन कर्मप्रवचनीयत्वं न प्राप्तमिति। यथा *ओदनं परिषिञ्चति* इत्यत्र कर्मप्रवचनीयाभावे उपसर्गत्वात् *उपसर्गात् सुनोति*... (८/३/६५) इत्यनेन षत्वं भवति। **आ मुक्तेः संसारः** इति आङ्योगे पञ्चम्यारुदाहरणम्। यावत्पर्यन्तं मुक्तिर्न भवति तावत्पर्यन्तमेव संसार इत्यर्थः।

➢ *आङ्मर्यादावचने(१/४/८९)*:

अत्र *'आङ्'* इत्यर्थस्य द्वयमस्ति १. मर्यादा २. अभिविधिः चेति। मर्यादाभिविध्यर्थे आङः कर्मप्रवचनीयसंज्ञा भवति। मर्यादा नाम अवधिः, वचनं

[336] बालमनोरमा

नाम अभिविधिश्च। पुनश्च अभिविधिरित्युक्ते व्याप्तिरिति। किन्तु प्रकृतसूत्रस्थं वचनमित्युक्ते उक्तिरिति। मर्यादायाः वचनं यस्मिन् तन्मर्यादावचनं; तस्मिन्, मर्यादावचने इति विग्रहः। बहुव्रीहिसमासनिष्पन्नत्वादत्रान्यपदार्थः प्रधानो भवति। यस्मिन् सूत्रे *मर्यादा* इत्युक्ता तत् सूत्रं 'मर्यादावचनम्'; मर्यादावचनस्य कृते आङः कर्मप्रवचनीयसंज्ञा भवतीति सूत्रार्थः। ननु कस्मिन् पाणिनीयसूत्रे मर्यादायाः वचनमस्तीति चेद् अव्ययीभावे *आङ् मर्यादाभिविध्योः*(२/१/१३) इति मर्यादाभिविध्योः आङ् कर्मप्रवचनीयसंज्ञकः भवतीति। अतः ***आङ्* मर्यादा *वचने*** इत्यत्र वचनेनाभिविधेः ग्रहणं भवतीति विवक्षा। यथा **आ मुक्तेः संसार** इति मर्यादायाम् आङ् इति कर्मप्रवचनीयसंज्ञकः तथैवच *आ सकलाद् ब्रह्म* इत्यभिविधौ।

- *प्रतिः प्रतिनिधिप्रतिदानयोः(१/४/३२):, प्रतिनिधिप्रतिदाने च यस्मात्(२/३/११):*

प्रतिनिधिप्रतिदानयोः कृते **प्रति**रिति कर्मप्रवचनीयसंज्ञकः भवतीत्यर्थः। सूत्रे यस्मादित्यस्यार्थः यस्येति। अत्र षष्ठ्यर्थे पञ्चमी अस्ति। यथा **'प्रद्युम्नः कृष्णात् प्रति'** इत्यर्थात् कृष्णपुत्रः प्रद्युम्नः कृष्णस्य प्रतिनिधिः इति सरलार्थः। पुनश्च '***तिलेभ्यः प्रति यच्छति माषान्***' तिलानां विनिमयेन माषान् यच्छति इत्यर्थः। अतः प्रति इति कर्मप्रवचनीययोगे पञ्चमी भवतीति प्रदर्श्यते।

साम्प्रतं कर्मप्रवचनीयप्रयोगे कथं सप्तमी विधीयते तदनुष्ठीयते।

- *अधिरीश्वरे(१/४/९७):, यस्मादधिकं यस्य चेश्वरवचनं तत्र सप्तमी(२/३/९):*

स्वस्वामिभावसम्बन्धे द्योतिते अधिरुक्तसंज्ञको भवत्यत्र। यस्मादधिकमिति यस्मात् पदार्थादधिकं तत्रेति विग्रहः। पुनश्च यस्य ईश्वरत्वं स्वामित्वं वा प्रतिभातं तत्र कर्मप्रवचनीययोगे सप्तमी भवतीति सामान्या विवक्षा। उदाहरणसौविध्यार्थमत्र प्रकृतसूत्रं द्वैविध्याय कल्पते, यथा **यस्मादधिकम्** इत्यस्योदाहरणं हि **उप परार्धे हरेर्गुणाः** इत्यर्थाद् हरिः नारायणो वा तस्य गुणः परार्धादधिक इत्यर्थः। पुनश्च **यस्य चेश्वरवचनम्** इत्यनेनार्थद्वयं विवक्षितमस्ति। यथा यस्य सम्बन्धे ईश्वर इति वचनमिति विग्रहतोऽधिकारी स्वामी वा स्वयमेव ज्ञायते यथा **अधि भूवि रामः** इति। पुनर्यस्य ईश्वर इति वचनम् इत्यर्थात् 'स्व' अधिकृतपदार्थो वा यथा **अधि रामे भूः** इति। उभयत्र अधियोगे स्वस्वामिनोः सकृत् सकृद्रूपेण कर्मप्रवचनीयत्वात् सप्तमी विधीयते।

एवं रीत्या उपर्युक्तानामेकादशानां कर्मप्रवचनीयानां स्वरूपाणि यथासाध्यं प्रस्तौम्यहम्।

**कुतो वा नूतनं वस्तु वयमुत्प्रेक्षितुं क्षमाः।**
**वचोविन्यासवैचित्र्यमात्रमत्र विचार्यताम्॥**

## सन्दर्भग्रन्थसूची

१. रामगङ्गा शर्मा, मालती शर्मा. (१९९७). वैयाकरणसिद्धान्तकौमुदी कारकप्रकरणम्, page- २४-३३, ९६-९८, १६५, P. Box 1108 Kachori Gali, Varanasi - 221001: BHARATIYA VIDYA PRAKASHAN.

२. ड. सत्यनारायण चक्रवर्ती. (२०१०). पाणिनीयशब्दशास्त्र, page- २१८-२२३, २४४-२४५, २६५, संस्कृतपुस्तकभांडार-३८, विधानसरणी, कलिकाता- ७००००६: देवाशीष भट्टाचार्य.

३. लाहिरी, शास्त्री, वन्द्योपाध्याय (२००६) पाणिनीयम्, page- ९०-९३, The Dhaka Student Library, 5/1 श्यामाचरण दे स्ट्रीट, कलिकाता- ७०००७३.

४. ड. सच्चिदानन्द मुखोपाध्याय. (१९७३). वैयाकरणसिद्धान्तकौमुदी कारकप्रकरण, page- २१०-१३०, साहित्यनिकेतन, वर्णपरिचय, कलिकाता- ७००००७: श्रीसत्यनारायण वन्द्योपाध्याय.



Jahnavi Sanskrit E-Journal (The First Unpaid Sanskrit E-Journal by सारस्वत-निकेतनम्) published by Dr. Bipin Kumar Jha
Avilable at jahnavisanskritejournal.in Issue 36-37 Vol- I Year 10. Date 09 March, 2019 JSEJ/36-37/I/10/2019
Since 2009
ISSN- 0976-8645
UGC RN-41039

**Subscription ID 232067837 Received on- 18/02/2019**

# संस्कृतनाटकेषु भाषावैचित्रम्

दीपङ्कर मण्डल

सहकारी-अध्यापक,चातरा-रामाइ-पण्डित-महाविद्यालय,
दारापुर,वाकुडा,पश्चिमवङ्ग

---

**प्रमुखशब्दाः** – भाषा, संस्कृतम्, नाटकम्।

**शोधसारः -** संस्कृतरूपकेषु विशेषतः संस्कृतनाटकेषु विविधानां *पात्राणां वैचित्रानुसारेण विविधा भाषा स्थापिता नाट्यकारैः शास्त्रानुसारेण। नाटकीयपात्रानां सामाजिकावस्थानां तथा श्रेणीवैषम्यत्वात् लिङ्गवैषम्यत्वात्तेषां भाषानिर्धारितम् । नाटकीयचरित्रेषु के के का का भाषाप्रयोगं कुर्वन्ति, कुत्र वा तेषां भाषाप्रयोगे स्वतन्त्रता परिलक्षिता तथा एतद्विषये किम्वा शास्त्रकाराणां निर्देशः विहितः ते सर्वैवात्र संक्षिप्तरूपेण आलोचितम् ।*

कवेः कर्म काव्यम्, काव्यमिदं मुलतः दृश्यं श्रव्यञ्च भेदेन विभक्तम्। साहित्यदर्पणस्य षष्ठप्रिच्छेदे दृश्यते - "दृश्यश्रवत्वभेदेन पुनः काव्यं द्विधा मतम्। दृश्यं तत्राभिनेयम्।" दृश्यकाव्यं तु रूपक-उपरूपकमेव वोध्यते। "तद्रूपारोपात्तु रूपकम्"- अतः यत्र नाटकीयपात्रानामोपरि विविधानां चरित्रानामारोपं भवति तद्काव्यं रूपकमुच्यते। "काव्येषु नाटकं रम्यम्"- एतेषु काव्यभेदेषु दृश्यकाव्यं सर्वेषां प्रियमस्ति, यतः अत्र विषयवस्तुनि अभिनयात्मकानि तथा वाक्यालापेण परिवेशितः भवति। वस्तुतः दृश्यकाव्यमेव रूपकं वोध्यते,पुनः अभिनयात्मकानि नाटकान्येव दृश्यकाव्यरूपेण तथा रूपकरूपेण सर्वजनेषु प्रचलितानि । एषा प्रचलिताधारानुसारेण सर्वे संस्कृतदृश्यकाव्यं नाटकरूपेण उपस्थापितमत्र। नाट्यशास्त्रे भरताचार्यः उक्तं, नाटकेषु भाषा मृदुः,लालितः, अर्थयुक्तश्च भवेत् ।जनपदेषु जनाः या भाषा सुखेन वदन्ति,अनुधावन्ति च सा भाषैव नाटकस्य उपयुक्ता तथा उत्तमा भाषा भवितुमर्हति। या च सर्वेषां वोधगम्यात्मका भाषा सा भाषा नाटकस्योपयुक्ता भाषा भवेत् इति सरलार्थः। अतः संस्कृतनाटकेषु भाषाप्रयोगमेव अपरिहार्यम् अवश्यमेव वैचित्रञ्च रक्षणीयम् इति।

**भाषावैचित्रम् -** नाटकेषु समाजचित्रं प्रतिफलितम्। समाजस्य यत् किञ्चित् सुकरं दुःखजनकञ्च तत् सर्वमेव नाटके प्रतिफलितम् ।विविधानां मानवानां स्थानमस्मिन् संसारे । एतद कारणादेव नाटके विविधानां चरित्राणां समावेशः भवति । नाटकं प्राणवन्तं ग्रहणीयञ्च कर्तुं नाटकेषु प्रयुक्तेषु विविधपात्रेषु मुखेषु तेषां नित्यव्यवहारभाषाणामेव निदानं विधेयम्। एतद्विषये भरतेन अभिहितं नाट्यशास्त्रस्य सप्तमाध्याये। विविधा जनजातयः तेषां स्वीयभाषायामेव वाक्यालापं कुर्वन्ति। अतः नाटकेषु एतादृशानां पात्राणां रूपारोपातुं चेत् तादृशानां स्वकीयभाषाप्रयोगमेव उपयुक्तं भवेतिति।

न वर्वरकिरातान्ध्रा द्रामिलाद्यासु जातिषु ।
नाट्य-प्रयोगे कर्तव्यं पाद्यं भाषासमाश्रयम् ॥
सर्वास्वेव हि जातिषु शुद्धासु द्विजसत्तमाः ।
सौरसेनीं समाश्रित्य भाषां काव्येषु योजयेत् ॥
अथवा छन्दतः कार्या देशभाषा प्रयोत्कृथिः ।
नानादेशसमुच्चं हि काव्यं भवति नाटके ॥

अतः चरित्राणां वैचित्रानुसारेण तेषां भाषाप्रयोगे वैचित्रमपि परिलक्षितम् । अतः नाटकेषु समभाषायाः प्रयोगं न कृतं नाट्यकारैः। यदि राजा, रक्षीपुरुषः, पुरोहितः, भृत्यः, अन्तःपुरचारिकादि पात्राः सर्वे संस्कृतेन वाक्यालापं कुर्वन्ति तर्हि तत् नाटकं सुखकरं न भवेत्, वास्तविकतायाः अभावात् नाटकमलीकविषये पर्यवसितं जातम् ।अतः दर्शकसकाशे नाटकं प्राणवन्तं कर्तुं नाट्यकाराः नाटकस्य चरित्रानुसारेण संस्कृतं तथा प्राकृतादि प्रयोगं कृतवन्तः । मुलतः नाटके शिक्षिताः मार्जिताश्च संस्कृतं वदन्ति,महिला, विदूषकः तथा भृत्यादि अधमपात्राः प्राकृतं वदन्ति। एषा प्राकृतभाषा विविधा सन्ति। वररुच्यनुसारेण प्राकृतभाषायाः चत्वारः भेदाः वर्तन्ते– महाराष्ट्री, शौरसेनी,मागधी,पैशाचीच ।वररुच्यनन्तरं आचार्य-हेमचन्द्रः

Jahnavi Sanskrit E-Journal (The First Unpaid Sanskrit E-Journal by सारस्वत-निकेतनम्) published by Dr. Bipin Kumar Jha
Avilable at jahnavisanskritejournal.in Issue 36-37 Vol- I Year 10. Date 09 March, 2019 JSEJ/36-37/I/10/2019
Since 2009
ISSN- 0976-8645
UGC RN-41039

उक्तचतुर्भेदव्यतिरिक्तः भेदास्त्रयः उल्लिखितः –आर्ष, चुलिका, पैशाची च । शाकारी, चाण्डाली, ढक्की, आभीरी, अवन्ती, नागर, प्राच्या, इत्यादयः प्राकृतानां परिचयमपि प्राप्तम् ।नाटके भाषाप्रयोगविषये आचार्य-विश्वनाथ-महोदयेनोक्तं यत्-

पुरुषाणामनीचानां संस्कृतं स्यात् कृतात्मनाम् ।
शौरसेनी प्रयुक्तव्या तादृशीनां च योषिताम् ।।
आसामेव तु गाथासु महाराष्ट्रीं प्रयोजयेत् ।
अत्रोक्ता मागधीभाषा राजान्तःपुरचारीणाम् ।।
चेटानां राजपुत्राणां श्रेष्ठानां चार्धमागधी ।
प्राच्यां विदूषकादीनां धूर्त्तानां स्यादवन्तिजा ।।

उच्यते यत्- "प्रकृत्या स्वभावेन सिद्धमिति प्राकृतम्", "प्राकृतजनानां भाषा प्राकृतम्" वा । अतः प्राकृतभाषा साधारणजनानां स्वभावसिद्धभाषा, तेषां प्रत्यहं व्यवहारोपयोगि भाषा। हेमचन्द्रेनोक्तम्-"प्रकृतिः संस्कृतं तत्र भवं तत आगतं वा प्राकृतम्"। अत्र प्रकृति: संस्कृतमेव वोध्यते, परन्तु एकादशशतके नमिसाधुरुद्रटस्य काव्यालङ्कारसूत्रे दृश्यते, प्राकृतभाषा सा भाषा यया सकलजीवा: स्वभावसिद्धरूपेण वदन्ति,न सा भाषा व्याकरणेन संस्कृतं भवति। अतोच्तते - "सकल-जगज्जन्तूनां व्याकरणादिभिरनाहित-संस्कारसहजोवचनव्यापारः प्रकृतिः।तत्र भवं सैव वा प्राकृतम्"। भिन्तारनित्स महोदयेन उक्तं - Common language of the people." अतः प्राकृतं तथा संस्कृतविषये पण्डितेषु विवादः परिलक्षितः। यतः नाटकेषु विशिष्ठजनाभिः सह साधारणजनापि सन्ति, अतः सुदक्षाः नाट्यकाराः तेषु नाटकेषु संस्कृतेन सहविविधानां प्राकृतानां व्यवहृतवन्तः ।कालिदासस्य नाटके, शूद्रकस्य मृच्छकटिकमनाटके, भास-नाट्यचक्रे, भवभूतेः नाट्यकृते, तथा अपरेषु संस्कृतनाटकेषु संस्कृतेन सह प्राकृतमपि समरूपेण प्रयुक्तम् । प्रायशः नाटकेषु शौरसेनी, मागधी च प्राकृतं व्यवहृतं,यतः एताभिः भाषाभिः सह संस्कृतस्यसंयोगः प्रत्यक्षरूपेण वर्तते,तथा साधारणजनानां मुखे प्रचलिता प्रसिद्धा भाषारूपेण स्वीकृता ।अभिज्ञानशकुन्तलानाटके राजा दुष्यन्तः, महर्षिः कण्वः, मृच्छकटिके चारुदत्तः प्रभृतयः पात्राः संस्कृतं वदन्ति। पक्षान्तरे शकुन्तला, अनसूया, प्रियंवदा, वसन्तसेनादि स्त्रीपात्राः शौरसेनी-प्राकृते अवदन् ।रक्षीपुरुषाः, भृत्यादि अधमपात्राश्च मागधी-प्राकृतप्रयोगं कृतवन्तः। परन्तु एतद् न मन्यते यत् प्राकृतजनाः केवलं प्राकृतमेव शिष्ठजनाः च संस्कृतं वोध्यते,अपि तु ते संस्कृत-प्राकृतभाषामपि वोध्यते, नोचेत् नाटकीयपात्रेषु शिष्ठजना केवलं शिष्ठजनैः सह अपरपक्षतः प्राकृतजनाः तथा समाजस्य नीम्नवर्गीयाः केवलं स्वजातीयमध्ये वाक्यालापं कुर्वन्ति। परन्तु संस्कृतनाटकेषु न एतदृष्टम्। यदि अभिज्ञानशकुन्तलमनाटके दुर्वासिसः मुखनिर्गतस्य शापवृत्तान्तार्थं न वुद्धं शकुन्तलासखिभिः तर्हि किं नाटकमिदं रोचकरं भवेत्? नाटकस्य नाटकीयता किं रक्षिता भवेत्? कथं वा शकुन्तला-दूष्यन्तयोः,चारुदत्त-वसन्तसेनयोः तथा अपरेषु नाटकान्तर्गतेषु प्रणयवृत्तान्तानि दर्शकसमीपे ग्रहणीयञ्च भवेत्? अतः दृश्यते अभिज्ञानशकुन्तलनाटके शकुन्तला-दुष्यन्तयोः मध्ये प्रणयपर्यायकाले दुष्यन्तः संस्कृतं वदति, शकुन्तला तु प्राकृतेन प्रत्युत्तरति । विषयमिदं दर्शकान् विस्मापयति, परन्तु न विस्मर्तव्य यत् शकुन्तला एका आश्रमपालिता कन्यासीत्, या तस्या प्रत्याहिकजीवने अनसूया-प्रियंवदाभ्यां सह प्रकृतेन वाक्यालापं कृतवती, सम्प्रती दुष्यन्तेन सह वाक्यालापकाले यदि तस्याः मुखे संस्कृतं स्थापितः नाट्यकारेण तर्हि नाटकस्य नाटकीयता तथा चरित्राणां स्वकीयता अवरुद्धा जाता। अतः नाटकस्य नाटकीयता, पात्राणां सामाजीकावस्थानञ्च विवेच्य भाषाप्रयोगं कर्तव्यमिति। मृच्छकटिके नाटके संस्कृतनाटकेषु समधिका प्राकृतभाषा तथा आञ्चलिकाभाषा प्राप्ता। अनुमीयते यत् एतादृशभाषाप्रयोगेन शूद्रकः प्राकृतजनानां समीपे तस्य नाटकं प्राणवन्तं कर्तुं जनानां मध्ये ग्रहणीयञ्च कर्तुं इच्छतीति।



Jahnavi Sanskrit E-Journal (The First Unpaid Sanskrit E-Journal by सारस्वत-निकेतनम्) published by Dr. Bipin Kumar Jha
Avilable at jahnavisanskritejournal.in Issue 36-37 Vol- I Year 10. Date 09 March, 2019 JSEJ/36-37/I/10/2019
Since 2009
ISSN- 0976-8645
UGC RN-41039

वैचित्रं खलु नाटकस्य मूलम्। वैचित्रामेतांप्रदर्शनाय नाट्यकाराः तेषां नाटकेषु भाषाप्रयोगे स्वातन्त्रता प्रदर्शिता। अतः शास्त्रकाराणां विधानं सर्वत्रं समरूपेण न रक्षितम् । नाटकस्य प्रयोजनानुसारेण नाटकेषु पात्राणां दशापरिवर्तनस्य कृते पात्राणां भाषापि परिवर्तनीयम्। यतः भाषापि सामाजीकावस्थायाः परिचयवाहका भवति ततः दशापरिवर्तनेन तस्य भाषापि परिवर्तनीयमिति। एतद्विषये नाट्यशास्त्रे दृष्टम् -

ऐश्वर्य्येन प्रमत्तस्य दारिद्रोपहतस्य च ।
उत्तमस्यापि पठतः प्राकृतं संप्रयोजयेत् ॥

विश्वनाथविहितो भाषानियमो प्रायशः लङ्घितः भवति। संस्कृतनाट्यतत्त्वमीमांसकैः नाटकेषु चरित्रविशेषैः भाषाणां यादृशं विधानं निर्दिष्टम्, तत्तु बहुषु नाटकेषु नैव परिलक्षितम्। केषुचिन्नाटकेषु सर्वैः पात्रैः व्यवहृता संस्कृतभाषा,केषुचिच्च प्राकृतस्थले कापि प्रादेशिकीभाषा। नाटचन्द्रिकायां रूपगोस्वामी अस्मिन् विषये उक्तम्- "सर्वेषां कारणवशात् कार्यो भाषा व्यतिक्रमः"। यथा कर्पूरमञ्जरीनाटके राजशेखरः पात्राणां मुखे प्राकृतं प्रयुक्तम् । वस्तुतः कर्पूरमञ्जरी सट्टकनामधेया उपरूपकान्तर्गता रचनास्ति। ग्रन्थाकारेण राजशेखरेणोक्तं ग्रन्थस्यादौ -

तत् सट्टकमिति भन्यते दूरं यो नाटिकाभिनुसरति ।
किं पुनः प्रवेशकविष्कम्भकौ केवलं न दृश्यते ॥

दशमशतके राजशेखरस्य प्रदत्तमिदं सट्टकलक्षणमुसृत्यैव चतुदश-शतके साहित्यदर्पणकरेण प्रदत्तम् -

सट्टकं प्राकृताशेषपाठ्यं स्यादप्रवेशकम् ।
न च विष्कम्भकोऽप्यत्र-प्रचुरश्चद्भूतो रसः ॥

प्रधानतः सट्टकं प्राकृतनिर्भरं,प्रवेशक-विष्कम्भकरहितं, नाटिकनुसारी च भवति। अतः राजा-चन्द्रपालः,नायिका-कर्पूरमञ्जरी,परिचारिकाः सर्वे प्राकृतभाषायामेववाक्यालापं कुर्वन्ति। यथा कर्पूरमञ्जरीरचनायां प्रथम-यवनिकान्तरे राजा-चन्द्रपालः शौरसेनीमाश्रित्यं वदति -"सच्चं विअक् खणा विअक् खणा चदुरन्तणे उत्तीणं। ता किंपि अण्णं विचिन्तदाअए"। मृच्छकटिकमनाटके नायिका वसन्तसेना, मालतीमाधवे मालती, लवङ्गिका च प्राकृतं परित्यज्य कियदंशे संस्कृतं वदन्ति । अपि च अभिज्ञानशकुन्तलमनाटकस्य चतुर्थाङ्के प्रियंवदया संस्कृतश्लोकमेकं उक्तम् यद्यपि अन्यत्र शौरसेनीं वदति-

दूष्यन्तेनाहितं तेजो दधानां भूतये भूवः ।
अवेहि तनयां व्रह्मन्नग्निगर्भां शमीमिव ॥

अनुमीयते यत् प्राप्तवार्तां यथायथरूपेण ज्ञापनार्थमेषा प्रचेष्टा। अग्निशरणगृहे अशरीरं छन्दोमय्या वाण्या एषा। मुलतः कस्यापि वक्तव्यं अविकृतावस्थायां यथायथरूपेण उपस्थापनार्थंप्राकृतस्थाने संस्कृतप्रयोगमपि दृश्यते कदाचित्। अप्सराणां सम्वन्धः देवैः सह यतः परिलक्षितः ततः अप्सराणां भाषा संस्कृतं भवेत्,परन्तु विक्रमोर्वशीयं नाटके अप्सरागणाः प्राकृतमेव वदन्ति । यथा विक्रमोर्वशीयं नाटके प्रथमाङ्के रम्भायाः उक्तम् - "सव् वहा महाराओ कप् पसदाइं पुहवी पालअंतो भोदु।" एवम्प्रकारेण नाटकेषु भाषावैचित्रं प्रदर्शितम् शास्त्रकारैः । साहित्यदर्पणे दृष्टम् –

कार्यतश्चोत्तमादीनां कार्य्यो भाषाविपर्ययः ।
योषित्-सखी-वाल-वेश्या-कितवाप्सरसां तथा ।।
वैदग्ध्यार्थं प्रदातव्यं संस्कृतं चान्तरान्तरा ।।

## सन्दर्भग्रन्थसूची

1. मनुस्मृति-कुल्लूक की मन्वर्थमुक्तावली टीका सहित,सम्पादक, गोपाल शास्त्री हिन्दी व्याख्याकार, हरगोविन्द शास्त्री,चौखम्भा संस्कृत संस्थान वाराणसी,1982
2. याज्ञवल्क्यस्मृति: निर्णय सागर प्रेस,बम्बई,1949
3. वाचस्पत्यम्. श्री तारानाथ, तर्कवाचस्पति, राष्ट्रियसंस्कृतसंस्थान, नई दिल्ली,
4. संस्कृत-हिन्दी कोश,वामन शिवराम आप्टे, रचना प्रकाशन,जयपुर,२००६

Subscription ID 219767521 Received on- 12/12/2018

# जनतन्त्रं शिक्षा च

निवेदिताकर

श्रीजगन्नाथसंस्कृतविश्वविद्यालयः पुरी.

----------------------------------------------------

**प्रमुखशब्दाः** – जनतन्त्रम्, शिक्षा, प्रजा, शासनम्, प्रजातन्त्रम्।

**शोधसारः** -*समाजं नाम जनानां समुहः। अत्र सर्वेषां समानाधिकारः वर्त्तते। अतः प्रत्येकस्मिन् मानवे ऐक्यभावनायाः जागरणार्थं प्रजातन्त्रशासनमपेक्षितम्। प्रजातन्त्रं सर्वोत्कृष्टं सामाजिकराष्ट्रियसंघटनमस्ति। प्रजातन्त्रं नाम जनानां तन्त्रं शासनं वा। अस्य अपरनामानि जनतन्त्रं, गणतन्त्रं वा।*

आङ्गलभाषायां Democracy इति ग्रीक्भाषातः Demos Cratic इति पदयोः मेलनेन सञ्जातः। Demos इत्यस्यार्थः शक्तिः । Cratic इत्यस्यार्थः जनता इति । अतः Democracy इति सम्पुर्णपदस्यार्थः भवति गणक्षमता, अर्थात् प्रजाभिः परिचालिता शासनव्यवस्था (Power of the people as a whole)। प्रसंगेऽस्मिन् **डायसी** महोदयस्तु लक्षयति यत् **प्रजातन्त्रं तत् शासनसूत्रं यत् राष्ट्रस्य ज्येष्ठव्यक्तेः हस्ते निपतति** (Democracy is a form of government, in which the governing body is comparatively a large fraction of the entire nation - Dicey) जनानां सार्वभौमिकत्वमेव जनतन्त्रस्य वैशिष्ट्यम्। अब्राहिमलिङ्कनमहोदयानुसारेण **जनतन्त्रं जनानां, जनैः, जनेभ्यः सर्वकारः** (Democracy is a government of the people by the people, for the people) एव। **जानड्युवी** (John Devey) महोदयेनोक्तम् - **गणतन्त्रं न केवल शासनस्य उपयुक्तरुपमपितु सहयोग-पुर्णजीवनं तथा सम्मिलितानुभूतेः प्रकृष्टोपायः।** जन हितार्थमेव शासनम्। धनिक-निर्धन-जाति-वर्ण-धर्म-सम्प्रदायादीन् विसृज्य सामाजिकमूल्याधारेण समानभावनया जनः स्वाधीनतया अभिमन्त्रितं गणतन्त्रं शान्ति-मैत्री-स्नेह-सहयोगादिभिः गुणैः मानवजीवनं सुखमयं कारयति। राजनैतिक-आर्थिक-सामाजिकसिद्धान्ताः एव अस्य गणतन्त्रस्य प्राणभूताः भवन्ति। यथा -

**क. राजनैतिकजनतन्त्रम्** (Political Democracy)

राजनैतिकगणतन्त्रस्यार्थः भवति जनानां जनैः शासनम्। अर्थात् शासनं व्यक्तिनिष्ठं न अपितु समूहनिष्ठं भवति। सर्वे वयस्काः अपि नागरिकशासनकार्ये भागं ग्रहीतुं समर्थाः भवन्ति। वयस्क मतादानाधिकारः अस्य तन्त्रस्य प्रमुखवैशिष्ट्यम्। जाति-वर्ण-धर्मःरूपभेदभावं परित्यज्य अस्य नियमाः निर्मियन्ते। राजनैतिकजनतन्त्रस्याधिने शासनकार्यं सर्वे जनाः एकीभूय चालयितुं शक्नुवन्ति।

**ख. आर्थिकजनतन्त्रम्** (Economic Democracy)

आर्थिकगणतन्त्रस्यार्थः जनैः जनानां कृते धनस्योत्पत्तिः वितरणं वा । अत्र आर्थिकव्यवस्था आर्थिकशक्तिः विशिष्ट वर्गोपरि न भूत्वा सामान्यजनानां हस्ते भवति। जनतन्त्रीय । अर्थव्यवस्थायां प्रतिस्पर्द्धा अपेक्षया सहयोगभावनोपरि बलं ददाति। अनेन जनाः स्व रुचिः योग्यता, क्षमतानुगुणं कार्यं कर्त्तुं समर्थाः भवन्ति। अस्य वृद्धिः जननां परस्पर सहयोगोपरि निर्भरति ।

**ग. सामाजिकजनतन्त्रम्** (Social Democracy) -

सामाजिकगणतन्त्रस्यार्थः जाति-रूप-धर्म-वर्ग-लिङ्गभेदानुसारं मानवेषु भेदः न गणनीयम् अपितु तेषु ऐक्यभावनायाः वृद्धिकरणम्। मानवानां पुर्णविकासार्थं



Jahnavi Sanskrit E-Journal (The First Unpaid Sanskrit E-Journal by सारस्वत-निकेतनम्) published by Dr. Bipin Kumar Jha
Avilable at jahnavisanskritejournal.in Issue 36-37 Vol- I Year 10. Date 09 March, 2019 JSEJ/36-37/I/10/2019
Since 2009
ISSN- 0976-8645
UGC RN-41039

अत्रावसरः दीयते, तदर्थं वातावरणस्य निर्माणाय प्रयत्नः क्रियते। सामाजिकगणतन्त्रस्यअधिने जनानां कृते राजनीतिक-आर्थिक-सामाजिकक्षेत्रे च स्व शक्तीनां विकासार्थं समानावसरः प्रदीयते, येन तस्य विकासः सम्भवति ।

अनेन स्पष्टं यत् गणतन्त्रम् एका व्यवस्था यया जनाः स्वतन्त्ररूपेण चिन्तनं, मननं, कार्यं कर्त्तुं समानावसरः प्राप्नुवन्ति । यदि मानवः स्व जीवने, कार्यकलापे व्यवहारे च जनतन्त्रीयदर्शनस्य चिन्ताधारा आनयति, तर्हि राज्ये अन्तराष्ट्रियसद्भावनायाः विकासः भविष्यति तथा च सम्पूर्णमानवविकासः भविष्यति ।

**जनतन्त्रस्य परिभाषा (Defination of Democracy)**

अस्य तन्त्रस्यार्थः स्पष्टीकरणार्थम् अधोलिखिताः परिभाषाः उपस्थाप्यन्ते। यथा -

क. **अरस्तू** - जनतन्त्रं जनतानां सर्वकारः भवति (A government by the People).

ख. **सीले** - जनतन्त्रं सर्वस्यापि लोकस्य शासनभागो भवति (Democracy is a government, in which everyone has a share.)

ग. **लार्ड ब्राईस्** - जनतन्त्रम् एकः एतादृशः सर्वकारः, यत्र शासनस्य शक्तिः, व्यक्तिः वर्गोपरि वा न भूत्वा सर्वेषां जनानां हस्तेषु सामूहिकरूपेण भवति । (Democracy is the form of government in which the ruling power or the state is legally vested not in any particular individual or class but in the members of the community as a whole.)

घ. **बोडे** - जनतन्त्रं जीवनयापनस्य एका शैली भवति, येन जीवनस्य प्रमुखानि क्षेत्राणि प्रभावितानि भवन्ति (Democracy is way of life determining influence in every area of life)

ङ. **मेजिनी** - जनतन्त्रस्यार्थः योग्यः तथा सम्यक् नेतृत्वेन सर्वेषां उन्नति साधनम् (True democracy refers to the progress of all through all under the leadership of the wisest and the best.)

च. **राधाकृष्णविश्वविद्यालयशिक्षाऽऽयोगः** - जनतन्त्रं जीवनयापनस्य एकारीतिः, न केवलं राजनीतिकव्यवस्था । एतस्याधिकारः स्वतन्त्रतासिद्धान्तोपरि निर्भरति, येन जाति-धर्म-लिङ्ग भेदभावं विस्मृत्य सर्वेषां उन्नतिसाधनार्थं प्रयत्नः क्रियते (Democracy is the way of life and not a mere political arrangement. It is based on the principle of equal freedom and equal riguts for all regardless of race, religion, sex or economic status).

**जनतन्त्रस्य सिद्धान्ताः** (Principles of Democracy)

जनतन्त्रस्य सफलता तस्य मूलसिद्धान्तानां गुणानां मानवीयजीवने प्रयोगोपरि निर्भरति । जनतन्त्रस्य मूलसिद्धान्ताः एते भवन्ति। यथा -

क. **स्वतन्त्रता** (Freedom) - विचारः, अभिव्यक्तिः, विश्वासः।

ख. **समानता** (Equality) - प्रतिष्ठाः अवसरश्च।

ग. **बन्धुत्वम्** (Fraternity) - व्यक्तित्वस्यादरः राष्ट्रियैकता।

घ. **न्यायः** (Justice) - सामाजिकम्, आर्थिकं, राजनीतिकम्।

क. **स्वतन्त्रता** (Freedom) - स्वतन्त्रता जनतन्त्रस्य आत्मा भवति। स्वतन्त्रतायाः अभावे मानवे पूर्णशक्तीनां विकासः न भवति। अतः प्रत्येक व्यक्तिः स्व जीवनसम्बन्धिसमस्योपरि स्वानुसारं चिन्ता-विचार-लेखन-भाषण-वादविवाद-सम्मति-आलोचनादि कर्त्तुं पूर्ण स्वतन्त्रता प्राप्नोति। अतः स्वतन्त्रतायाः उचितार्थः

समुहैः समुहस्य विकासः करणीयः। अनेन सर्वे स्वविचारं अभिव्यक्तिञ्च स्वतन्त्ररूपेण उपस्थापयितुं समर्थाः भवन्ति।

ख. **समानता** (Equality) - जनानां व्यक्तित्वविकासार्थं स्वतन्त्र समानावसरश्च देयम्। जाति-वर्ग-जन्म-स्थिति-धर्म-लिङ्गानुसारं भेदभावः न गणनीयः। अत्र प्रतिष्ठा अवसरस्य कृते च समानावसरः दीयते। समानतायाः प्रकृतार्थः भवति जनैः स्व रुचि-योग्यता-क्षमतानुसारञ्च विकासार्थं अवसरस्य व्यवस्थाकरणम्। समाजे एकः अपरस्य अवरोधकः न भवेत्।

ग. **बन्धुत्वम्** (Fraternity) - शुद्ध जनतन्त्रस्य कुञ्चिका भवति बन्धुत्वभावना। सर्वे जनाः समाजे एकीभूय निवसन्ति। अनेन व्यक्तेः समाजे सम्मानं भवति। जनतन्त्रीयसमाजे बन्धुत्वभावना प्रमुखः सिद्धान्त इति मन्यते। व्यक्तेः आदरः राष्ट्रियैकता च प्रधानाः भवन्ति।

घ. **न्यायः** (Justice) - भारतसर्वकारैः जनतन्त्रस्य सिद्धान्तेषु न्यायसिद्धान्तः संयोजितः। एतत्सिद्धान्तानुसारं सामाजिकसंस्थया प्रत्येक मानवस्य कृते भेदभावं विहाय समानतया अवसरः कल्प्यते। राजनीतिक-सामाजिक-आर्थिकन्यायाश्च सर्वेषां कृते समानाः भवन्ति। सर्वे स्वाधिकारं कर्त्तव्यञ्च प्रयुक्तुं स्वतन्त्राः वर्त्तन्ते। जाति-धर्म-वर्णादि भेदाः अत्र न परिगण्यते।

**जनतन्त्रस्य मूल्यानि** (Values of Democracy)

जनतन्त्रे राज्यापेक्षया व्यक्तेर्महत्त्वम्, वैयक्तिकविकासस्य च पूर्णोऽधिकारो लभ्यते। राज्यम् अत्र साधनम्, जनोऽत्र साध्यश्च। अत्र व्यक्तेः। भाषणे, लेखने, विचाराभिव्यक्तौ च पूर्ण स्वातन्त्र्यं भवति। ईदृशं स्वातन्त्रं लोकहितसाधकं भवति। अस्य मूल्यानि एते वर्त्तन्ते। यथा -

क. व्यक्तेः आदरः सम्मानञ्च (Respect of the individual)
ख. सहनशीलता (Tolerance)
ग. परिवर्त्तने विश्वासः (Faith in change)
घ. चर्च्चया परिवर्तनम् (Change through persuation)
ङ. सेवा (Service)
च. व्यक्तिगतः सामाजिकः उन्नतिश्च (Individual and social progress) इत्यादयः ।

प्रमुखरूपेण जनतन्त्रोपरि विश्वासः श्रद्धाश्च अपेक्षते। अनेन न केवल देशस्य अपितु प्रत्येकमपि मानवस्य विकासः सम्भवति, देशस्य प्रगतिः जायते।

**जनतन्त्रस्य कृते शिक्षायाः आवश्यकता**

(Need of Education for Democracy) -

जनतन्त्रस्य कृते शिक्षायाः आवश्यकता विषये प्रसिद्ध शिक्षाशास्त्रि **जॉन डीवी** महोदयेन प्रोक्तं यत् -

एकः जनतन्त्रीयसमाजे एतादृशी शिक्षायाः व्यवस्था करणीया येन प्रत्येक मानवः स्व रुचेः, योग्यतानुगुणञ्च सामाजिकसम्बन्धेषु कार्येषु च लिप्ताः भविष्यति।

अनेन सर्वे प्रेरिताः सन् जनतन्त्रस्य सिद्धान्तानां, मूल्यानाञ्च प्रयोगः शिक्षायां कृतवन्तः। जनाः स्वाधिकारविषये जागरुकाः संजाताः, स्व कर्त्तव्यं सुचारुरूपेण सम्पादितवन्तः, येन सम्पूर्ण देशस्य उत्तरोत्तर प्रगतिः जायते । अशिक्षितः जनः एतत् सम्पादयितुं न समर्थः। एवं शिक्षा जनतन्त्रस्य अङ्गः संजातः। जनतन्त्रस्य रक्षार्थं जनतन्त्रीयदेशे मानवानां कृते अनिवार्या निःशुल्कशिक्षायाः व्यवस्था क्रियते।

**शिक्षायां जनतन्त्रम्** (Democracy in Education)

जनतन्त्रीयशिक्षायाः अर्थः भवति - शिक्षायां जनतन्त्रविचाराधारायाः प्रभावः। अत्र शिक्षाविषये



Jahnavi Sanskrit E-Journal (The First Unpaid Sanskrit E-Journal by सारस्वत-निकेतनम्) published by Dr. Bipin Kumar Jha
Avilable at jahnavisanskritejournal.in Issue 36-37 Vol- I Year 10. Date 09 March, 2019 JSEJ/36-37/I/10/2019
Since 2009
ISSN- 0976-8645
UGC RN-41039

सार्वजनीनसुविधया जनानां शिक्षितत्वम्, सार्वजनिककार्येष्वभिरुचिः, बौद्धिकविकासः, स्वावलम्बनं च प्राप्यते। अत्र समानाधिकारत्वात् कस्यचित् वर्गस्य शोषणं न भवति। प्रतिनिधीनां निर्वाचनात् कुशलशासनं प्रचलति। साम्प्रतिकस्थितौ जनतन्त्रमेव सर्वोत्कृष्टत्वेन गण्यते। शिक्षायाः जनतन्त्रीयविचाराः एते भवन्ति। यथा -

क. समानावसरः प्रदानं व्यक्तिगतविभिन्नतायाः आदरश्च (Provision of equal opportunities and recognition of individual differences)
ख. सार्वभौमिकी अनिवार्या शिक्षा च - (Universal and compulsory education)
ग. निःशुल्कशिक्षा (Free education)
घ. प्रौढशिक्षायाः व्यवस्था (Provision of adult-education)
ङ. बाल-केन्द्रितशिक्षा (Child-centred education)
च. शिक्षणपद्धतयः (Methods of teaching)
छ. व्यक्तिगताध्ययनस्य महत्वम् (Importance of individual attention)
ज. सामाजिकक्रियाः (Social activities)
झ. छात्र-परिषद् (Student's union)
ञ. शिक्षकव्यक्तित्वस्य सम्मानम् (Respect of teacher's personality)
ट. विद्यालयप्रशासनम् (School administration)
ठ. बालकस्य शारीरिकस्वास्थ्यम् (Physical health of the child)
ड. बुद्धिपरीक्षाः (Inteligence test)
ढ. विद्यालयः (School)
ण. शिक्षायाः साधने सहयोगः (Co-operation between all the Agencies of education)

**जनतान्त्रिकशिक्षायाः उद्देश्यानि**

(Aims of Democracy Education)

जनतान्त्रिकशिक्षायाः अधोलिखितानि उद्देश्यानि भवन्ति। यथा -

क. सामञ्जस्यपूर्ण व्यक्तित्वस्य विकासः, वैयक्तिकदक्षता, गणतान्त्रिक नागरिकता, धर्मनिरपेक्षे विश्वासः, अन्तराष्ट्रियबोधः इत्यादीनि प्रमुखानि उद्देश्यानि।
ख. शारीरिक-मानसिक-बौद्धिकाश्च विकासः (Development of physical, mental and intellectual)
ग. स्नेह-प्रेम-सहयोगाधारेण व्यक्तित्वस्य विकासः।
घ. जनतान्त्रिकमूल्यानां विकासः (Development of democratic values)
ङ. उत्तमा अभिरुचिनां विकासः (Development of worthy interests)
च. चरित्रानुशासनयोः विकासः (Development of character and discipline)
छ. नेतृत्वस्य विकासः। (Development of leadership qualities)
ज. व्यावसायिककुशलतायाः विकासः
झ. राष्ट्रियान्तर्राष्ट्रियभावनयोः विकासः
ञ. सामाजिकदृष्टिकोणेषु विकासः

**जनतन्त्रं पाठ्यक्रमश्च** (Democracy and Curriculum)

जनतन्त्रराज्ये जनतन्त्रीयादर्शानां मूल्यसिद्धान्तानामनुगुणञ्च पाठ्यक्रमनिर्माणं क्रियते। अतः बालकस्य चतुर्मुखीविकासः मनसि निधाय अस्य पाठ्यक्रमस्य संरचना विधीयते। जनतन्त्रीयपाठ्यक्रमः एतेषु सिद्धान्तेषु पर्यवेसितः। यथा -

क. बहुमुखी (Diversified) - कक्षायाः कार्यकलापसहगामीक्रिया, क्रीडादि

अस्यान्तर्भूक्ता: भवन्ति।

ख. सामाजिकोद्देश्यानां प्राप्ति: (Achievement of social aims)

ग. शीथिलता (Flexibility)

घ. स्थानीयावश्यकतोपरि बलम् (Emphasis on local needs)

ङ. व्यावसायिक आवश्यकताया: व्यवस्था (Provisions for vocational needs)

च. क्रियोपरि बलम् (Emphasis on activity)

छ. अवकाशसमयस्य सदुपयोगाय क्रियाणामायोजनम् (Place for leisure hour activities)

**जनतन्त्रं शिक्षणपद्धतयश्च**

(Democracy and Methods of Teaching) - जनतन्त्रीयसमाजस्य आदर्शाणां, मूल्यानां, भावनाञ्च प्रभाव: शिक्षणपद्धत्युपरि पतति। अत्र बालकस्य कृते सर्वदा प्रथम स्थानं कल्प्यते। तदर्थं अस्य शिक्षणपद्धति: बालकेन्द्रित: (Child centred) भवति। इदानीं शिक्षणपद्धतीनां विवरणं प्रस्तूयते।

